॥ श्रीः ॥

श्रीगणेशाय नमः

अनन्तज्योतिर्वित्पुत्रश्रीरामदैवज्ञविरचितः

मुहूर्तचिन्तामणिः

श्रीमद्गोविन्दविरचितपीयूषधाराख्यव्याख्यासहितः

तथा

पर्वतीय- श्रीकेदारदत्तज्योतिर्विद् कृत पीताम्बरा"

हिन्दी व्याख्या सहित

श्रीगणेशाय नमः ॥ दधानंभृंगालीमनिशममले गंडयुगले ददानं सर्वार्थान्निजचरणसेवासुकृहिते । दयाधारं सारं निखिलनिगमानामनुदिनं गजास्यं स्मेरास्यं तमिह कलये चित्तनिलये ॥१॥ निपीतध्वांताय प्रसृमरकरायोग्रमहसे निकामं कामानां वितरणविनोदव्यसनिने । समस्तप्रत्यूहप्रशमनकृते श्रीदिनकृते नमस्तस्मै यस्मै स्पृहयति समस्तांबुजननी ॥२॥ लसल्लक्ष्मीलीलावसतिरनिशं वेदविहितस्फुरद्धर्माधारः श्रितसुखपयोदः प्रतिदिवम् । अतीव प्रख्यातः स जयति गुणाना जननभूर्विदर्भाख्यो देशो हरिरिव सदानन्दजनकः ॥३॥ तस्मिन्विदर्भविषये विषये वितृष्णश्चिंतामणिर्द्युमणिरेव वभूव मूर्तः । जाग्रच्चतुर्मुखचतुर्मुखशायि विद्यामाद्यां प्रवर्तयितुमज्ञ पवित्रकीर्तिः ॥४॥ वादैर्विजित्य धरणीतलमासमुद्रमुन्निद्रतर्कशतकर्कशबुद्धिसिद्धैः । चत्वार ऊर्जितसमर्जितकीर्तिदंभस्तंभा दिशासु रचिताः सकलासु येन ॥५॥ ज्योतिर्विदुज्वलयशोहरणाय किं वा चंद्रांशुनिर्मलकलाभरणाय किं वा । विद्यासरोरुहदृशःशरणाय किं वा श्रीमाननंत इति तत्तनयोऽजनिष्ट ॥६॥ यस्मात्पद्माख्यपत्न्यामतिविमलमती वाक्पती दिक्पतीनामाशाः कासारजाभस्फुरदधिकयशोरश्मिभिर्व्याप्य भातो । प्राभूता तौ तनूजौ श्रुतिगणगदिताचारधारापवित्रौ ज्येष्ठः श्रीनीलकंठस्तदनु गुणगणालंकृतो रामनामा ॥७॥ सीमा मीमांसकानां कृतसुकृतचयः कर्कशस्तर्कशास्त्रे ज्योतिःशास्त्रे च गर्गः फणिपतिभणितिव्याकृतौ शेषनागः । पृथ्वीशाकब्बरस्य स्फुरदतुलसभामंडनं पण्डितेंद्रः साक्षाच्छ्रीनीलकंठः समजनि जगतीमण्डले नीलकण्ठः ॥८॥ रामो हेरम्बभक्तेरधिगतविशदानेकविद्योऽनवद्यो बुद्धिप्रद्योतमानो गणितगुणवतां मानवाना सुखाय । ग्रंथैर्नानाप्रकारैरतिकठिनतरग्रंथनक्रे विशाले ज्योतिः शास्त्रार्णवे द्राग्दृढ़तरमतुलं सेतुवंधं चकार ॥९॥ श्रुतिस्मृतिप्रोक्तसमस्तकर्मोपयुक्तमानंदितशिष्टलोकम् । मुहूर्तचिंतामणिनामकं स ग्रंथं व्यधाच्छर्वपुरे स्वपद्यैः ॥१०॥ श्रीनीलकंठस्य वभूव पत्नी सा चंद्रिकाख्योभयवंशभूषा । नारायणस्येव समुद्रकन्या शर्वस्य गौरीव विराजते या ॥११॥ तस्माद्दैवविदग्रगण्यतिलकाच्छ्रीनीलकंठात्तया गोविंदाख्यसुतोऽजनि स्वगुरुतः संप्राप्तविद्यागणः । यः शास्त्रामृतसिंधुबंधुरवचोवीचीषु नित्योदतां सानंदं समवाप्य भूरि कृतवान् ग्रंथे श्रमं ज्योतिषे ॥१२॥ अनेकबुधमंडलीविरचितां हि टीकाकृतौ निधाय हृदयेऽर्थनामिह मुहूर्त-

चिंतामणेः। निगूढतरतद्गतप्रचुरभावमात्मोक्तिभिर्बुधा विवरणे करामलकमाशु कर्तुं यते ॥१३॥ मुहूर्तचिंतामणिदुग्धसिंधुमामथ्य युक्तिव्रजमंदरेण। गोविन्दसंज्ञस्तनुते सुखाय पीयूषधारां भुवि भूसुराणाम् ॥१४॥ तत्रादितो गाणपतं प्रणम्य पादाब्जयुग्मं विदुषां सुतुष्ट्यै। शुभाशुभाध्याय-भवां हि टीकां गोविंददैवज्ञ इमां करोति ॥१५॥

अथ ग्रंथादौ ग्रंथमध्ये ग्रंथांते च मंगलमाचरणीयमवश्यमिति शिष्टाचारः। उक्तं च महा-भाष्ये—'मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्राणि प्रथंते वीरपुरुषाणि भवंत्यायुष्मत्पुरुषाणि च' इति। तच्च मंगलं त्रिविध—'आशीरूपं नमस्कारूपं वस्तुनिर्देशरूपं च' इति। उक्तं च दंडिना काव्यादर्शे—'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति। वस्तुनिर्देशो नलादेर्महाराजराजस्य सिद्धादिशब्दानां वा ग्रंथादौ कथनम् तत्र तावद्गार्ग्यमुनिवरवंशतिलकमैत्रावरुण्यलंकारदिगंतर्गतमातृपुरनिवासी सकलज्योतिर्विन्मुकुटरत्नचिंतामणिज्योतिर्वित्पुत्रानंतज्योतिर्वित्पुत्रो नीलकंठज्योतिर्विदनुजो रामज्योतिर्वित्त्रिस्कंधज्योतिःशास्त्रसरोजनिचयभास्करो ग्रंथकृन्मुहूर्तचिंतामणिनामकं श्रौतस्मार्ताद्यनेकर्मोपयिकं संहितास्कंधांतर्गतनानामुहूर्तसंग्रहरूपं ज्योतिषग्रंथं चिकीर्षुरनेकजन्मोपार्जितदुरितसंभूतविघ्नध्वंसकामो निर्विघ्नग्रंथसमाप्तिप्रचयगमनार्थं विशिष्टशिष्टाचारानुमित श्रुतिबोधित कर्तव्यताककर्माभिमतगणेशदेवताशीर्वादरूपं मंगलमिंद्रवज्राच्छंदसोपनिवध्नाति—

गौरीश्रवःकेतकपत्रभंगमाकृष्य हस्तेन ददन्मुखाग्रे।
विघ्नं मुहूर्ताकलितद्वितीयदंतप्ररोहो हरतु द्विपास्यः ॥ १ ॥

पीयूषधारा—गौरीत्याविना। द्विपास्यो विघ्नं हरत्वित्यन्वयः युष्माकमित्यध्याहारः। द्विपस्य हस्तिन आस्यमिवास्यं मुखं यस्य स द्विपास्यो गणेशो युष्माकं विघ्नं हरतु निराकरोतु। 'आशिषि लिङ्लोटौ' इति लोट्। कीदृशो द्विपास्यः ? गौरीश्रवःकेतकपत्रभगं गौरी पार्वती तस्याः श्रवसी कर्णौ तयोः स्थितं यत्केतकपत्र केतकीवृक्षस्य पुष्पं केतकं तस्य पत्रं तस्य भंगोऽशस्तं हस्तेन शुंडादंडेन कृत्वा आकृष्य हठाद् गृहीत्वा मुखाग्रे स्वमुखोष्ठे ददाति भक्षणार्थं स्थापयतीति ददत्। अनेन बाललीला गणेशस्य सूचिता। बालो हि मातृसमीपवर्तियत्किंचित्स्वेष्टं वस्तु बलात्कारेण गृहीत्वा मुखे निक्षिपति। अत एव कीदृशो गणेशः ? मुहूर्ताकलितद्वितीयदंतप्ररोहः। मुहूर्तेन क्षणेनाकलितः धातूनामनेकार्थत्वात् अनुहृतो हस्ति द्वितीयदंतसादृश्यं प्रापितो द्वितीयदंतस्य प्ररोह उद्गमो येन सः। अनेनात्याश्चर्यं सूचितं भवति। तथा हि—हस्तिनो दृश्यमाना द्विदंता एव। गणेशस्त्वेकदंत एवेति पुराणप्रसिद्धम् केतकप..स्य मुखस्थापनसमये यावन्निगरणं करोति तावद्गणेशोऽपि द्विदंत एवालोकि लोकैः। अद्भुतोपमाख्योऽलंकारः। उक्तं च दंडिना काव्यादर्शे—'यथाकथचित्सादृश्यं यत्रोद्भूतं प्रतीयते। उपमा नाम सा तस्याः प्रपंचोऽयं प्रदृश्यते ॥ यदि किंचिद्भवेत्पद्म सुभ्रुविभ्रांतलोचनम्। तत्ते मुखश्रियं धत्तामित्यसावद्भुतोपमा ॥' इति, श्लोकार्थो व्याख्यतः। तत्र गणेशस्य नमनादिरूपा पूजा ब्रह्मवैवर्तेऽभिहिता—'ढुंढिराजः प्रियः पुत्रो भवान्याः शंकरस्य च। तस्य पूजनमात्रेण त्रयोऽपि वरदाः सदा ॥' त्रयः ब्रह्मविष्णुशिवाः। 'गणेशः सर्वदेवानामादौ पूज्यः सदैव हि। सर्वैरपि महाविघ्ननाशकोऽन्यो न विद्यते ॥' इति। शिष्टाचारोऽप्येतन्मूलक एव। तथा—'सुमुखश्चैकदंतश्च

कपिलो गजकर्णकः । लंबोदरश्च विकटो विघ्ननाशो विनायकः धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि । विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥' इति । गौरीति । 'षिद्गौरादिभ्यश्च' इति ङीष् । केतकं केतक्याः पुष्पसंज्ञेयमवयवार्थे 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इत्यण । 'पुष्पमूलेषु बहुलम्' इति तस्य लुक् । ददत् । ददातीति ददत् । शतृप्रत्यये जौहोत्यादिकत्वाद्विकरणस्य शपः श्लौ सति' 'श्लौ' इति द्विर्वचने 'उभे अभ्यस्तम्' इतत्भ्यस्तसंज्ञायां 'श्नाभ्यस्तयोरातः' इत्याकारलोपः । ततः 'उगिदचां सर्वनामस्थानेऽधातोः, इति प्राप्तस्य 'नाभ्यस्ताच्छतुः' इति नुमोऽभावः । आकलितेति 'निष्ठा' इति बहुव्रीहौ निष्ठांतस्य पूर्वनिपातः । द्विपास्य इति । द्वाभ्यां शुंडादंडमुखाभ्यां जलं पिबतीति द्विपः । अतोऽनुपसुर्गे कः । 'आतो लोप इटि च' इत्याकारलोपः । द्विपस्यास्यमिवास्यं यस्यासौ द्विपास्यः । 'सप्तम्युपमानपूर्वस्य वाच्यो वोत्तरपदलोपश्च' इति बहुव्रीहिः समास उत्तरपदलोपश्च । 'हस्तौ तु पाणिनक्षत्रे' इति-हस्तशब्दः पाणिनक्षत्रवाचकः, तथाप्युपचाराद्धस्तिशुंडायामपि वर्तते । अत एव 'हस्ताज्जातौ, इति वदन्पाणिनिरप्यत्रानुकूलः । क्षीरस्वाम्यपि 'वलिहस्तांशवः कराः' इतस्य व्याख्याने हस्तिशुंडोपि कर उपचारादिति व्याचख्यौ । तद्वत्प्रस्तुतेऽपि । 'हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि' इति विश्वप्रकाशे हस्तिशुंडावाचकत्वमप्युक्तं हस्तशब्दस्य । अथात्र कवित्वे भंगशब्दोऽनुचितः । तथा हि– लोकोत्तरवर्णनानिपुणकविकर्म काव्यम्' इति काव्यलक्षणस्यात्र कवित्वे सत्त्वात् यस्मिन्कस्मिश्चित्पद्ये भंगशब्दोपादानमयुक्तम् । विशेषतो ग्रंथारंभभूते कुतः । 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि' इति काव्यप्रकाशकारेण दोषोल्लासे–'दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तसमर्थम् । निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाऽश्लीलम् ॥ संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टम् । अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव ॥' इति शब्ददोषा उक्ताः । तत्र भंगशब्देनासभ्यार्थान्तरकत्वादश्लीलाख्यो दोषोऽभिहितो भवति । तल्लक्षणं वामनेनोक्तम्–'असभ्यार्थान्तरमसभ्यस्मृतिहेतुश्चाश्लीलम्, इति अस्यार्थः–यस्य पदस्यानेकार्थस्यैकोऽर्थोऽसभ्यः स्यात्तदसभ्यार्थान्तरम् । यथा वर्च इति पदं तेजसि पुरीष च । यत्तु पदमेकदेशद्वारेणासभ्यमर्थं स्मारयति तदसभ्यस्मृतिहेतु, यथ कृकाटिकेति । एवं भंगशब्दोऽपि नानार्थः । तरंगरचनाशकलपराजयनाशादीनामर्थानां प्रकरणं विना स्फुरणादसभ्यार्थान्तरस्य नाशस्य प्रतीतेरश्लीलत्वम् । काव्यप्रकाशेऽप्यश्लीलोदाहरणम् 'पितृवसतिमहं व्रजामि तां सह परिवारजनेन यत्र मे । भवति सपदि पावकान्वये हृदयमशेषितशोकशल्यकम् ॥' अत्र पितृवसतिशब्देन पितुर्गृहमिति विवक्षितम् । तत्र श्मशानार्थस्यापि प्रतीतेरश्लीलत्वादमंगलार्थत्वम् । कथं तर्हि–'भंगं जयं चापतुरव्यवस्थम्' इति कालिदासः ? अथ भंगशब्देन पराजयो विवक्षित इत्यश्लीलत्वमिति चेत्, सत्यम्,–तत्र हि युद्धप्रस्तावे स्वरूपान्वाख्यानाददोषः । प्रस्तुते ग्रंथारंभे प्रकरणमपि नास्त्यतो भंगशब्दपाठोऽनुचितः । तस्मात् 'गौरीश्रवः केतकबालपत्रम्' इति पाठः साधीयान् (कल्प्यः । केचिदत्र पाठे बह्वक्षरपरिवर्तनभयात् 'गौरीश्रवः केतक बालपत्रभागम्' इति पठंति) । तदेतत्सर्वं मत्सररहितैः सूरिभिर्विवेचनीयम् । अथ काव्यत्वादेव प्रसंगतो वर्णगणशुद्धी विचार्येते । तत्र श्लोकादावसंयुक्तशुभफलदगकारप्रक्षेपादस्ति वर्णशुद्धिः । तदुक्तं भामहेन—'कः खो गो घश्च लक्ष्मीं वितरति च यशो ऽस्तथा चः मुखं छः प्रीतिं जो मित्रलाभं भयमरणकरौ झञौ टठौ खेददुःखे । डः शोभां ढो

विशोभां भ्रमणमथ च णस्तः सुखं यश्च युद्धं दो धः सौख्यं मुदं न सुखभयमरणक्लेशदुः खं पवर्गः ।। यो लक्ष्मीं रश्च दाहं व्यसनमथ लवो शः सुखं पश्च खेदं सः सौख्यं हश्च खेदं व्यसनमथ च लः क्षः समृद्धि करोति । संयुक्तं चेह न स्यात्सुखमरणपटुर्वर्णविन्यासयोगः पद्यादौ गद्यवक्रे वचसि च सकले प्राकृतादौ समोऽयम् ।।' इति । तेन नायकादेःसुखं भवति । 'अक्षरे परिशुद्धे तु नायको भूतिमृच्छति' इति वचनात् । प्रस्तुते ग्रंथकर्तुरध्येतुरध्यापकस्य वा सुखं वाच्यम् । अथ गण-शुद्धिः । तत्रास्मिन्पद्ये इंद्रवज्रा छंदः । तल्लक्षणं वृत्तरत्नाकरेणोक्तम्—'स्यादिंद्रवज्रा यदि त जगौ गः' इति । तव गणलक्षमपि तेनैवोक्तम्—'सर्वगुर्मो मुखांतलौ यरावंतगलौ सतौ । ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवंत्यत्र गणास्त्रिकाः ।।' इति । एषां गणानां फलमन्यैरभ्यधायि—'मकारः श्रियं योऽतिवृद्धि ररोगं सकारश्च देशाटनं द्रव्यहानिम् । तकारो जकारो रुजं भश्च कीर्ति न आयुः प्रयच्छत्यजस्रं जनानाम् ।' इति वचनादिदं फलमध्यापकाध्येतृप्रभृतीनां ज्ञेयम् । एवं सति द्रव्यहानिरूपफलदस्य तगणस्यादौ प्रयोगाद्दुष्टमिदं काव्यमिति चेत्, सत्यम्,—'उमा कात्यायनी गौरी' इति वचनाद्गौरीशब्दो देवतावचकस्तस्यादौ प्रयोगाद्दुष्टफलत्वं नास्तीति समाधिः । यथोक्तम्—'देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निंद्याः स्युर्लि-पितो गणतोऽपि वा ।।' इति । नन्वेवमपींद्रवज्रालक्षणासंगतिः । पादांतस्थाक्षरस्य 'ह्रस्वं लघु' इति लघुसंज्ञकत्वात् 'संयोगे गुरु 'दीर्घं च' इति विशेषलक्षणानाक्रांतत्वेन गुरुत्वायोगाच्च । उच्यते—पादांतस्थस्य लघोरपि वैकल्पिकगुरुत्वोक्तेरदोषः । यथोक्तं वृत्तरत्नाकरे—'सानुस्वारो विसर्गंतो दीर्घो युक्तपरश्च यः । वा पादांते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः ।।' इत्यल-मतिप्रसंगेनेति शिवम् ।। १ ।।

पीताम्बराकृतो मङ्गलाचरणम्—

मूलनारायणं नन्दादेवीं बज्रेन्द्रसंज्ञिकम् ।
नवलिङ्गं तथा भक्त्या हरिनागं पुनः पुनः ।।
ज्वालामुल्कां कुलाभीष्टदेवतां सप्तसंख्यकाम् ।
ध्यायंध्यायमहन्तावत्प्रणमामि मुहुर्मुहुः ।। १ ।।
यत्पादस्पर्शमात्रेण मूढो गूढार्थविद् भवेत् ।
तद्गुरोः पादयोरेष प्रणामकुसुमाञ्जलिः ।।
अञ्जलिं शिरसा स्पृष्ट्वा प्रह्वीभूतः पुनः पुनः ।
कामये त्वत्प्रसादं हि निर्विघ्नं स्याम फलेग्रहिः ।। २ ।।
दैवज्ञानन्तपुत्रेण श्रीरामविदुषा ननु ।
चिन्तामणिर्मुहूर्तानां चिन्तामणिरिवाद्भुतः ।।
निर्मितः कोऽप्यपूर्वोऽसौ ग्रन्थराजो हि विश्रुतः ।
गोविन्द इव गोविन्दो दैवज्ञो विद्वदग्रणीः ।। ३ ।।

व्याख्यानमकरोत्तत्र यत्र पाण्डित्यमद्भुतम् ।
पीयूषमिव पीयूषधारा व्याख्येति विश्रुता ॥ ४ ॥

जुनायलाभिधे ग्रामे संस्थितस्य महात्मनः ।
ज्योतिर्विदां वरिष्ठस्य ब्रह्मीभूतस्य धीमतः ॥

हरिदत्तस्य पुत्रोऽयमास्ते विद्वद्वशंवदः ।
केदारदत्तजोशीति संज्ञया परिचीयते ॥

[1]विश्वविद्यालये काश्यां ज्यौतिषाध्यापकस्तु यः ।
व्याख्यां पीयूषधारायाः मूलचिन्तामणेश्च सः ॥

पीताम्बराभिधामेतां सरसां सरलां तथा ।
जिज्ञासुजनबोधाय कुरुते[2] राष्ट्रभाषया ॥

अनया सेवया देवी माता पीताम्बरा परा ।
विधूय सकलान् विघ्नान् शीघ्रं सा संप्रसीदतु ॥

पीताम्बरा—श्री गणेश जी की वन्दना की गई है । ग्रन्थ के आदि, मध्य और अन्त मे मंगलाचरण किया जाना संस्कृत शास्त्रों की मर्यादा है । इससे ग्रन्थ रचयिता को आध्यात्मिक प्रेरणा मिलती है । सरस्वती की कृपा से ग्रन्थ सर्वोत्तम, सर्वोपादेय होते हुए लोकप्रिय भी होता है और सनातन काल के लिए शास्त्रों की मर्यादा सुरक्षित भी रहती है ।

यहाँ पर पीयूषधाराकार श्री गोविन्द ने साहित्य शास्त्र की दृष्टि से "केतकपत्रभङ्गम्" भङ्ग शब्द के स्थान पर केतकपत्रभागम् या "केतकवाल-पत्रम्" होना चाहिए भंग शब्द सदोष होने से "भाग शब्द होना और अच्छा है" कहा है । वस्तुतः अर्थ में अन्तर नहीं पड़ता । पाठकों की रुचि "भंग" या "भाग" में, जिस पर स्वाभाविक हो वही ठीक है ।

"मुहूर्त्तचिन्तामणि ग्रन्थ का प्रारम्भ शुभ हो और निर्विघ्न रूप से ग्रन्थ की समाप्ति होकर लोक कल्याण हो" ऐसी सुन्दर शास्त्र भावना की प्रबलता के लिए आचार्य ने शक्ति और शिव, के साथ श्री गणेश जी की स्तुति करते हुए उनके क्षणिक अति सुन्दर वाल स्वरूप का वर्णन किया है कि—

पार्वती के दोनों कर्णों में केतकी पुष्प के एक भाग को, माता की गोद में बैठे हुए, श्री गणेश जी ने अपने सूड़ (शुण्ड) से खींच कर उसे अपने मुख के अग्र भाग दांतों की जगह पर (यद्यपि गणेश जी का एक ही दांत हैं) रख दिया । माता पार्वती की गोद में वैठे हुए गणेश की इस वाल-लीला से उनके मुँह में क्षण मात्र के लिए एक दांत की जगह दर्शकों ने दर्शनीय गणेश जी को दूसरे दांत की उत्पत्ति से सुशोभित देखा ।

कवि ने "केतकी पुष्प अवयव से उत्पन्न क्षणिक द्वितीय दांत की सी शोभा" इत्यादि

---

१. "हिन्दू विश्वविद्यालये" स्पष्टार्थम् ।

२. अत्र अन्य-पुरुषप्रयोगः स्वकीयानौद्धत्यप्रदर्शनार्थं इति ।

इस सुन्दर सही कल्पना से निर्विघ्न ग्रन्थ समाप्ति के लिए साम्ब शिव पुत्र श्री गणेश जी की प्रार्थना की है ॥ १ ॥

एवमादिपद्येनेष्टदेवताशीर्वादरूपमंगलमभिधायेदानीं ज्योतिषग्रंथमारंभमाणो रामज्योतिर्विद्विषयप्रयोजनसंबंधाधिकारिणः सूचयन् कर्तव्यमुपजातिकया प्रतिजानीते—

क्रियाकलापप्रतिपत्तिहेतुं संक्षिप्तसारार्थविलासगर्भम् ।
अनन्तदैवज्ञसुतः स रामो मुहूर्तचिंतामणिमातनोति ॥ २ ॥

पीयूषधारा—क्रियाकलापेति । स प्रसिद्धो जगतीतलेऽनंताख्यो दैवज्ञो ज्योतिर्वित् तस्य सुतः पुत्रो रामो रामज्योतिर्वित् मुहूर्तचिंतामणि मुहूर्तानां दिनशुद्धिविशेषाणाम् । अथवा मुहूर्तशब्देन दिनस्य रात्रेर्वा पंचदशो विभाग उच्यते । उक्तं च रत्नमालायाम्—'दिनस्य यः पंचदशो विभागो रात्रेस्तथा तद्धि मुहूर्तमानम्' इति । तत्र लक्षणया मुहूर्तोपलक्षितः कालो मुहूर्तशब्देन विवक्ष्यते । तस्य चिंता शुभाशुभरूपो विचारस्तस्य मणिरिव मुहूर्तचिंतामणिः । यथा मणिर्हीरकादिः समस्तकांतीनामाधारस्तथायमपि ग्रंथो निखिलमुहूर्तानामाधार इत्यन्वर्थनामानं लक्षणया मुहूर्तचिंतामणिं ज्योतिषग्रंथमातनोति । निषेधविध्यादिसंनिवेशविशेषेण निरूपयतीत्यर्थः ननु जीर्णा अपि मुहूर्तग्रंथाः संति, तैरेव निखिलमुहूर्तविचारनिर्वाहे सिद्धे किमनेन जीर्णमुहूर्तग्रंथानुवादभूतेनेत्यत आह—कीदृशं मुहूर्तचिंतामणिम् ? क्रियाकलापप्रतिपत्तिहेतुम् । क्रिया जातकर्मनामकर्मादिकास्तासां कलापः समूहस्तस्य अमुकस्मिन् शुभदिने कार्यमेतस्मिन्नशुभदिने न कार्यमित्येवंरूपा प्रतिपत्तिः सम्यक् ज्ञानं तस्यां हेतुं कारणम् । अयमर्थः—अन्येषु मुहूर्तग्रंथेषु तिथिप्रकरणे कर्मविशेषेषु शुभाशुभतिथयो निरूपिताः । एवं वारप्रकरणे वारा एव । तथा नक्षत्रप्रकरणे नक्षत्राण्येव । योगप्रकरणे योगा एव । लग्नप्रकरणे लग्नान्येवाभिहितानि एवं सत्यखिलप्रकरणानां पुनः पुनरांदोलनेन मुहूर्तविचारः प्रसिध्येदिति गौरवमस्ति । अत्र त्वेकस्मिन्नेव पद्ये यो यो मुहूर्तो विचार्यते तस्य तस्य तत्रैव निर्वाह इति लाघवम् । यथा—'नवान्नं स्याच्चरक्षिप्रमृदुभे सत्तनौ शुभम् । विना नंदाविषघटीमधुपौषार्किभूमिजान् ॥' इत्यादि । केचित्तु 'क्रियाकलापप्रतिपत्तिहेतोः' इति पंचम्यंतपाठमाहुः । ननु मुहूर्ततत्त्वादावपि क्वचिदेवंविधमुहूर्तनिरूपणाद्व्यर्थोऽयं श्रम इत्यत आह—कीदृशं मुहूर्तचिंतामणिं? संक्षिप्तसारार्थविलासगर्भम् । संक्षिप्तः शब्दैः सारार्थो निष्कृष्टार्थस्तस्य विलासः प्रकाशः स गर्भे यस्यासौ । संक्षिप्तश्चासौ सारार्थविलासगर्भश्चसंक्षिप्तसारार्थविलासगर्भस्तमिति कर्मधारयः । यद्यपीदानींतनग्रंथेषु शब्दलाघवेनार्थबाहुल्यमस्ति तथापि शब्दानां दुरवबोधार्थत्वाद्गुरुमुखादप्यध्ययने सति झटिति मनस्यर्थास्फुरणाच्चेत्यनुपादेयत्वम् । अत्र तु शब्दतोऽपि लाघवं, तत्रापि निष्कृष्टस्याप्यर्थस्य तादृशशब्दैर्निरूपणाद्यथा गुरुमुखं विनैवार्थज्ञानं सद्यो मनसि जागर्तितरामित्यवश्यमुपादेयत्वमस्य ग्रंथस्य । ननु किमभिधेयार्थकमिदं शास्त्रम् ? प्रयोजनमपि किम् ? 'प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्तते' इति न्यायात् । उक्तं च—'सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् । यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते ॥' अन्यच्च—"ज्ञानार्थं ज्ञानसंबंधं श्रोतुं श्रोता प्रवर्तते । ग्रंथादौ तेन वक्तव्यः संबंधः सप्रयोजनः ॥' इति । उच्यते—मुहूर्तचिंतामणिमित्यनेनैव पदेन सर्वं सूचितम् । तथा हि—शुभाशुभप्रकरण-

नक्षत्रप्रकरणसंक्रांतिगोचरप्रकरणसंस्कारविवाहप्रकरणवधूप्रवेशाग्न्याधान - राज्याभिषेकयात्राप्रकरणगृहारंभगृहप्रवेशमुहूर्तसमुदायाः संहितापदार्था प्रतिपाद्यत्वेन विषयभूताः । यद्यपि वसिष्ठादिभिः सूर्यचाराद्युत्पातादिकमपि संहितापदार्थेष्वभ्यधायि तथाप्यत्र तेषां मुहूर्तविचारेऽनुपयोगाद् ग्रन्थकृता नोक्तमिति तात्पर्यम् । मुहूर्तानां प्रतिक्षणं लौकिकविचारार्हत्वेन तदभिधानात् । अत्राभिधेयपदार्थानां मुहूर्तचिंतामणिनामकग्रन्थस्य च प्रतिपाद्यप्रतिपादकभावः संबंधः । प्रयोजनं शुभाशुभकथनं विवाहादिकालनिर्णयश्च । यदाह नारदः—'प्रयोजनं तु जगतः शुभाशुभनिरूपणम् ।' कश्यपोऽपि—'ग्रहणग्रहसंक्रांतियज्ञाध्यनकर्मणाम् । प्रयोजनं व्रतोद्वाहक्रियाणां कालनिर्णयः ॥' एतज्जिज्ञासुरधिकारी । स च द्विज एव नान्यः । तदुक्तं नारदेनैव—'सिद्धांतसंहिताहोराखूपस्कंधत्रयात्मकम् । वेदस्य निर्मलं चक्षुर्ज्योतिः–शास्त्रमकल्मषम् । विनैतदखिलं श्रौतं स्मार्तं कर्म न सिध्यति । तस्माज्जगद्धितायेदं ब्रह्मणा निर्मितं पुरा ॥ अत एव द्विजैरेतदध्येतव्यं प्रयत्नतः ॥' इति । अत्रैवकारस्य प्रपाठक्रमेण योजने प्रयोजनं विनैव ज्योतिःशास्त्राध्ययनस्यावश्यकत्वं प्रतीयते । द्विजैरेवेति व्याख्याने द्विजव्यतिरिक्तैः शूद्रैर्नाध्येयमिति च प्रतीयते । व्याख्याद्वयमपि युक्तमेव । द्विजा=ब्राह्मणक्षत्रियवैश्याः । उक्तं च काशीखंडे—'ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजाः स्मृताः । प्रथमं मातृतो जन्म द्वितीयं चोपनायनात् ॥' इति । यत्तु वसिष्ठवचने—'अध्येतव्यं ब्राह्मणैरेव तस्माज्जयोतिःशास्त्रं पुण्यमेतद्रहस्यम् । एतद्बुध्वा सम्यगाप्नोति नूनं धर्मं चार्थं मोक्षमग्र्यं यशश्च' इति । ब्राह्मणग्रहणमध्यापनेऽप्यावश्यकत्वसूचनार्थम् । अत एव महाभारते—'यजनं याजनं चैव तथा दानप्रतिग्रहौ । अध्यापनं चाध्ययनं षट्कर्मा ब्राह्मणः स्मृतः ॥' इति । क्षत्रियविशोस्त्वध्ययन एवाधिकारो नाध्यापने । तदुक्तं मनुना—'प्रजानां रक्षणं दानमिज्याध्ययनमेव च ॥ विषयेष्वप्रसक्ति च क्षत्रियस्य समादिशेत् ॥ पशूनां रक्षणं दानमिज्याध्ययनमेव च । वाणिज्यं च कुसीद च वैश्यस्य कृषिरेव च ॥ 'इति । अत्र प्रजारक्षणाद्युक्तेर्नाध्यापनाधिकारः । ननु कथं ज्योतिषं श्रौतस्मार्तकर्मौपयिकं ? इति चेदुच्यते—'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत', तथा 'वसंते ब्राह्मणोऽग्नीनादधीत', 'दर्शपूर्णमासाभ्यां यजेत्' इत्यादिश्रुतयः संति । तत्र वर्षज्ञानमादित्यादिग्रहचारपरिच्छेदसाध्यं, तस्य वसन्ताद्यृतूनां च दर्शपौर्णमासयोश्च ज्ञानं ज्यौतिषं विना सर्वथैव न निर्वहतीत्यवश्यमध्येतव्यं ज्योतिःशास्त्रम् । उक्तं च वेदांगज्योतिषे = 'वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः । तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ॥' अत एव वेदस्य मुख्यमिदमंगं चक्षूरूपत्वात् । तदप्युक्तं शिक्षायाम्—'छंदः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।' तथा—'यथा शिखा मयूराणां नागानां मणयो यथा । तद्वद्वेदांगशास्त्राणां ज्यौतिषं मूर्धनि स्थितम् ॥' इति । एवं मुख्यतायां सत्यां दृष्टांतो वसिष्ठसिद्धान्ते—'वेदस्य चक्षुः किल शास्त्रमेतत्प्रधानतांगेषु ततोऽर्थजाता । अंगैर्युतोऽन्यैः परिपूर्णमूर्तिश्चक्षुर्विहीनः पुरुषो न किंचित् ॥' तस्मात्कर्मौपयिकत्वादवश्यमध्येयं ज्योतिःशास्त्रम् । तत्राध्ययने समीचीनशिष्या एवाध्याप्या न कृतघ्नादयः । तदुक्तं श्रुतौ—'विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेहमस्मि । असूयकायानृजवेशताय न मां ब्रूयावीर्यवती तथा स्याम् ॥' इति समरसारेऽपि—'नैतद्देयं दुर्विनीताय

जातु ज्ञानं गुप्तं तद्धि सम्यक् फलाय । अस्थाने हि स्थाप्यमानैव वाचां देवी कोपान्निर्दहेन्नो चिराय ॥ विनयावनताय दीयमानं प्रभवेत्कल्पलतेव सत्फलाय । उपकृत्यनुचितकानि शास्त्राण्युपकारस्य पदं हि साधुरेव ॥' इति । सिद्धांतशिरोमणावपि—'दिव्यं ज्ञानमतींद्रियं यदृषिभिर्ब्राह्मं वसिष्ठादिभिः पारं पर्यवशाद्रहस्यमवनीं नीतं प्रकाश्यं ततः । नैतद्द्वेषिकृतघ्नदुर्जनदुराचारचिरावासिनां स्यादायुःसुकृतक्षयो मुनिकृतां सीमामिमामुज्झतः ॥' इति । एवं सत्यस्मिञ्ज्योतिःशास्त्रे सर्वथा न शूद्राणामधिकारः । उक्तं च मनुना—'एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत् । एतेषामेव वर्णानां शुश्रूषामनसूयया ॥' इति नारदवाक्यं तु प्रागेवाभिहितम् । तत्र यदि ब्राह्मणः शूद्रं लोभादिना पाठयति तस्माच्च पठति तदा महान् दोषः । यदाह गर्गः—'स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोऽपि वा । शूद्राणामुपदेशं तु दद्यात्स नरकं व्रजेत् ॥ लग्नं ददाति यः शूद्रः सत्कृत्षोडशकर्मणाम् । अंधो युगसहस्रांते जायते श्वानयोनिषु । सम्यगाचारयुक्तोऽपि यः शूद्रः सर्वशास्त्रवित् । वर्जयेद्वचनं तस्य कपालस्थोदकं यथा ॥' इति । कपालं=मनुष्यशिरोमध्यवर्त्यस्थि । 'भृतकाध्यापको यश्च भृतकाध्यापितश्चयः । तावुभौ पतितौ विप्रौ स्वाध्यायक्रयविक्रयात् ॥' इति सामान्यतो हेमाद्रौ देवलस्मरथाच्च । अथैवंविधस्य ज्यौतिःशास्त्रस्याध्येतुर्माहात्म्यमाह मांडव्यः—'एवंविधस्य श्रुतिनेत्रशास्त्रस्वरूपभर्तुः खलु दर्शनं वै । निहंत्यशेषं कलुषं जनानां षडब्दजं धर्मसुखास्पदं स्यात् ॥' इति । अत्र ज्ञानविशेषेण ज्योतिर्विदः पूज्यतातारतम्यं जीर्णैरम्यधायि—'दशदिनकृतपापं हंति सिद्धांतवेत्ता त्रिदिनजनितदोषं तंत्रविज्ञः स एव । करणभगणवेत्ता हंत्यहोरात्रदोषं जनयति घनमंहश्चात्र नक्षत्रसूची ॥' नक्षत्रसूची दैवज्ञो घनं बहु अंहः पापं जनयति । तल्लक्षणं वाराहसंहितायाम्—'अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते । स पंक्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः ॥' अन्यच्च—'तिथ्युत्पत्तिं न जानंति ग्रहाणां नैव साधनम् । परवाक्येन वर्तंते ते वै नक्षत्रसूचकाः ॥' इति । व्युत्पत्तिस्तु—गृहे गृहे गत्वाऽपृष्ट एव नक्षत्राण्यश्विन्यादीनि शुभाशुभफलसूचकानि सूचयतीति नक्षत्रसूची । वराहः—'नक्षत्रसूचकोद्दिमुपवासं करोति यः । स व्रजत्यंधतामिस्रं सार्धमृक्षविडंबिना । नक्षत्रसूचकं पापं. भिषजं शुल्कजीविनम् । तादृक्पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत् ।" अत एव वसिष्ठः—'त्रिस्कंधपारंगम एव पूज्यः श्राद्धे सदा भूसुरवृंदमध्ये । नक्षत्रसूची खलु पापरूपो हेयः सदा सर्वसुधर्मकृत्ये ॥' वराहोऽपि—ग्रन्थतश्चातश्चैव कृत्स्नं जानाति यो द्विजः । अग्रभुक् स भवेच्छ्राद्धे पूजितः पंक्तिपावनः ॥ नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता । चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते ॥ मुहूर्ततिथिनक्षत्रमृतवश्चायनानि च । सर्वाण्येवाकुलानि स्युर्न स्यात्सांवत्सरो यदि ॥' अत एव यद्धर्मशास्त्रे सुमन्तुः—तस्करकितवेत्यादिना महता गद्येन सांवत्सरिकोऽपांक्तेय इत्याह । महाभारतेऽपि—'केतवो भ्रूणहा लक्ष्मी' इत्यादिपद्यषट्कमध्ये—'कुशीलवो देवलको नक्षत्रैर्यश्च जीवति । एतानिह विजानीयाद् ब्राह्मणान् पंक्तिदूषकान् ।" इत्युक्तं, तन्नक्षत्रसूचकज्यौतिर्विद्विषयम् । यदाह कश्यपः—'दार्त्विग्भ्रूणहंतृश्चं व्यंगान्नक्षत्रसूचकान् । वर्जयेद्ब्राह्मणानेतान्सर्वकर्मसु यत्नतः । इति । 'नक्षत्रसूचकश्चैव पर्वकारश्च गर्हितः' इति ब्रह्मपुराणेऽप्युक्तेः, अपृष्ट इति वाक्यशेषोऽत्राध्याहार्यः । अत एव मनुः—'तिथिं पक्षस्य न ब्रूयान्न नक्षत्राणि निर्दिशेत्' इत्याह स्म यमोऽपि—'नक्षत्रतिथिपुण्याहान्मुहूर्तान्मंगलानि च । न निर्दिशंति ये विप्रास्तैर्भुक्तं ह्यक्षयं भवेत् ॥' इति ।

वसिष्ठवाक्यं तु प्रागभिहितम् । महाप्रयोजनं त्वेतच्छास्त्रस्य सम्यग्ज्ञानाद्ब्रह्मसायुज्यमिति । तदुक्तं गर्गेण—'ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम् । ज्योतिर्ज्ञानं च यो वेद स याति परमां गतिम् ।। परमां गतिं = ब्रह्मसायुज्यमिति । सूर्यसिद्धान्तेऽपि—'दिव्यं चक्षुग्रहर्क्षाणां दर्शितं ज्ञान-मुत्तमम् । विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतम् ।।' वराहसंहितायामपि—'न सांवत्सर-पाठी च नरके परिपच्यते । ब्रह्मलोकं प्रतिष्ठां च लभते दैवचिंतकः ।।' इति । संवत्सरं वर्षमधिकृत्य कृतो ग्रन्थः सांवत्सरः । 'अधिकृत्य कृते ग्रन्थे' इत्यण् । आदिवृद्धिः तं । पठितुं शीलमस्य स सांवत्सरपाठी ज्योतिर्विदुच्यते । वसिष्ठेन त्वैहिकामुष्मिकरूपं फलद्वयमप्युक्तं प्राक्—'एतद्बुद्धा सम्यगाप्नोति नूनं धर्मं चार्थं मोक्षमग्र्यं यशश्च ।।' इति । तस्माज्ज्योतिःशास्त्र-मवश्यमध्येतव्यमिति स्थितं । ननु ज्योतिःशास्त्राध्ययनं न्यायशास्त्रादिवत् किं वादमात्रफलम्, उत चिकित्साशास्त्रवत्प्रत्यक्षदृश्यफलम् ? उच्यते,—दृष्टे संभवत्यदृष्टकल्पना न न्याय्येति दृष्टार्थ ताप्यस्य शास्त्रस्य । वादरूपं तु फलं सर्वेष्वपि शास्त्रेषु तुल्यम् । उक्तं च–'अन्यानि शास्त्राणि विनोदमात्रं न किंचिदेषां भुवि दृष्टमस्ति । चिकित्सितज्यौतिषमन्त्रवादाः पदे पदे प्रत्ययमाव-हन्ति ।।' प्रत्ययं = विश्वासं संवादरूपम् । नन्वस्मिन् शास्त्रे के वा प्रत्यया इति चेत्पृच्छसि, तर्हि श्रृणु सूर्यचंद्रयोर्ग्रहणं जगतीतले आबालवृद्धेभ्यो महान् प्रत्ययः । उक्तं च–'अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् । प्रत्यक्षं ज्यौतिषं शास्त्रं चंद्रार्कौ यत्र साक्षिणौ ।।' अथान्येऽपि प्रत्ययाः चंद्रशृंगोन्नतिर्ग्रहयुतिश्च सूर्यादीनां ग्रहाणां च्छाया गणितागता यद्यपि भौमादीनां छाया दृग्गोचरा नास्ति तथापि नलिकादियंत्रवेधेन यस्मिन्समये सुषिरमध्ये ग्रह आगच्छति तत्समयसंवा-दादर्थापत्तिप्रमाणसिद्धा छायापि प्रत्ययः । शुक्रस्य तु महामंडलत्वे छाया दृग्गोचरापि भवति । ग्रहाणां चंद्रादीनां द्विविधा अप्यस्तोदयाः । एके सूर्यासन्नवशेन, अपरे प्रत्यहं क्षितिजसंबंधवशात् । ततोऽपि सूर्यासन्नवशतो भौमगुरुशनीनां प्राच्यामेवोदयः; प्रतीच्या मेवास्तः । अथायुर्दायस्येयत्ता । यात्रायां शुभशकुने शुभफलम् अशुभशकुनेऽशुभफलम् । यज्ञोपवीत विवाहादिमंगलकृत्येषु शुभलग्ना-नुष्ठितेपूक्तफलावाप्तिः । यत्र क्वचिद्व्यभिचारः स जन्मकालीनसदसद्ग्रहवशेन । एवमादयोऽपि प्रत्यया ऊह्याः । सर्वेषामपि शास्त्राणामध्ययने मोक्षाद्यदृष्टरूपं फलं तु वाचनिकमेव, तदस्मिन्नपि शास्त्रे तुल्यमित्यलमतिप्रसक्तानुप्रसक्तेनेति शिवम् ।। २ ।।

पीताम्बरा—गर्भाधान, पुंसवन सीमन्त, जातकर्म, नामकरण, जलपूजा, दोलारोहण, शिशु ताम्बूल भक्षण, निष्क्रमण, अन्नप्राशन, भूम्युपवेशन, कर्णवेध, चूडाकरण, अक्षरारम्भ, विद्यारम्भ, व्रतबन्धन, ब्रह्मौदन, केशान्त, समावर्तन, विवाह, अग्न्याधानान्त प्रेत कृत्यादि अनेक संस्कारों के शुभ मूहूर्त, यज्ञ याग, यात्रा, गृह निर्माण, प्रवेश, आभूषण निर्माण, सेवक स्वामी सेवा, ऋण ग्रहण, हल चलाने, बीज वपन, धान्यच्छेदन प्रभृति अनेक लोक प्रसिद्ध मुहूर्तों के अच्छी तरह से ज्ञान के लिये, गूढ़ अर्थ से विलसित होते हुए भी बहुत कम शब्दों में वास्तविक तत्त्व रूप अर्थ को प्रकट करने वाले इस मुहूर्त्तचिन्तामणि नामक ग्रन्थ की रचना "अनन्त" दैवज्ञ के सुपुत्र विख्यात दैवज्ञ शिरोमणि श्री "रामाचार्य" जी से की जा रही है।

ग्रन्थ का अध्ययन गुरुमुख से ही स्पष्ट होता है, स्वयं से उपार्जित (विना गुरु का ज्ञान) अपूर्ण है। इस ग्रन्थ में ग्रन्थ निर्माता आचार्य ने कम शब्दों में अधिक अर्थबोध की अपनी बड़ी

वैदुष्यपूर्ण शैली का परिचय दिया है कि सुयोग्यगुरु से अध्ययन करते हुए गुरु मुख से सुनने के पहिले ही ग्रंथ के बहुत से आशय सुयोग्य छात्र के मन में जाग्रत हो जाते हैं। इसीलिये, ग्रन्थ का सार्थक नाम भी मुहूर्त चिन्तामणि रखा गया है, जिस नाम मात्र से सर्वसाधारण को पता लग जाता है कि शास्त्र और लोक व्यवहार में प्रचलित ज्यौतिष मुहूर्तों के ज्ञान के उत्तम ग्रन्थ का नाम मुहूर्त्त-चिन्तामणि है।

पीयूष धारा में—सिद्धान्त संहिता और होरा रूप त्रिस्कन्ध ज्यौतिष को वेदभगवान् का स्वच्छ नेत्र कहते हुए श्रौतस्मार्त कर्माचरण के लिए ज्योतिषज्ञान अत्यन्त आवश्यक बताया हैं। संसार के कल्याण के लिए "ब्रह्मा" ने उक्त शास्त्र की रचना की, और द्विज मात्र ने अवश्य इस ज्ञान को प्राप्त करना चाहिए""इत्यादि वर्णाश्रम व्यवस्था आदि अनेक शास्त्रार्थों का समावेश भी किया है।

इस प्रसंग में पीयूषधाराकार का मत है कि यह ज्ञान विनीत, शीलवान, शिष्ट विद्यार्थी को ही देना चाहिए, कृतघ्न, आचरण हीन और दुर्विचार के व्यक्ति के लिये यह ज्ञान हितावह नहीं होगा।

ज्यौतिश्शास्त्र के अध्ययन का मुख्य फल "मोक्ष प्राप्त करना है, ज्यौतिष ज्ञान से मानव ब्रह्म सायुज्य प्राप्त करता है"—इत्यादि मत गर्ग, सूर्य सिद्धान्त, वाराह, वशिष्ठ आदिकों ने भी व्यक्त करते हुए यह भी स्पष्ट किया है कि न्याय व्याकरणादि सभी शास्त्र विनोदमात्र या वादमात्र हैं, किन्तु (१) ज्यौतिष (२) आयुर्वेद और (३) तन्त्र शास्त्र तो पदे-पदे प्रत्यक्ष फल देते हैं। जैसे—सूर्य चन्द्र के ग्रहण, चन्द्रमा की शृंगोण्नति, ग्रहों की युति, गुरु शुक्र का उदय अस्त, ग्रहों की तनु धन सहज सुख...लाभ व्ययादि द्वादशभावों का ग्रहों की स्थिति वश सही भविष्यज्ञान, शुभ शकुन की यात्रा में शुभ, अशुभ शकुन की यात्रा में अशुभ फल, जनेऊ विवाह आदि संस्कारों के अच्छे मुहूर्तों से संस्कार्य वटु या वर कन्या के शुभ भविष्य, अशुभ महूर्तों के जन्मकालीन ग्रहों की स्थिति वश जीवन में अनेक शुभाशुभ इत्यादि ये सब ज्योतिष शास्त्र की प्रत्यक्ष देनें हैं। तथा सब शास्त्रों के अध्ययन का वाचनिक जो मोक्षादि अदृष्ट फल कहा गया है वह सब तो इस शास्त्र के अध्ययन से भी तो होता ही है। इसलिए मोक्षादि अदृष्ट फल प्राप्ति में ज्यौतिष शास्त्र की सब शास्त्रों से तुल्यता होते हुए भी ऐहिक प्रत्यक्षता से सब शास्त्रों में ज्यौतिष शास्त्र की गरिमा के लिए यह अपना एक विशिष्ट स्थान रखता है ॥ २ ॥

अथ मुहूर्तचितामणिनामकग्रंथप्रकरणप्रतिज्ञामभिधायेदानीं सामान्यतो मुहूर्तविचारार्थमुत्सर्गापवादरूपा गुणा दोषाश्च तावद्वक्तव्याः, तेषां च तिथ्याद्यधीनत्वादादौ तिथयो वक्तव्याः, तासां तु लोकप्रसिद्धत्वादेवावक्तव्यतायां सिद्धायां तत्स्वामिन एवानुष्टुप्छंदसाभिदधाति—

तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहो रविः।
शिवो दुर्गांतको विश्वे हरिः कामः शिवः शशी ॥ ३ ॥

पीयूषधारा—तिथीशा इति ॥ एते पंचदश तिथिनां क्रमेणेशाः स्वामिस्तानाहवह्निकावित्यादि ।वह्निश्च कश्च वह्निकौ। वह्निः अग्निः, को ब्रह्मा। अत्र 'देवताद्वंद्वे च' इत्यानङ् न

भवति । एकहविर्भक्तित्वेन प्रसिद्धसाहचर्याभावात् । नन्वेवं 'अल्पाच्तरं' इति द्वंद्वे कशब्दस्य पूर्वनिपातप्राप्तिः । 'ङसिङ्योः स्मात्स्मिनौ' इति ज्ञापकेन पूर्वनिपातप्रकरणमनित्यमित्यनित्यत्वात्क्रमस्य विवक्षितत्वाच्च न भवति । एवं सति प्रतिपदो वह्निर्द्वितीयाया ब्रह्मा स्वामीत्ययमर्थः सिद्धो भवति । अथवा 'तिथीशोऽग्निर्विधिर्गौरी' इत्यसंदेहार्थमेवं पठितव्यम् । 'ईश ऐश्वर्ये' इति धातुः कर्त्रर्थक्विबंतस्तस्माद्बहुवचनं जस् । ईशते इतीशाः, तिथीनामीशास्तिथीशाः तिथिस्वामिन इत्यर्थः । अथवा 'तिथीशा रो विधिर्गौरी' इति व्यक्तं पठनीयम् । ईशशब्दोऽकारांतः । रशब्देनाग्निरुच्यते । 'रः पावके च तीक्ष्णांशौ' इति विश्वः । रश्च कालेऽनले सूर्ये, इत्येकाक्षरनिघंटुः । रोऽग्निः, विधिर्ब्रह्मा, गौरी पार्वती, गणेशः प्रसिद्धः, अहिः सर्पः, गुहः, स्वामिकार्तिकेयः, रविः, सूर्यः, शिवो महादेवः, दुर्गा जगदंबा, अंतको यमः, विश्वे विश्वेदेवाः, हरिर्विष्णुः, कामो मदनः शिवः स एव, शशी चंद्रः । तदाह वसिष्ठः—'वह्निर्विधाताऽद्रिसुता गणेशः सर्पो विशाखो दिनपो महेशः । दुर्गा यमो विश्वहरी च कामः शर्वो निशेशश्च पुराणदृष्टा ।'' इति । स्वामिन इति शेषः । प्रयोजनं तु तत्तद्देवताप्रतिष्ठा पूजादि । तथा च वराहसंहितायामुक्तम्—'यत्कार्यं नक्षत्रे तद्दैवत्यासु तिथिषु तत्कार्यम् । करणमुहूर्तेष्वपितत्सिद्धिकरं देवतानां च ॥' इति । नारदोऽप्याह 'यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः ।' अग्निपुराणेऽपि—'प्रतिपद्यग्निपूजा स्याद्द्वितीयाया च वेधसः । दशाम्यामंतकस्यापि षष्ठ्यां पूजा गुहस्य च ।। चतुर्थ्यां गणनाथस्य गौर्यास्तत्पूर्ववासरे । सरस्वत्या नवम्यां च सप्तम्यां भास्करस्य च ॥ अष्टम्यांच चदुर्दश्यामेकादश्यां शिवस्य च । द्वादश्यां च त्रयोदश्यां हरेश्च मदनस्य च ॥ शेषादीनां फणीशानां पंचम्यां पूजनं भवेत् । पर्वणींदोस्तिथिष्वासु पक्षद्वयगतास्वपि ॥' इति । रत्नमालायामपि—'अथामरस्थापनमुत्तरायणे स्वदेववारर्क्ष तिथिक्षणादिषु' इति । अथ प्रत्येकं तिथिकृत्यानि ग्रंथकृदनुक्तान्यप्यस्माभि लिख्यंते लोकोपयोगित्वात् तान्याह वसिष्ठः—'नोद्वाहयात्रोपनयप्रतिष्ठासीमन्तचौलाखिलवास्तुकर्म । गृहप्रवेशाखिलमंगलाद्यं कार्यं हि मासाद्यातिथौ कदाचित् ॥ १ ॥' मासाद्यतिथौ = शुक्लपक्षप्रतिपदि अत एव कृष्णपक्षप्रतिपद्येतानि कर्माणि सुखेन भवन्तीत्यर्थः । यद्येषोऽभिप्रायोऽसंमतः स्यात्तदा पक्षाद्यतिथाविति ब्रूयात् । 'सप्तांगचिह्नानि नृपस्य वास्तुव्रतप्रतिष्ठाखिलमंगलानि । यात्राविवाहाखिलभूषणाद्यं कार्यं द्वितीयादिवसे सदैव ॥ २ ॥ संगीतविद्याखिलशिल्पकर्मसीमन्तचौलान्नगृहप्रवेशम् । कार्यं द्वितीयादिवसे यदुक्तं सदा तृतीयादिदिवसेऽपि कार्यम् ॥ ३ ॥ रिक्तासु विद्युद्वधबधबन्धशस्त्रविषाग्निघातादि च याति सिद्धिम् । यन्मंगलं तासु कृतं च मूढैर्विनाशमायातितदाशु नूनम् ॥ ४ ॥' रिक्तासु = चतुर्थीनवमीचतुर्दशीषु । 'शुभानि कार्याणि चरस्थिराणि चोक्तान्यनुक्तान्यपि यानि तानि । सिद्धिं प्रयांत्याशु ऋणप्रदानं बिना सदा नागतिथौ विधेयम् ॥ ५ ॥ अभ्यंगयात्रापितृकर्म दन्तकाष्ठं विना पौष्टिकमंगलानि । षष्ठ्यां विधेयानि रणोपयोग्यशिल्पानि वास्त्वंबरभूषणानि ॥ ६ ॥ द्वितीयायां तृतीयायां पंचम्यां कथितान्यपि । तानि सिध्यंति कार्याणि सप्तम्यां निखिलान्यपि ॥ ७ ॥ संग्रामयोग्याखिलवास्तुशिल्प नृत्यप्रमोदाखिललेखनानि । स्त्रीरत्नकार्याखिलभूषणानि कार्याणि कार्याणि महे शतिथ्याम् ॥ ८ ॥ द्वितीयायां तृतीयायां पंचम्यां सप्तमीतिथौ । उक्तानि यानि सिध्यन्ति दशम्यां तानि सर्वदा ॥ ९ ॥ व्रतोपवासाखिलधर्मकृत्य सुरोत्सवाद्याखिलवास्तुकर्म । संग्रामयोग्याखिल-

वास्तु कर्म विश्वेतिथौ सिध्यति शिल्पकर्म ॥ १० ॥ पृथिव्यां यानि कर्माणि धर्मपुष्टिशुभानि च । चरस्थिराणि द्वादश्या यात्राऽन्नग्रहणं विना ॥ ११ ॥ विधातृ गौरीभुजगभान्वन्तकदिनेषु च । उक्तानि तानि सिध्यन्ति त्रयोदश्यां विशेषतः ॥ १२ ॥ यज्ञक्रियापौष्टिकमंगलानि संग्रामयोग्याखिलवास्तुकर्म । उद्वाहशिल्पाखिलभूषणाद्यं कार्यं प्रतिष्ठा खलु पौर्णमास्यम् ॥ १३ ॥ सदैव दर्शे पितृकर्म मुक्त्वा नान्यद्विधेयं शुभपौष्टिकाद्यम् मूढैः कृतं तत्र शुभोत्सवाद्यं विनाशमायात्यचिरादभृशं तत् ॥ १४ ॥' इति । ननु रत्नमालादिग्रन्थेष्वादौ संवत्सरप्रकरणमुक्तम् । तदत्र किमित्युत्प्रेक्षितमिति चेत् । उच्यते,—मुहूर्तचिंतामणिरिति नामधेयान्मुहूर्ता एवात्रोच्यंते । तेतु प्रतिक्षणंविचारार्हाः, तत्र संवत्सराणां वर्षव्यापित्वात् सदसत्फलोक्तावपि विवाहादिकृत्यानि भवंत्येव । कुतः सिंहराशिस्थितगुरु-गुरुशुक्रास्तादिष्विव विवाहादि-विशेषकृत्यानां प्रतिषेधसत्त्वं, तथा संवत्सरसदसत्फलेषु नेति । किंच सिंहगतगुरौ शुक्रास्तादावपि नित्यानां वस्त्रपरिधानादीनां नैमित्तिकानांच पुंसवनजातकर्मनाम-कर्मान्निप्राशनादिकर्मणां विहितत्वान्मुहूर्तविचारोऽस्त्येवेत्यतोऽकथनं संवत्सरप्रकरणस्य । अमुमेवाशयं मनस्यभिसंधाय मुहूर्तग्रन्थं परित्यज्य स्थलांतरे गुरुचारे वसिष्ठेन फलमुक्तम् ॥ ३ ॥

पीताम्बरा—प्रतिपद-द्वितीया आदि से लेकर शुक्ल पक्ष की पूर्णिमा और कृष्ण पक्ष की अमावस्या तक १५ तिथियों के स्वामी बताये जाते हैं । यथा—

प्रतिपद के स्वामी अग्नि देवता, द्वितीया के ब्रह्मा, तृतीया की पार्वती, चतुर्थी के गणेश, पञ्चमी के सर्प, षष्ठी के कार्तिकेय, सप्तमी के सूर्य, अष्टमी के भगवान् शङ्कर (शिव), नवमी की (जगदम्बा) श्रीदुर्गा, दशमी के यमराज, एकादशी के विश्वेदेव, द्वादशी के भगवान् विष्णु, त्रयोदशी के कामदेव, चतुर्दशी के पुनः शिव, पञ्चदशी तिथि अर्थात् शुक्ल पक्ष की पूर्णिमा, कृष्ण पक्ष की अमावस्या के स्वामी चन्द्रमा होते हैं । अमावास्या तिथि के स्वामी पितर भी कहे गये हैं ।

यहाँ पर अग्नि नाम की तिथि का यदि कहीं उल्लेख हो तो उसे प्रतिपद् तिथि, ब्रह्मा से द्वितीया तिथि इत्यादि सर्वत्र समझना चाहिए । इन तिथियों के अधिपति देवताओं का, ग्रन्थ में आगे स्थल-स्थल पर प्रयोजन आवेगा जैसे—किसी देवी-देवता की स्थापना कब किस तिथि में करनी चाहिए ? ऐसी शंका होने पर "स्वर्क्ष तिथिक्षणे वा" से जिस देवता की जो तिथि है उस तिथि में उस देवता की स्थापना शुभ होती हैं । जैसे यदि गणेश भगवान् की स्थापना करनी हो तो इनकी स्थापना के लिए चतुर्थी तिथि उत्तम होगी । यहाँ पर चतुर्थी तिथि रिक्ता तिथि होने से सदोष होते हुए भी गणेश देव की स्थापना के लिए यह निर्दोष है और उत्तम है ।

पन्द्रह तिथियों के क्रमशः स्वामी कहे गये हैं । मूल श्लोक की हिन्दी की ही तरह पीयूषधारा में भी मूल श्लोक की व्याख्या की गई है । साथ ही जिस नक्षत्र में जो कार्य करने को कहे गये हैं वह कार्य उस तिथि के देवता की तिथि में भी करने चाहिए । करण मूहूर्त्तों में भी ये कार्य सिद्धिकर होते हैं । जिस देवता का जो दिन है उस दिन में उस देवता की स्थापना शुभ है । नारद का मत है कि प्रतिपद में अग्निपूजा, द्वितीया में ब्रह्मा पूजा····दशमी मे यम पूजन, चतुर्थी में गणेश···इत्यादि की पूजा एवं प्रतिष्ठा होनी चाहिए ।

ग्रन्थ में प्रत्येक तिथि का कार्य विस्तार से नहीं है अतः पीयूषधारा ने उसे स्पष्ट किया है। जैसे—

१—प्रतिपद् तिथि में—विवाह, यात्रा, उपनयन, प्रतिष्ठा, सीमन्त, चौल और वास्तु-कर्म गृहप्रवेशादिक मंगल कार्य नहीं करने चाहिए।

२—द्वितीया में यात्रा विवाह भूषण, संगीत विद्या शिल्प आदिक कर्म करने चाहिए।

३—तृतीया में भी द्वितीया के कथित कार्य करने चाहिए।

४—चतुर्थी में विद्युत्कर्म, वध, बन्धन शस्त्र विष अग्निघातादि कार्य सिद्ध होते हैं।

५—पञ्चमी में द्वितीया तृतीया की तरह अनेक शुभ कर्म करने चाहिए।

६—षष्ठी में अभ्यंग, यात्रा, पितृ कर्म और दन्त काष्ठादि सञ्चय न करे।

७—द्वितीया, तृतीया, पञ्चमी के सभी शुभ कार्य सप्तमी में भी करने चाहिए।

८—संग्राम (युद्ध) वास्तु, शिल्प, राजप्रमोद, लेखन स्त्री रत्न, अखिल आभूषण····ये सब अष्टमी तिथि के कृत्य हैं।

९—नवमी में चतुर्थी की तरह।

१०—दशमी में द्वितीया, पञ्चमी, तृतीया, सप्तमी में कहे गये कार्य होने चाहिए।

११—व्रत उपवास, अनेक धर्मकृत्य, देवोत्सव उद्यापन कथा आदिक एकादशी में करने चाहिए।

१२—यात्रादिक को छोड़कर पुष्टिकारक अनेक सभी धर्म शुभ कार्य द्वादशी तिथि में भी करने चाहिए।

१३—द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी के कथित कार्य त्रयोदशी तिथि में भी करने चाहिए।

१४—चतुर्थी के कार्य चतुर्दशी में करने चाहिए।

१५—विवाह, शिल्प पौष्टिक, मंगल संग्राम, वास्तुकर्म, यज्ञ क्रिया, प्रतिष्ठा आदिक कार्य पौर्णमासी तिथि में करने चाहिए।

१६—अमावास्या में सदा पितृकर्म ही उचित होता है। अमावास्या के दिन किए गये शुभ कर्म सभी विनष्ट हो जाते हैं ॥३॥

अथ तिथीनां नंदादिसंज्ञाः सफला उपजातिकयाह—

नंदा च भद्रा च जया च रिक्ता पूर्णेति तिथ्योऽशुभमध्यशस्ताः।
सितेऽसिते शस्तसमाधमाः स्युः सितज्ञभौमार्किगुरौ च सिद्धाः ॥ ४ ॥

नंदा चेति ॥ नंदाभद्राजयारिक्तापूर्णासंज्ञाः प्रतिपदादिपंचतिथयः स्वनामसदृशफलदाः स्युरित्येवंप्रकारेण सर्वाः षष्ठ्यादय एकादश्यादयश्च तिथयो ज्ञेयाः। ताः सिते शुक्लपक्षे अशुभमध्यशुभफलदाः स्युः। असिते कृष्णपक्षे शुभमध्यमाधमफलदाः स्युः। यदाह **नारदः**:—'नंदाभद्राजयारिक्ता पूर्णाः स्युस्तिथयः पुनः। पर्यायत्वेन विज्ञेया नेष्टमध्येष्टदाः सिते ॥ कृष्णपक्षे-

ऽपीष्टमध्यनेष्टदाःक्रमशः स्मृताः' इति । अनिष्टमिति वक्तव्ये नेष्ट इति प्रयोगो निषेधवाचकं न शब्दमाश्रित्य नैकधेत्यादिवत् साध्यः । अथ मूले 'अशुभमध्यशस्ताः' इति कथं प्रयोगः ? यावता 'तिथयो द्वयोः' इत्यभिधानात् स्त्रीपुंसयोरस्ति तिथिशब्दः, तथापि तिथ्य इति 'कृदिकारादक्तिनः' इति कृतङीषस्तिथीशब्दस्य स्त्रीलिंग एव वृत्तिः । ततस्तिथ्य इति बहुवचनान्तस्याशुभमध्यशस्ता इति विशेषणे अशुभाश्चमध्याश्च द्वंद्वे 'स्त्रियाः पुंवत्' इति वा 'पुंवत् कर्मधारयजातीय–' इति वा समानाधिकरणोत्तरपदाभावात्पुंवद्भावाभावे चिंत्यताप्रसक्तेः । एवं चेत् कथं तर्हि रत्नमालायां 'कनिष्ठमध्येष्टफलाश्च शुक्ले' इति ? यावता कनिष्ठाश्च मध्याश्चेष्टफलाश्चेति द्वंद्वेऽपि । 'नंदा च भद्रा च जया च रिक्ता पूर्णेति सर्वास्तिथयः' क्रमात्स्युः' इति सर्वपदविशेषणसामर्थ्यात्स्त्रीलिंग एवेत्युक्तदोषप्रसंगः । मैवं वोचः । नात्र द्वंद्वः । किं तर्हि ? कनिष्ठं च मध्यं चेष्टं च कनिष्ठमध्येष्टानि, तादृशानि फलानि यासां ता इति द्वंद्वगर्भबहुव्रीह्याश्रयणादुक्तदोषाप्रसंगः । ननु यद्यप्येवमत्र समाहितं तथापि—'कृष्णे भवंत्युत्तममध्यहीनाः' इति चतुर्थचरणे कथं समाधिः ? यतः फलपदाश्रवणाद्द्वंद्वगर्भबहुव्रीह्यभावाच्छुद्धो द्वंद्व एव समासः । सर्वापदसमभिव्याहृतस्तिथिशब्दोऽपि स्त्रीलिंग एवेत्युक्तो दोषो वज्रायितः । उच्यते—यथा 'द्व्येकयोर्द्विवचनैकवचने' इति पाणिनिसूत्रस्थे द्व्येकयोरिति पदे संख्यावाचिनोर्द्व्येकशब्दयोर्द्वन्द्वे बहुवचनप्रसंगः, अतो भावप्रधानो निर्देश इत्यभियुक्तस्मरणात् बहुधा काव्येषु दृष्टत्वाच्चाशुभमध्यशस्ता इत्येवमादीनां भावप्रधानत्वादशुभत्वमध्यत्वशस्ताभिधानात्तादृशानां शब्दानां द्वंद्वं विधायाशुभमध्यशस्तानि विद्यंते यासां ता इति बहुव्रीहिणा सिद्धमिष्टम् । बहुव्रीहिणा गतार्थत्वान्मतुपन भवति, 'उक्तार्थानामप्रयोगः' इत्युक्तेः । अथवा 'तुष्यतु दुर्जनः' इति न्यायमाश्रित्य मतुपो बाधकः 'अर्शआदिभ्योऽच्' ईत्यर्शआदेराकृतिगणत्वान्मत्वर्थेऽच् कार्यः । एतच्च समाधानं शस्तसमाधमा इत्यत्रापि द्रष्टव्यम् । एवं च सति 'कृष्णे भवंत्युत्तममध्यहीनाः' इत्यपि सिद्धम् । अत एव **नैषधीये** सप्तमसर्गे 'येयं भवद्भाविपुरंध्रिसृष्टिः' इति प्रयुक्तम् । 'द्रुतमध्यविलंबितासु वृत्तिषु' इति महाभाष्यकारो जगाद । अतोऽनेनैवाशयेन–'उभयेऽधममध्यमपूजिता द्रेष्काणैश्चरभेषु चेत्क्रमात् । अशुभेष्टसमाः स्थिरे क्रमाद्धोरायाः परिकल्पिता दश ।' इति वराहमिहिरोऽपि प्रायुंक्त । तथा–सूर्यसूनुदिवसे स्थिरप्रदम्' इति वसिष्ठोऽपि प्रायुंक्त । स्थिरप्रदमित्यत्र स्थैर्यप्रदमित्यर्थो विवक्षित इत्यलमतिप्रसंगेन । अथ चतुर्थचरणेन सिद्धियोगादाह—सितेति । ताः कृतसंज्ञा नंदादितिथ्यः शुक्रबुधमंगलशनिगुरुवारेषु सिद्धाः सिद्धिकराः स्युः । यथा–नंदा शुक्रे सिद्धियोगः, एवं भद्रा बुधे, जया भौमे, रिक्ता शनौ, पूर्णा गुरौ । यदाह कश्यपः–'नंदा तिथिः शुक्रवारे सौम्ये भद्रा कुजे जया । रिक्ता मंदे गुरोर्वारे पूर्णा सिद्धाह्वया तिथिः ।' इति वसिष्ठोऽपि—'शुक्रज्ञगुरुमंदेज्या वारा नंदादिषु क्रमात् । सिद्धा तिथिः सिद्धिदा स्यात्सर्वकार्येषु सर्वदा ।' इति । अस्याः फलस्तुतिमाह वसिष्ठ एव—'सिद्धा तिथिर्हंति समस्तदोषान् यामासशून्यानपि मासदग्धान् । दिनप्रदग्धानपि चान्यदोषानेकादशी यद्वदशेषपापान् इति ॥४॥

पीताम्बरा—कृष्ण एवं शुक्ल दोनों पक्षों में पन्द्रहों तिथियों में, प्रतिपत् षष्ठी एकादशी (१।६।११) इन तीनों तिथियों का एक नाम नन्दा है । इस प्रकार द्वितीया, सप्तमी, द्वादशी (२।७।१२) का नाम भद्रा, तथा तृतीया, अष्टमी, त्रयोदशी (३।८।१३) का नाम जया तथा

चतुर्थी नवमी चतुर्दशी (४।९।१४) का नाम रिक्ता एवं पञ्चमी, दशमी, पूर्णिमा, या अमावास्या (५।१०।१५ या ५।१०।३०) का नाम पूर्णा है।

इन तिथियों का जैसा नाम है उसी अर्थ में इनका फल भी होता है। जैसे रिक्ता तिथियों (४।९।१४) में शुभ कार्य शुभफलद नहीं होते और पूर्णा नामक तिथियों (५।१०।१५ या ३०) में शुभ कार्य करने से पूर्ण शुभफल होता है।

शुक्ल पक्ष में ये तिथियाँ प्रतिपद् से पञ्चमी तक अशुभ कही गई हैं। इसलिए कि अमावास्या के दिन चन्द्रमा (अस्त) लुप्त होकर शुक्ल पक्ष द्वितीया के दिन सायं थोड़ा सा सूर्यास्त के बाद दिखाई देते हुए धीरे-धीरे शुक्ल पक्ष की पञ्चमी तक कुछ अधिक दिखाई देता है, अतः शुक्ल पक्ष पञ्चमी तक चन्द्रमा की कलाएँ क्षीण रहने से शुक्ल पक्ष की प्रतिपद् द्वितीया तृतीया चतुर्थी और पञ्चमी तिथियाँ अशुभ-सी कही जाती हैं।

पुनः शुक्ल पक्ष की षष्ठी से दशमी तक चन्द्रमा की कलाएँ ज्यों-ज्यों बढ़ती हैं त्यों-त्यों ये षष्ठी सप्तमी अष्टमी नवमी और दशमी तिथियाँ अशुभ न होकर पूर्ण शुभ भी नहीं हैं। अर्थात् मध्यम श्रेणी की शुभफलद कही जाती हैं।

तदनन्तर शुक्ल पक्ष की एकादशी द्वादशी त्रयोदशी चतुर्दशी और पौर्णमासी को चन्द्रमा पूर्ण कलाओं से युक्त रहता है अतः शुक्ल पक्ष की एकादशी से पूर्णिमा तक की ये पाँच तिथियाँ उत्तम शुभफलद कही जाती हैं।

इसी प्रकार कृष्णपक्ष प्रतिपद से कृष्णपक्ष पञ्चमी तक चन्द्रमा की अपनी अधिक कलाओं से दृष्ट होने से ये पाचों तिथियाँ भी उत्तम शुभ फल देनेवाली कही गई हैं।

फिर चन्द्रमा षष्ठी से क्षीण होने लगता है इसलिए कृष्णपक्ष की क्षीण षष्ठी सप्तमी, अष्टमी, नवमी और दशमी ये तिथियां मध्यम फल देने वाली तथा कृष्णपक्ष एकादशी से कृष्णपक्ष अमावास्या तक की पाँचों तिथियाँ चन्द्रमा के पूर्ण क्षीण हो जाने से अधम (अशुभ-फलद) कही गई हैं।

अर्थात् सामान्यतः शुक्ल पक्ष पञ्चमी से कृष्ण पक्ष चतुर्थी तक की १५ तिथियाँ शुभ, कृष्ण पक्ष पञ्चमी से शुक्ल पक्ष चतुर्थी तक की १५ तिथियाँ प्रायः मध्यम फल की समझी जानी चाहिए।

शुक्रवार के दिन नन्दा तिथियाँ १।६।११, बुधवार के दिन भद्रा तिथियाँ २।७।१२, मंगल वार के दिन जया तिथियाँ ३।८।१३-शनिवार को रिक्ता तिथियाँ ४।९।१४–और गुरुवार को पूर्णा तिथियाँ ५।१०।१५ हों तो उस दिन सिद्धि योग होता है।

यहाँ पर तिथि और वार के सम्बन्ध से अशुभ तिथियाँ और भी शुभ हो जाती है। जैसे शनिवार पापग्रह का अशुभ फलद वार तथा रिक्ता तिथि जैसे चतुर्थी––अशुभ फलदा है लेकिन शनिवार के दिन की रिक्ता तिथि से सिद्ध योग की उत्पति शुभ फलद होती है पीयूष-धारा में यही आशय वशिष्ठ मुनि ने भी स्पष्ट किया है।

इस सिद्ध तिथि का फल भी "वशिष्ठ" ने बताया है––

अर्थात् जिस प्रकार एकादशी तिथि व्रत उपवास दान पूजा व्रत कथा उद्यापन आदि

शुभ कर्माचरण से समस्त पापों का क्षय करती हैं वैसे ही उक्त सिद्ध तिथियाँ मासशून्य, मासदग्ध, आदि लग्नदोषों तक को दूर कर शुभ फल देती हैं॥ ४ ॥

अथ रव्यादिवारेषु यथाक्रमं निषिद्धतिथीन्निषिद्धनक्षत्राणि च शालिन्याह––

नंदा भद्रा नंदिकाख्या जया च रिक्ता भद्रा चैव पूर्णा मृतार्कात् ।
याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठार्यम्णं ज्येष्ठांत्यं रवेर्दग्धभं स्यात् ॥ ५ ॥

पीयूषधारा––नन्देति ॥ यथाक्रममर्कात् 'ल्यब्लोपे पंचमी' इति अर्कमारभ्य वारेषु नंदातिथिर्मृताधमफला स्यात् । तथा सूर्ये नंदा मृता, तथा सोमे भद्रा, भौमे, नन्दा बुधे जया, गुरौ रिक्ता, शुक्रे भद्रा, शनौ पूर्णा मृतेत्यर्थः ॥ उक्तं च नारदेन––'आदित्यभौमयोर्नंदा भद्रा शुक्रशशांकयोः, जया सौम्ये गुरौ रिक्ता शनौ पूर्णा मृतिप्रदा ॥' इति । अत्र बहुषु नारदसंहितापुस्तकेषु 'मृतिप्रद' इति पाठमाश्रित्य मृतेति पदं प्रायोजि ग्रंथकृता । तथैवास्माभिर्व्याकृतं च सकलदेशीयशिष्टासंमतत्वादापामरं तथैव व्यवहारदर्शनाच्च । वस्तुतस्तु 'पूर्णा मृतार्कात्' इत्यत्र अकारं प्रश्लिष्य अमृतेति पदं विधेयम् । तत्रामृता अमृतफलदा स्यात् । यथा-नंदा रवावमृता, एवं सोमवारादिष्वपि व्याख्येयं पूर्ववत् । अत्र संमतिरूपे जीर्णपुस्तकस्थनारदवाक्ये––'शनौ पूर्णाऽमृताह्वया' इत्यकारादिराकारांतः पाठ साधीयान् । अमृतेत्याह्वयं नाम यस्याः सा अमृताह्वयेत्यर्थः । इममर्थं सफलमाह वसिष्ठः––'नंदा भौमार्कयोर्भद्रा शुक्रेंद्वोश्च जया बुधे । शुभयोगा गुरौ रिक्ता शनौ पूर्णाऽमृताह्वया ।" इति । इदं वचनं वसिष्ठेन गुणीरूपणाध्याये निरूपितमित्यतोऽपि शुभत्वप्रतिपादकम् । कश्यपोऽपि तथैवाह––'आदित्यभौमयोर्नन्दा भद्रा शुक्रशशांकयोः । जया सौम्ये गुरौ रिक्ता पूर्णाऽऽर्कावमृता शुभा ॥' इति । आर्की=शनौ । एवं सत्यपि शुभत्वे शिष्टाचारे व्यवस्था ज्ञेया । अथोत्तरार्धेन दिग्धनक्षत्राण्युच्यन्ते––याम्यमिति । रविवारादिषु याम्यं भरणी तदादीनि नक्षत्राणि यथाक्रमं दग्धनक्षत्राणि स्युः । तथा रवौ भरणी दग्धा, सोमे चित्रा, भौमे उत्तराषाढ़ा, बुधे धनिष्ठा, गुरावुत्तराफल्गुनी, शुक्रे ज्येष्ठा, शनौ रेवती । यदाह नारदः––'यमर्क्षमर्कवारेऽब्जे चित्रा भौमे तु विश्वभम् । बुधे श्रविष्ठर्यम्णर्क्षं गुरौ ज्येष्ठा भृगोर्दिने ॥ रेवती शनिवारे तु दग्धयोगा भवंत्यमी ॥' इति लल्लः––'याम्यं चित्रोत्तराषाढ़ा धनिष्ठोत्तरफाल्गुनी । ज्येष्ठा च रेवती चैव जन्मर्क्षं भानुतः क्रमात् ॥ जन्मर्क्षग्रहसंयोगे न कुर्याच्छोभनं नरः । पाणिग्रहणयात्रादिविनाशमुपयात्यतः ॥" इति ॥ ५ ॥

पीताम्बरा––सूर्यादिक वारों में अमृत और दग्ध संज्ञक तिथियों को बताया जा रहा है । जैसे––

रविवार के दिन नन्दातिथियाँ, चन्द्रवार के दिन भद्रा, मंगल को नन्दा, बुध के दिन जया, वृहस्पति के दिन रिक्ता, शुक्र के दिन भद्रा तिथियाँ और शनिवार के दिन पूर्णा तिथियाँ अमृत तिथि योग बनाती हैं ।

तथा रविवार को भरणी नक्षत्र, सोमवार को चित्रा, मंगल में उत्तराषाढ़ा, बुध को धनिष्ठा, वृहस्पतिवार के दिन उत्तराफाल्गुनी, शुक्र को ज्येष्ठा और शनिवार के दिन रेवती नक्षत्र होने से दग्धनक्षत्र संज्ञक योग होता है ।

अर्थात् सूर्यादिवार के दिन, कथित तिथियों के सम्बन्ध से शुभ अमृत तिथि योग तथा सूर्यादिवार के दिन, उक्त कथित नक्षत्र योग से अशुभ दग्ध नक्षत्र योग होता है ।

पीयूषधारा में "नारद" के "सूर्ये नन्दा तथा सोमे भद्रा भौमे नन्दा बुधे जया, गुरौ रिक्ता, शुक्रे भद्रा, शनौ पूर्णामृतेत्यर्थः" इस वचन से इस सही अमृतयोग को कुछ लोग मृतयोग बताने की अनुचित चेष्टा करते हैं। शनौ पूर्णामृतेत्यर्थः में सही पाठ नहीं समझ कर गलत अर्थ करते हैं। पूर्णामृतेत्यर्थः में पूर्णा-अमृत इत्यर्थः, सन्धि से स्पष्ट अर्थ अमृत तिथियोग ही होता है। इस सही अमृत योग के लिए प्रमाणीभूत पीयूष के कश्यप वाक्य से भी अत्यन्त पुष्टि होती है कि उक्त तिथि-वार सम्बन्ध से अमृतयोग ही होता है न कि मृतयोग। ऐसे सुन्दर स्पष्ट प्रमाणवाक्यों की सम्यगुपलब्धि होते हुए भी उक्त अमृतयोग को जो मृतयोग कहते हैं तो उन्हें ज्ञानमृत ही समझा जावेगा। कश्यप वाक्य—

यथा—आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः।
जया सौम्ये गुरौ रिक्ता पूर्णार्काविमृता शुभा" ॥

यहाँ पर व्याकरण शास्त्र के सन्धि नियम से पूर्णार्काविमृता से—"पूर्णा-आर्कौ-अमृता" अर्थात् अर्क पुत्र अर्थात् आर्कि शनिवार के दिन पूर्णा तिथि होने से अमृतयोग ही होता है, अति स्पष्ट है ॥ ५ ॥

अथ क्रकचादिनिंद्ययोगाननुष्टुभाह—

षष्ठ्यादितिथयो मन्दाद्विलोमं प्रतिपद्बुधे।
सप्तम्यर्केऽधमाः षष्ठ्याद्यामाश्च रदधावने ॥ ६ ॥

पीयूषधारा—षष्ठ्यादीति।—षष्ठीसप्तम्यष्टमीनवमीदशम्येकादशीद्वादश्यस्तिथयो मन्दाच्छनैश्चराद्विलोम विपरीतवारगणनयाऽधमाः स्युः। यथा—शनौ षष्ठ्यधमा, शुक्रे सप्तमी, गुरावष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी। एते योगाः क्रकचाख्या ज्ञेयाः। यदाह नारदः—'त्रयोदश स्युर्मिलने संख्यायास्तिथिवारयोः। क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः ॥' इति। अथ बुधे प्रतिपत्तिथिस्तथा सूर्यवारे सप्तमी संवर्तयोगाख्याऽधमा। उक्तं च नारदेन—'सप्तम्यामर्कवारश्चेत्प्रतिपत्सौम्यवासरे। संवर्तयोगो विज्ञेयः शुभकर्मविनाशकृत् ॥' इति। अथ षष्ठी, आद्या प्रतिपत्, अमा अमावास्या एतास्तिथयो रदधावने निम्बकाष्ठादिभिर्दन्तमलनिराकरणेऽधमा निषिद्धाः स्युः। उक्तं च रत्नमालायाम्—'नष्टेन्दुषष्ठी प्रतिपत्सु धीमान्न जातु दन्तोत्कषणं विदध्यात्। कुर्वन्नवाप्नोति तदाशु नूनं लक्ष्मीकुलज्ञातिजनोपघातम् ॥' इति। क्वचिन्नवमीरविवासरेऽपि निषिद्धा। उक्तं च काशीखण्डे पञ्चत्रिंशाध्याये—'प्रतिपद्दर्शषष्ठीषु नवम्यां रविवासरे। दन्तानां काष्ठसंयोगो दहेदासप्तमं कुलम् ॥' इति ॥६॥

पीताम्बरा—क्रकच आदिक निन्दितयोग बताए जा रहे हैं—

शनिवार को षष्ठी तथा शनिवार से विपरीत वार शुक्र, बृहस्पति, बुध, मंगल, सोम, और रवि दोनों पक्षों की तथा षष्ठी से आगे की सप्तमी, अष्टमी इत्यादि अर्थात् बुधवार को नवमी, मंगल को दशमी, सोम को एकादशी और रविवार को द्वादशी इस प्रकार की इन वार और तिथियों के सम्बन्ध से अधमयोग होता है। तथा पीयूषधारा में इस योग का नाम "क्रकच" योग भी कहा गया है। बुधवार के दिन की प्रतिपदा और रविवार के दिन की सप्तमी से भी अधमयोग होता है। इसे "पीयूष" में संवर्तकयोग भी कहा है।

नित्य दन्तधावन (दतौन) करने का नियम होते हुए भी षष्ठी, प्रतिपदा और अमावास्या में दन्तधावन (दतौन) करने का निषेध है।

उक्त तिथियों में दतौन करने के लिए नीम आदि लकड़ी के दतौन का निषेध कहा गया है। इससे स्पष्ट होता है कि उक्त तिथियों में मञ्जन आदि से तो दांत साफ करना ही चाहिए।

यह विषय प्रायः लकड़ी संग्रह से भी सम्बन्ध रखता है। काशीखण्ड के ३५ वें अध्याय में प्रतिपद्, अमावास्या, षष्ठी और नवमी तिथियों एवं रविवार के दिन काष्ठ-संयोग (लकड़ी संचय) करने से सात कुल तक के लिये भयंकर भय की सूचना दी गई है। "पीयूष" में ये विषय स्पष्ट किए गए हैं ॥ ६ ॥

अथ कृत्यविशेषेषु निषिद्धतिथीनिन्द्रवंशाछन्दसाह—

षष्ठ्यष्टमीभूतविधुक्षयेषु नो सेवेत ना तैलपले क्षुरं रतम्।
नाभ्यञ्जनं विश्वदशद्विके तिथौ धात्रीफलैः स्नानममाद्विगोष्वसत् ॥ ७ ॥

पीयूषधारा—षष्ठ्यष्टमीत्यादि। षष्ठी, अष्टमी च प्रसिद्धा भूतश्चतुर्दशी, विधुक्षयोऽमावास्या एतासु तिथिषु क्रमेण ना पुरुषः तैलं, पलं मांसं, क्षुरं रतं मैथुनं, यथाक्रमं न सेवेत। यथा षष्ठ्या तैलं, अष्टम्यां मांसं, चतुर्दश्यां क्षौरं, अमावास्यायां मैथुनं, नो सेवेतेत्यर्थः। 'षेवृ सेवने' आत्मनेपदी। नृशब्दो मनुष्यजात्युपलक्षकस्तेन स्त्रीणामप्ययं निषेधः। उक्तं च नारदेन— 'षष्ठ्यां तैलं तथाऽष्टम्यां मांसं क्षौरं तिथौ कलेः। पूर्णिमादर्शयोर्नारीसेवनं परिवर्जयेत् ॥' इति। कलेस्तिथौ चतुर्दश्याम्। रत्नमालायां च—'षष्ठीषु तैलं पलमष्टमीषु क्षुरक्रिया चैव चतुर्दशीषु। स्त्रीसेवनं नष्टकलासु पुंसामायुःक्षयार्थं मुनयो वदन्ति ॥' अत्र वचने नष्टकलास्विति वचनमाश्रित्य विधुक्षयेष्वित्युक्ता वयं तु विधुक्षयशब्दः पक्षसर्वपर्वोपलक्षक इति व्याकुर्मः। तथा सति पञ्चपर्वसु मैथुनं न कार्यमित्यर्थः। उक्तं च वसिष्ठसंहितायाम्—'स्त्रीसेवनं पर्वसु पक्षमध्ये पलं च षष्ठीषु च सर्वतैलम्। नृणां विनाशाय चतुर्दशीषु क्षुरक्रिया स्यादसकृत्तदाशु ॥' इति। पक्षमध्येऽष्टम्यां क्वचित्संक्रात्यादावपि तैलाभ्यङ्गो निषिद्धः। यदाह नारदः—'व्यतीपाते च संक्रान्तावेकादश्यां च पर्वसु। अर्कभौमदिने विष्ट्यां नाभ्यङ्गं न च वैधृतौ ॥' इति। पर्वाणि तु वसिष्ठेनोक्तानि—'चतुर्दश्यष्टमी कृष्णा त्वमावास्या च पूर्णिमा। पुण्यानि पञ्च पर्वाणि संक्रान्तिदिनपस्य च ॥' इति। अत्र निषिद्ध कर्मसु तात्कालिक्यस्तिथयो ग्राह्याः। तथा च स्मृतिः— 'स्नाने चाभ्यञ्जने चैव दन्तधावनमैथुने। तिथिस्तात्कालिकी ग्राह्या तथा मरणजन्मनोः ॥' इति। अथ विश्वदशद्विके तिथौ त्रयोदशीदशमीद्वितीयास्वभ्यञ्जनं न तैलाभ्यङ्गो न कार्य इत्यर्थः तदुक्तं रत्नमालायाम्—स्नातुर्जनस्य दशमी तनयांस्त्रयोदश्यर्थं निहन्त्युभयमेतदपि द्वितीया' इति। अयं च शरीरमलनिराकरणार्थं निषेधो नित्यनैमित्तिककाम्यांव्यतिरिक्तविषयः। निर्णयामृते द्वितीयातिथिनिर्णये भट्टभास्कर इत्युक्त्वा पठितम्—'स्नातुस्तनूजान् दशमी त्रयोदश्यर्थं द्वितीया द्वितयं निहन्ति। मलापहस्नाननिषेधो एव न नित्य नैमित्तिक काम्य बाधः एतादृशोपि मलापहस्नान निषेधो ब्राह्मणव्यतिरिक्तवर्णत्रयस्यैव। उक्तं च भट्टभास्करेण—'त्रयोदश्यां द्वितीयायां दशम्यां च विशेषतः। शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन।' इति। अर्थात् ब्राह्मणस्य नायं निषेध इत्यर्थः। अथ धात्रीफलैरामलकैः स्नानममाद्विगोष्वसत् अमावास्या सप्तमी नवमीषुसत्तन्निषिद्ध मित्यर्थः।

उक्तं च रत्नमालायाम्—'सप्तम्यनिदुनवमीषु च सम्पदिच्छुः स्नायात्कदाचिदपि नामलकैर्मनुष्यः।' अत्र केचिदामलकैः स्नातुर्दशमी तनयान्निहन्ति। एवं सर्वत्र व्याख्येयम्। एवं सति दशमीद्वितीयात्रयोदशीसप्तम्यनिदुनवमीष्वामलकस्नाननिषेधोऽस्ति तत्कथं भिन्नवाक्यतामादाय ? स्वपद्ये स्पष्टैव भिन्नवाक्यता कृता। अत्राहुः—स्नातुस्तनूजानन्दशमीति वचनांतरातो धाद्भिन्न वाक्यता स्पष्टैव। तथा च आमलकस्नाननिषेधो दीपिका टीकायां स एव भट्टभास्करः—'सप्तम्यचन्द्रानवमीषु देहश्रीसन्ततीरामलकैर्नरस्य। स्नानं निहन्त्यन्यदिने तु धत्ते तिलैः प्रियं पुण्यकरं सदैव॥' इत्याहऽस्म। अपरे पुनराहुः सर्वास्वपि तिथिष्वामलकस्नानस्यैव निषेधो नाभ्यंगस्य। यदाह वसिष्ठः—'कामदुर्गान्तकविधिनष्टेन्द्वर्कदिनेषु च। सकृदामलकस्नानं सम्पत्पुत्रविनाशनम्॥' कामस्त्रयोदशी, दुर्गा नवमी, अन्तको दशमी, विधिर्द्वितीया, नष्टेंदुरमावास्या[१] अर्कदिनं सप्तमी। कश्यपोऽपि—'षष्ठ्यां दर्शप्रतिपदि द्वादश्यां च दिनक्षये। कुर्यादामलकस्नानं दशम्यां मूढधीर्नरः॥' पुत्रनाशो भवेत्तस्य त्रयोदश्यां धनक्षयः। सम्पत्पुत्रक्षयस्तस्य द्वितीयायामसंशयम्॥ सप्तम्यां च नवम्यां च अमायां कुलनाशनम्' इति। दर्शानन्तरं प्रतिपद्दर्शप्रतिपच्छुक्लप्रतिपदित्यर्थः॥ ७॥

पीताम्बरा—स्त्री और पुरुष दोनों के लिए ये नियम हैं कि उन्हें षष्ठी तिथि को तेल, अष्टमी में मांस, चतुर्दशी के दिन क्षौर क्रिया, (हजामत, बाल कटवाना दाढ़ी बनवाना आदि) अमावास्या तिथि में मैथुन (स्त्रीसंगम) नहीं करना चाहिए।

तथा द्वितीया दशमी और त्रयोदशी तिथियों में उबटन नहीं लगाना चाहिए।

तथा सप्तमी, और अमावास्या को आंवले के उबटन आदि से स्नान नहीं करना चाहिए।

कहीं-कहीं पर व्यतीपात, संक्रान्ति, एकादशी में, पर्व-दिनों में, भद्रा और वैधृतियोग के दिन भी तैलाभ्यङ्ग का निषेध कहा गया है। कृष्णपक्ष की चतुर्दशी, अष्टमी, अमावास्या, शुक्ल पूर्णिमा और सूर्यसंक्रान्ति इन पांच दिनों की पर्व संज्ञा है।

यहाँ पर मान लीजिए षष्ठी तिथि किसी दिन प्रातः सूर्योदय से १ ही घण्टा (२ घटी ३० पल) है उसके बाद सप्तमी लग जाती है तो सप्तमी में तेल मालिश आदि के बाद स्नान किया जा सकता है। क्योंकि स्नान; अभ्यञ्जन, दन्तधावन, मैथुन, जन्म और मरण के समय के लिए तात्कालिक तिथि ही ग्रहण करनी चाहिए। औदयिक (उदयकालिक) तिथि का प्रयोजन इन जगहों पर नहीं है॥७॥

अथ सूर्यादिवारेषु दग्धादियोगचतुष्टयमिन्द्रवज्रोपजातिकाभ्यामाह—

सूर्येशपञ्चाग्निरसाष्टनन्दा वेदाङ्गसप्ताश्विगजाङ्कशैलाः।
सूर्याङ्गसप्तोरगगोदिगीशा दग्धा विषाख्याश्च हुताशनाश्च॥ ८॥
सूर्यादिवारे तिथयो भवन्ति मघाविशाखाशिवमूलवह्निः।
ब्राह्मं करोऽर्काद्यमघण्टकाश्च शुभे विवर्ज्या गमने त्ववश्यम्॥ ९॥

पीयूषधारा—सूर्येशेति। सूर्यो द्वादश लक्षणया यावत्संख्या द्वादश्युच्यते। एवमीशादिशब्देष्वपि व्याख्येयम्। तत्र सूर्यो द्वादशी, ईशा एकादशी, पञ्च पञ्चमी, अग्नयस्तृतीया, रसाः षष्ठी, अष्ट अष्टमी, नन्दा नवमी, सूर्यादिवारेष्वेतास्तिथयो दग्धा भवन्ति। यथा–रवौ द्वादशी दग्धा,

सोमे एकादशी दग्धा, भौमे पञ्चमी, बुधे तृतीया, गुरौ षष्ठी, शुक्रे अष्टमी, नवमी शनौ, शनिरिक्त-सिद्धियोगास्त्वतुर्थीचतुर्दश्योश्चरितार्थः[1]। उक्तं च नारदेनोपग्रहाध्याये-'एकादशी चेन्दु-वारे द्वादशी चार्कवासरे। षष्ठी बृहस्पतेर्वारे तृतीया बुधवासरे ॥ अष्टमी शुक्रवारे च नवमी शनिवासरे। पंचमी भौमवारे च दग्धयोगाः प्रकीर्तिताः' ॥ वसिष्ठोपि-'द्वादश्येकादशीनागगौरी-स्कन्दवसुष्वपि। नवम्यां दग्धयोगाख्या भानुवारादितः क्रमात्' ॥

विषयोगाः—

अथ विषयोगाः। वेदेति। वेदाश्चतुर्थी, अङ्गानि षष्ठी, 'सप्त-सप्तमी, अश्विनौ द्वितीया, गजा अष्टमी, अङ्का नवमी, शैलाः सप्तमी एतास्तिथयः सूर्यादिवारेषु विषाख्या भवन्ति। यथा—रवौ चतुर्थी विषाख्या, चद्रे षष्ठी, भौमे सप्तमी, बुधे द्वितीया। बुधे भद्रारूपः। सिद्धि-योगास्तु सप्तमीद्वादश्योश्चरितार्थः। गुरावष्टमी, शुक्रे नवमी, शनौ सप्तमी। यदाह बृहस्पतिः— 'षष्ठी शशांके नवमी च शुक्रे बुधे द्वितीया तपने चतुर्थी। जीवेऽष्टमी सौरिकुजेऽह्नि सप्तमी योगा विषाख्या कुलनाशनाः स्युः ॥' वसिष्ठोऽपि—'कुजार्क्योः सप्तमी षष्ठी चन्द्रे भानौ चतुर्थिका। द्वितीया ज्ञेऽष्टमी जीवे नवमी शुक्रवासरे ॥ अचिकित्स्या गदा योगा मङ्गलेष्वेव निन्दिताः'।

हुताशनयोगाः—

अथ हुताशनयोगाः। सूर्येति। सूर्याः द्वादशी, अङ्गानि षष्ठी, सप्त सप्तमी, उरगा अष्टमी, गावो नवमी, दिशो दशमी, ईशा एकादशी। एतास्तिथयो रविवारादिषु हुताशानाख्या ज्ञेयाः। यथा रवौ द्वादशी, सोमे षष्ठी, भौमे सप्तमी, बुधेऽष्टमी, गुरौ नवमी, शुक्रे दशमी, शनौ एकादशी हुताशनाः। यथा हुताशनो निक्षिप्तं वस्तु दहति तथायमुक्तो वारतिथियोगोऽपीत्यर्थः। यदाह गुरुः—'षष्ठ्यादितिथयः सप्त चन्द्रवारादिभिर्युता। क्रमात्पक्षद्वयेऽपि स्युः सप्तयोगा हुताशनाः ॥' इति। वसिष्ठोपि—'सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः। अग्निजिह्वाः सप्त योगा मङ्गले कुल-नाशनाः ॥' इति।

यमघण्टयोगा—

अथ यमघण्टः—मघा, विशाखा, शिव आर्द्रा, मूलं, वह्निः कृत्तिका। समाहार द्वंद्वः। ब्राह्मं रोहिणी, करो हस्तः एतानि नक्षत्राण्यर्कात्सूर्यादिवारेषु यमघण्टाः स्युः। यथ-रवौ मघा यमघण्टः, सोमे विशाखा, भौमे आर्द्रा, बुधे मूलं, गुरौ कृत्तिका, शुके रोहिणी, शनौ हस्तः। उक्तं च दैवज्ञमनोहरे गर्गेण—'मघाविशाखा चार्द्रा च मूलमृक्षं च कृत्तिका। रोहिणी हस्त इत्येवं यमघण्टाः क्रमाद्रवेः ॥' इति। अयं पाठः साधीयान्। प्राक्पाठे हि कतिचिन्नक्षत्राणि पूर्वार्धे द्वे तूत्तरार्ध इत्यसामञ्जस्यात्। एते दग्धादियोगाः शुभे शुभकार्ये विवर्ज्यास्त्याज्याः। तुविशेषे। गमने यात्रायां त्ववश्यं वर्ज्याः। यदाह मार्तण्डः—नात्र यात्रा प्रकर्तव्या कार्यान्तरम-थापि वा। यमघण्टादियोगोऽयमनर्हः सर्व-कर्मसु ॥' इति।

१—'सामान्यशास्त्रतो नूनं विशेषो बलवान् भव—' दित्युक्तत्वात्।

दुर्योगापवादः—

आवश्यकत्वेन यमघण्टपरिहारमाह गर्गः।—'विंध्यस्योत्तरभागे तु यावदातुहिमाचलम् । यमघण्टकदोषोस्ति नान्यदेशे कदाचन ॥' इति । अन्यच्च-'लग्नाच्छुभग्रहः केन्द्रे त्रिकोणेऽवस्थितो यदि । चन्द्रो वापि न दोषः स्याद्यमघण्टकसम्भवः ॥' इति । कैश्चिदष्टौ घटिकास्त्याज्या इत्युक्तम् । तदुक्तं दीपिकायाम्–'यमघण्टे त्यजेदष्टौ मृत्यौ द्वादश नाडिका' इति । अत्रैषां पापयोगानामपवादो वसिष्ठेनोक्तः—'दिवा मृत्युप्रदाः पापा दोषास्त्वेतेन न रात्रिषु । शुभकार्य-प्रसूतौ च सर्वदा परिवर्जयेत् ॥' ॥ ८ ॥ ९ ॥

पीताम्बरा—सूर्यादिक वारों में दग्ध, विष और हुताशन योग बताये जाते हैं—

सूर्यवार को द्वादशी, सोमवार को एकादशी, मङ्गल को पञ्चमी, बुध को तृतीया, वृहस्पतिवार को षष्ठी, शुक्रवार को अष्टमी और शनिवार को नवमी होने से दग्धयोग होता है।

तथा रवि को चतुर्थी, सोम को षष्ठी, मंगल की सप्तमी, बुध को द्वितीया, गुरुवार को अष्टमी, शुक्रवार को नवमी और शनिवार को सप्तमी होने से विषयोग होता है।

एवं रविवार की द्वादशी, चन्द्रवार की षष्ठी, मंगल की सप्तमी, बुध की अष्टमी, वृह-स्पतिवार की नवमी, शुक्र की दशमी और शनिवार की एकादशी तिथि में हुताशनयोगहोता है।

साधारण शुभ में वर्जित किन्तु यात्रा में तो अवश्य वर्जित करने के लिए यमघण्टयोग बताया जाता है, जो वारों और नक्षत्रों के सम्बन्ध से होता है। जैसे—रवि को मघा, सोम को विशाखा, मंगल को आर्द्रा, बुध को मूल, गुरु को कृतिका, शुक्र के दिन रोहिणी और शनिवार को हस्त नक्षत्र होने से यमघण्टयोग होता है।

उक्त तीनों प्रकार के योग मङ्गल कार्यों में वर्जित करने चाहिए। दग्धयोग, विषाख्य-योग तो नाम से ही अनिष्टप्रद है। जैसे अग्नि में डाली गई कोई वस्तु उस वस्तु को अग्नि भस्म करती है तद्वत् उक्त तिथिवार से उत्पन्न हुताशनयोग भी मंगल कर्म में अति विघ्न करता है।

यमघण्टयोग सभी कर्मों में त्याज्य है। यात्रा में विशेष त्याज्य है।

पीयूष में 'गर्गाचार्य' के मत से विन्ध्य से उत्तर हिमालय तक यमघण्ट का दोष होता है, इनसे अतिरिक्त (अन्य) देशों में यमघण्ट का दोष नहीं होता।

लग्न से शुभ ग्रह या चन्द्रमा यदि केन्द्रत्रिकोण में हो तो यमघण्टक दोष नहीं होता।

यमघण्टयोग की ८ घड़ी, मृत्युयोग की १२ घड़ी वर्जित करने पर शेष घटिकायें शुभकार्यानुकूल हो सकती हैं। शुभकार्य में उक्त दोष वर्जित ही करने चाहिए। अत्या-वश्यक होने पर ये दोष दिन में जितने अनिष्टप्रद होते हैं उतने रात्रि में दोषप्रद नहीं होते हैं ॥ ८ ॥ ९ ॥

अथ चैत्रादिमासे शून्यास्तिथीः शार्दूलविक्रीडितेनानुष्टुप्पूर्वार्द्धेन चाह—

भाद्रे चन्द्रदृशौ नभस्यनलनेत्रे माधवे द्वादशी
पौषे वेदशरा इषे दशशिवा मार्गेऽद्रिनागा मधौ ।
गोऽष्टौ चोभयपक्षगाश्च तिथयः शून्या बुधैः कीर्तिता
ऊर्जाषाढतपस्यशुक्रतपसां कृष्णे शराङ्गाब्धयः ॥ १० ॥
शक्राः पञ्च सिते शक्राद्याग्निविश्वरसाः क्रमात् ।

पीयूषधारा—भाद्र इति। भाद्रशब्देन भाद्रपद उच्यते। 'स्युर्नभस्यः प्रौष्ठपदभाद्रभाद्रपदाः समाः' इत्यमरः। भाद्रे भाद्रपदे मास्युंभयपक्षगे शुक्लकृष्णसाधारणे, चंद्रदृशौ प्रतिपद्द्वितीये तिथी शून्ये। तथा नभसि श्रावणे मासि। अनलनेत्रे तृतीयाद्वितीये उभयपक्षगे शून्ये। माधवे वैशाखे द्वादशी तिथिः शून्या, पौषे वेदशराः चतुर्थीपञ्चम्यौ शून्ये। इषे आश्विने दशशिवाः दशम्येकादश्यौ शून्ये। मार्गे मार्गशीर्षेऽद्रिनागाः शून्ये। मधौ चैत्रे गोष्टो नवम्यष्टम्यौ शून्ये। एषु मासेषु। एतास्तिथयः पक्षद्वयगाः शून्या बुधैः कीर्तिताः। अथानुक्तमासानामूर्जाषाढतपस्यशुक्रतपसां कार्तिकाषाढफाल्गुनज्येष्ठमाघानां कृष्णपक्षे क्रमेण शरांगाब्धयः शक्राः पञ्च पञ्चतिथयः शून्याख्याः। यथा—कार्तिककृष्णपक्षे पञ्चमी शून्या। आषाढकृष्णपक्षे षष्ठी शून्या। फाल्गुनकृष्णपक्षे चतुर्थी शून्या। ज्येष्ठकृष्णपक्षे चतुर्दशी शून्या। माघकृष्णपक्षे पञ्चमी शून्या। अथैषामेव मासानां सिते शुक्लपक्षे शक्रादयग्निविश्वरसाः क्रमाच्छून्याः। यथा कार्तिकशुक्लपक्षे चतुर्दशी शून्या। आषाढशुक्ले सप्तमी शून्या। फाल्गुनशुक्ले तृतीया शून्या। ज्येष्ठशुक्ले त्रयोदशी शून्या। माघशुक्ले षष्ठी शून्येत्यर्थः। यदाह वसिष्ठः—'अष्टमीनवमी चैत्रे पक्षयोरुभयोरपि। माधवे द्वादशी त्याज्या पक्षयोरुभयोरपि॥ ज्येष्ठे त्रयोदशी निंद्या सिते कृष्णे चतुर्दशी। आषाढे कृष्णपक्षस्य षष्ठी शुक्ले तु सप्तमी॥ द्वितीया च तृतीया च श्रावणे सितकृष्णयोः। प्रथमा च द्वितीया च नभस्ये मासि निंदिते॥ दशम्येकादशी निंद्या मासांषे शुक्ल कृष्णयोः। ऊर्जे चतुर्दशी शुक्ले कृष्णपक्षे तु पञ्चमी॥ सप्तमी चाष्टमी सौम्ये पक्षयोरुभयोरपि। पौषे पक्षद्वये चैव चतुर्थी पञ्चमी तथा॥ माघे तु पञ्चमी षष्ठी कृष्णे शुक्ले यथाक्रमम्। तृतीया च चतुर्थी च फाल्गुनं सितकृष्णयोः॥ तिथयो मासशून्याख्या वंशवित्तविनाशदाः। आसु श्राद्धं प्रकुर्वीत नैव मङ्गलमाचरेत्' इति॥ १०॥

पीताम्बरा—दोनों पक्षों की शून्य तिथियाँ—भाद्र में प्रतिपद्, द्वितीया, श्रावण में तृतीया, द्वितीया, वैशाख की द्वादशी, पौष की चतुर्थी, पञ्चमी, आश्विन में दशमी, एकादशी, मार्गशीर्ष में सप्तमी, अष्टमी, चैत्र में अष्टमी, नवमी—ये शून्य तिथियाँ कही गई हैं।

कार्तिकमास कृष्णपक्ष की पञ्चमी, शुक्ल की चतुर्दशी, आषाढकृष्ण की षष्ठी, शुक्ल की सप्तमी, फाल्गुनकृष्ण की चतुर्थी, शुक्ल की द्वितीया, ज्येष्ठकृष्ण की चतुर्दशी, शुक्ल की त्रयोदशी, माघकृष्ण की पञ्चमी और शुक्ल की षष्ठी तिथियाँ भी शून्य तिथियाँ कही गई हैं।

मास शून्य तिथियों में शुभ कर्म करने से वंशवित्त क्षय होता है। इन शून्य तिथियों में श्राद्ध किया जाना चाहिए किन्तु मंगल कर्म नहीं करने चाहिए॥ १०॥

अथ तिथिनक्षत्रसम्बन्धिदोषान्सार्द्धानुष्टुब्द्वयेनाह—

तथा निन्द्यं शुभे सार्पं द्वादश्यां वैश्वमादिमे॥ ११॥
अनुराधा द्वितीयायां पञ्चम्यां पित्र्यभं तथा।
त्र्युत्तराश्च तृतीयायामेकादश्यां च रोहिणी॥ १२॥
स्वातीचित्रे त्रयोदश्यां सप्तम्यां हस्तराक्षसे।
नवम्यां कृतिकाष्टाम्यां पूभा षष्ठ्यां च रोहिणी॥ १३॥

पीयूषधारा—तथा निंद्यमिति । शुभकृत्ये द्वादश्यां सार्पमाश्लेषा निंद्य, आदिमे तिथौ प्रतिपदि वैश्वमुत्तराषाढा निंद्या, द्वितीयायामनुराधा, पञ्चम्यां पितृभं मघा, तृतीयायां त्र्युत्तराः उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदा, निंद्या, एकादश्यां रोहिणी, त्रयोदश्यां स्वातीचित्रे; सप्तम्यां हस्तराक्षसे हस्तमूले, नवम्यां कृत्तिका, अष्टम्यां पूभा पूर्वाभाद्रपदेत्यर्थः । यदाह चतुर्भुजमिश्र-निबन्धे लल्लः—'द्वितीयया चानुराधा त्र्युत्तराश्च तृतीयया । पञ्चमी च मघायुक्ता चित्रा स्वात्या त्रयोदशी ॥ एषु कार्यं कृतं चेत्स्यात्षण्मासान्मरणं ध्रुवम् । प्रतिपद्युत्तराषाढा नवम्यां कृत्तिका यदि ॥ पूर्वाभाद्रपदाष्टम्यामेकादश्या च रोहिणी । द्वादश्यां च यदाश्लेषा त्रयोदश्यां मघा यदि ॥' इति ॥११॥१२॥१३॥

पीताम्बरा—और भी तिथिनक्षत्र से उत्पन्न दोष कहे जा रहे हैं—द्वादशी तिथि में श्लेषा, प्रतिपदा में उत्तराषाढ़ा; द्वितीया में अनुराधा, पञ्चमी को मघा, तृतीया को तीनों उत्तरा, एकादशी को रोहिणी, त्रयोदशी में स्वाती और चित्रा, सप्तमी को हस्त और मूल, नवमी में कृतिका, अष्टमी में पूर्वाभाद्रपद तथा षष्ठी के दिन रोहिणी भी शुभ कार्यों में वर्जित हैं । शुभ कर्म में ये निन्द्य हैं ।

चतुर्भुज मिश्र निबन्ध में—"उक्त निन्द्य तिथियों में शुभ कार्य करने वाले का, ६ महीने के भीतर निधन हो जाता है ।" कहा है ॥ ११ ॥ १२ ॥ १३ ॥

अथ चैत्रादिमासेषु क्रमाच्छून्यनक्षत्राण्यनुष्टुब्द्वयेनाह—

कदास्रभे त्वाष्ट्रवायू विश्वेज्यौ भगवासवौ ।
वैश्वश्रुती पाशिपौष्णे अजपादग्निपित्र्यभे ॥ १४ ॥
चित्राद्वीशौ शिवाश्व्यर्काः श्रुतिमूले यमेन्द्रभे ।
चैत्रादिमासे शून्याख्यास्तारा वित्तविनाशदाः ॥ १५ ॥

पीयूषधारा—कदास्रभ इति । चैत्रमासे कदास्रभे रोहिण्यश्विन्यौ, वैशाखे त्वाष्ट्रवायू चित्रास्वात्यौ, ज्येष्ठमासि विश्वेज्यौ उत्तराषाढापुष्यौ, आषाढमासे भगवासवौ पूर्वाफल्गुनीधनिष्ठे श्रावणे विश्वश्रुती उत्तराषाढाश्रवणौ, भाद्रपदे पाशिपौष्णे, पाशी वरुणः शततारकारेवत्यौ, आश्विने अजपात्पूर्वाभाद्रपदा, कार्तिके अग्निपित्र्यभे कृत्तिकामघे, अत्र पाशिपौष्णे अजपादित्यत्र 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति प्रगृह्यत्वात् 'प्लुतप्रगृह्या अचि नित्यम्' इति प्रकृतिभावेन संध्य-भावः । मार्गशीर्षे चित्राद्वीशौ चित्राविशाखे, पौषे शिवाश्व्यर्काः आर्द्राश्विनीहस्ताः, माघे श्रुति-मूले, फाल्गुनमासे यमेन्द्रभे भरणीज्येष्ठे एतास्ताराः क्रमाच्चैत्रादिमासेषु शून्यसंज्ञा ज्ञेयाः । कीदृश्यस्ताराः वित्तविनाशदा धननाशकरा इत्यर्थः । उक्तं च वसिष्ठसंहितायाम्—'अश्विनी रोहिणी चैत्रे शून्यभे परिकीर्तिते । चित्रा स्वाती च वैशाखे ज्येष्ठे विश्वेज्यतारके ॥ भगवासव-माषाढे श्रावणे हरिविश्वभे । नभस्ये वारुणांत्यर्क्षमजपादश्वयुज्यपि ॥ कार्तिके पितृवह्न्यृक्षे मार्गे चित्राद्विदैवते । पौषे दस्रकरार्द्राः स्युर्माघे मूलं च विष्णुभम् ॥ तपस्ये शक्रभरणी शून्याभान्याहुर-ग्रजाः । एषु यत्तु कर्म धनैः सह विनश्यति' ॥ इति ॥ १४ ॥ १५ ॥

पीताम्बरा—चैत्रादि मासों में शून्य नक्षत्र—चैत्र में रोहिणी-अश्विनी, वैशाख में चित्रा-स्वाती, ज्येष्ठ में उत्तराषाढ़ा-पुष्य, आषाढ़ में पूर्वाफाल्गुनी-धनिष्ठा, श्रावण में उत्तरा-

षाढ़ा-श्रवण, भाद्र में शतभिषा-रेवती, आश्विन में पूर्वाभाद्रपद, कार्तिक में कृतिका मघा, मार्गशीर्ष में चित्रा-विशाखा, पौष में आर्द्रा-अश्विनी हस्त, माघ में श्रवण-मूल और फाल्गुनमास में भरणी ज्येष्ठा ये नक्षत्र शून्य होते हैं। ऐसे शून्य नक्षत्रों में किया गया शुभ कार्य, धनक्षय कारक होता है ॥ १४ ॥ १५ ॥

अथ चैत्रादिमासेषु शून्यराशीननुष्टुभाह—

घटो झषो गौर्मिथुनं मेषकन्यालितौलिनः ।
धनुः कर्को मृगः सिंहश्चैत्रादौ शून्यरशयः ॥ १६ ॥

पीयूषधारा—घट इति । चैत्रे घटः कुम्भः, वैशाखे झषो मीनः, ज्येष्ठे गौर्वृषः, आषाढे मिथुनं, श्रावणे मेषः, भाद्रपदे कन्या, आश्विनेऽलिर्वृश्चिकः कार्तिके तौलिस्तुला, मार्गशीर्षे धनुः, पौषे कर्कः, माघे मृगो मकरः, फाल्गुने सिंहः, एते राशयः क्रमेण चैत्रमासादिषु शून्यसंज्ञका इत्यर्थः । उक्तं च वसिष्ठेन—'घटमत्स्यवृषायुग्ममेषकन्याः सवृश्चिकाः । तुलाचापकुलीराख्यमृगसिंहाश्च राशयः ॥ चैत्रादौ मासशून्याख्या वंशवित्तविनाशदाः । तस्मात्तान्संपरित्यज्य शोभनं कारयेत्सुधीः ॥ १६ ॥

पीताम्बरा—चैत्र, वैशाख, ज्येष्ठ, आषाढ़, श्रावण, भाद्र, आश्विन, कार्तिक, मार्गशीर्ष माघ और फाल्गुन इन बारहों मासों में क्रमशः कुम्भ, मीन, वृष, मिथुन, मेष, कन्या, वृश्चिक, तुला, धनु, कर्क, मकर और सिंह राशियाँ शून्य राशियाँ होती हैं ।

उक्त मासों की उक्त शून्य राशियों में शुभ कार्य नही करने चाहिए। इन शून्य राशियों में शुभ कार्य करने से वंश व वित्त का विनाश होता है ॥ १६ ॥

अथ विषमतिथिषु दग्धलग्नानीन्द्रवज्रयाह—

पक्षादितस्त्वोजतिथौ घटेणौ मृगेन्द्रनक्रौ मिथुनाङ्गने च ।
चापेन्दुभे कर्कहरी हयान्त्यौ गोऽन्त्यौ च नेष्टे तिथिशून्यलग्ने ॥ १७ ॥

पीयूषधारा—पक्षादित इति ॥ शुक्लकृष्णसाधारण्येन पक्षमङ्गीकृत्य ओजतिथौ विषमतिथिषु प्रतिपत्तृतीयादिषु घटस्तुला, एणो मकर इत्यादीनि लग्नानि क्रमेण दिनदग्धानि ज्ञेयानि! यथा प्रतिपदि तुलामकरौ, तृतीयायां मृगेन्द्रनक्रौ सिंहमकरौ, पञ्चम्यां मिथुनकन्ये, सप्तम्यां धनुःकर्कौ, नवम्यां कर्कसिंहौ, एकादश्यां धनुर्मीनौ, त्रयोदश्यां वृषमीनौ तस्यां तस्यां तिथौ एते एते लग्ने नेष्टे अनिष्टे इत्यर्थः । उक्तं च वसिष्ठसंहितायाम्—'मृगसिंहौ तृतीयायां प्रथमायां तुलामृगौ । पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापचन्द्रभे ॥ नवम्यां सिंहकीटाख्यावेकादश्यां गुरोर्गृहे । वृषमीनौ त्रयोदश्यां दग्धसंज्ञास्त्वमी गृहाः ॥ दग्धसद्मनि यत्कर्म कृतं सर्वं विनश्यति । तस्माद्दग्धगृहास्त्याज्याः शोभनेष्वखिलेष्वपि ॥' इति ॥ १७ ॥

पीताम्बरा—दोनों कृष्ण-शुक्ल पक्षों में प्रतिपद से विषम तिथियों में अर्थात् प्रतिपद् में तुला और मकर, तृतीया में सिंह-मकर, पञ्चमी में मिथुन-कन्या, सप्तमी के दिन धनु-कर्क, नवमी में कर्क-सिंह, एकादशी में धनु-मीन और त्रयोदशी में वृष-मीन ये लग्न राशियाँ शुभ कर्म के लिए अच्छी नहीं हैं क्योंकि उनका नाम दग्ध लग्न होता है ॥ १७ ॥

अथैषां दुष्टयोगानां शुभकृत्यावश्यकत्वे सति परिहारं नारदवचनेनैवाह—

तिथयो मासशून्याश्च शून्यलग्नानि यान्यपि।
मध्यदेशे विवर्ज्यानि न दूष्याणीतरेषु तु ॥ १८ ॥
[1]पङ्ग्वन्धकाणलग्नानि मासशून्याश्च राशयः[2]।
गौडमालवयोस्त्याज्या अन्यदेशे न गर्हिता ॥ १९ ॥

पीयूषधारा—तिथय इति। स्पष्टार्थयिदं पद्यद्वयम्। पंग्वंधकाणाद्याख्यानि लग्नानि विवाहप्रकरणे वक्ष्यन्ते। मध्यदेशो वराहसंहितायामुक्तः—'मद्रारिमेदमांडव्यशाल्वनीपोज्जिहान-संख्यानाः। मरुवत्सघोषयामनसारस्वतमत्स्माध्यमिकाः॥ माथुरकोपज्योतिषधर्मारण्यानि शूर-सेनाश्च। गौरग्रीवौदेहिकपञ्चगुडाश्वत्थपाञ्चालाः। साकेतककुकुरुकालकोटि कुकुराश्च पारि-यात्रनगः। औदुम्बरकापिष्ठकगजाह्वयाश्चेति मध्यमिदम्॥' इति। जगन्मोहनेऽपि—'केन्द्रे चैव त्रिकोणे च शुभो ह्युपचयेपि वा। एकोऽपि बलवांश्चापि शून्यतिथ्युडुनाशकः॥' इति॥ थयं देशाचारमनुसृत्य व्यवहारः कर्तव्यः॥ १८॥ १९॥

पीताम्बरा—पहिले के श्लोक ९, १० में मासशून्य तिथियाँ तथा श्लोक १७ में, कथित शून्य लग्नों को मध्यदेश में ही वर्जित करना चाहिए, अन्य देशों में इनमें भी शुभ कर्म हो सकते हैं। केन्द्र त्रिकोण में शुभ ग्रहों की स्थिति से उक्त दोषों से हानि नहीं होती।

वाराहीसंहिता में—मद्रारिमेदमाण्डव्यशाल्वनीपोज्जिहानसं ख्यान..............'मध्य-देश के देशों की स्पष्टता की हैं। आगे विवाह प्रकरण में पंगु, अन्ध और काण लग्नों का उल्लेख हैं। ये पंगु, अन्ध और काण नामक लग्न और मासशून्य राशियाँ गौड और मालव देश में ही वर्जित करनी चाहिए॥ १८॥ १९॥

अथ समस्तशुभकार्येषु सिद्धिदानपि हस्तार्कादियोगांस्तिथिविशेषेणातिनिंद्याननुष्टुब्द्वये-नाह—

वर्जयेत्सर्वकार्येषु हस्तार्कं पञ्चमीतिथौ।
भौमाश्विनीं च सप्तम्यां षष्ठ्यां चन्द्रैन्दवं तथा॥ २०॥
बुधानुराधामष्टम्यां दशम्यां भृगुरेवतीम्।
नवम्यां गुरुपुष्यं चैकादश्यां शनिरोहिणीम्॥ २१॥

पीयूषधारा–वर्जयेदिति। सर्वशुभकृत्येषु पञ्चम्यां हस्तनक्षत्रं सूर्यवारं च युगपद्वर्जयेत्। एवं सप्तम्यां भौमाश्विनीमपि, षष्ठ्यां सोममृगनक्षत्रे, अष्टम्यां बुधानुराधां, दशम्यां भृगुरेवतीं, नवम्यां गुरुपुष्यम्, एकादश्यां शनिरोहिणीं वर्जयेदित्यर्थः। हस्तार्कादीन् सिद्धियोगानाह नारदः—'हस्तर्क्ष सूर्यावारेन्दाविदुभं प्रथम कुजे। सोम्ये मित्रभमाचार्ये पुष्यं पौष्णं भृगोः सुते। रोहिणी मन्दवारे तु सिद्धियोगाह्वया अमी॥' इति। तत्र त्रितयनिषेधो दैवज्ञमनोहरे—आदित्ये पञ्चमीहस्तौ सोमे षष्ठी च चन्द्रभम्। भौमाश्विन्यौ च सप्तम्यामनुराधां बुधाष्टमीम्॥ गुरुपुष्यं नवम्यां च दशम्यां भृगुरेवतीम्। एकादश्यां शनिब्राह्मे विषयोगाः प्रकीर्तिताः॥'

इति । अन्यत्रापि—'अर्के हस्तं पञ्चमां च सोमे षष्ठीं च चन्द्रभम् । अश्विनीं सप्तमी सोमे बुधे मैत्रं तथाष्टमीम् ।। गुरौ पुष्यं च नवमीं रेवतीं दशमीं भृगौ । एकादशीं शनौ ब्राह्मं वर्जयेत्सर्वदा बुधः ।।' इति । वशिष्ठेन त्वन्यदेव त्रितयं निषिद्धमुक्तम्—'अर्कवारेग्निपञ्चम्यौ सोमे चित्रा द्वितीयया । कुजे पूर्णेन्दुरोहिण्योः सप्तमीयाम्ययोर्बुधे ॥ गुरौ मित्रत्रयोदश्योः षष्ठीश्रवणयोः सिते । पौष्णाष्टम्योः शनावेते योगा हालाहलाह्वयाः । एषु योगेषु कर्तव्यं शत्रूच्चाटनमारणम् । विवाहादिषु कार्येषु नियतं निधनप्रदम् ।।' इति । अग्निः कृत्तिका । पूर्णेन्दुः पूर्णिमा ॥ २०–२१ ॥

पीताम्बरा–रविवार के साथ पञ्चमी और हस्त नक्षत्र, मंगलवार की सप्तमी अश्विनी नक्षत्र के साथ, सोमवार षष्ठी और मृगशिरा, बुधवार अष्टमी और अनुराधा, शुक्रवार की दशमी रेवती के साथ, गुरुवार नवमी पुष्य, और शनिवार एकादशी रोहिणी—इन तिथि वार नक्षत्रों का सम्बन्ध शुभ कर्म में वर्जित हैं। यद्यपि गुरुवार के दिन पुष्य सब कार्यों के लिए सिद्ध है किन्तु नवमी तिथि सम्बन्ध से निन्दनीय हो जाता है। ऐसे ही सर्वत्र समझना चाहिए ॥ २० ॥ २१ ॥

अथ भौमाश्विनीत्यादिकान् सिद्धियोगान् कार्यविशेषऽतिनिन्द्यानानुष्टुभाह—

गृहप्रवेशे यात्रायां विवाहे च यथाक्रमम् ।
भौमाश्विनीं शनौ ब्राह्मं गुरौ पुष्यं[1] विवर्जयेत् ॥ २२ ॥

पीयुषधारा—गृहेति ॥ नूतनगृहप्रवेशेऽतिसिद्धिदामपि भौमाश्विनीं वर्जयेत् । यात्रायां शनौ रोहिणीं वर्जयेत् । विवाहे गुरुपुष्यं विवर्जयेत् । राजमार्तंडः—'भौमाश्विनीं प्रवेशे च प्रयाणे शनिरोहिणीम् । गुरुपुष्यं विवाहे च सर्वथा परिवर्जयेत् ।।' इति । ननु भौमाश्विनी तु प्रवेशे निषिद्धास्ति । कथम् । 'व्यर्कारवारे तिथिषु रिक्तामावर्जितासु च । दिवा वा यदि वा रात्रौ प्रवेशो मंगलप्रदः ।।' इति नारदोक्तेर्भौमो निषिद्धः । अश्विनीक्षिप्रसंज्ञकनक्षत्रं तेन 'क्षिप्रैश्चरैः स्यात्पुनरेव यात्रा' इति फलम् । ततः सापि निषिद्धा । एवं रोहिणी यात्रायामविहिता पश्चिमायां चातिशयेन निषिद्धैव । एवं शनिवारोपि सामान्यतो नवम्यादियोगे सुतरां निषिद्ध एव । एवं पुष्योऽपि विवाहे निषिद्धः । गुरुवारस्तूत्तम एव । अनयोर्योगस्तु वायग्निवत्सुतरां निषिद्धस्तत्कथमिदमपवादवचनं, प्राप्तिपूर्वकत्वात्प्रतिषेधस्य इति । उच्यते 'हस्तर्क्ष-

---

(१) विवाहे गुरुदिनमतीव शस्तम्, किंच पुष्येण सहावस्थितया 'मधुसर्पिषोर्यथा विषम्' तथैवायमपि जायते योगः । पुरा किल पुष्याभिजित्पूर्वफल्गुनीनक्षत्राणि विवाहे प्रसिद्धानि तत्प्रासङ्गिकं पद्यद्वयं यथा ज्योतिर्विदाभरणे—

'समस्तकर्मोचितकालपुष्यो दुष्टो विवाहे मदमूर्छितत्वात् ।
सहस्रपत्रप्रसवेन तस्मादिहापि मुक्तो भुवि लोकसंघैः ॥ १ ॥
भगोडुवाल्मीकिरिहाह सौम्यं सीता सिषेवे न सुखं तदूढा ।
भैमी तथैवाभिजिदृक्षमत्रिस्तच्छापमापोडु तदीयमस्मात् ॥ २ ॥"

मर्कवारे' इत्यादिवचनाद्भौमाश्विनीत्यादेर्वा नक्षत्रयुतेः कार्यमात्रे प्रशस्ततमत्वमस्ति यदाह राजमार्तण्डः—'यदि विष्टिर्व्यतीपातो दिनं वाप्यशुभं भवेत्। हन्यतेऽमृतयोगेन भास्करेण तमो यथा॥ हंत्यमृताख्यो योगः सर्वाण्यशुभानि लीलया नियतम्। न भवति पुनरिह शद्धौ वैधृति-विष्टिव्यतीपाते॥' इति सामान्यतः कार्यमात्रप्राशस्त्यप्राप्तावपवादवचनं युक्तमेव। अत्र पितृ-चरणाः। इयं च प्रशंशाऽमृतयोगकारकनक्षत्रवारोक्तकर्मविशेषगतविशिष्टफलाभिधायिकावगतव्या न तु निषिद्धकर्मानुविधायिनी। अतएव पठन्ति—'भौमाश्विनीं प्रवेशे च प्रयाणे शनिरोहिणीम्। गुरुपुष्यं विवाहे च सर्वथा परिवर्जयेत्॥' इत्याहुः। अत्र समाधिः। अन्यशुभदिवसासम्भवे कृत्यस्य चावश्यकत्वे भौमाश्विन्यादौ निषिद्धेऽपि कार्यं कार्यमन्यथा नेति॥ २२॥

पीतम्बरा—गृहप्रवेश के लिए मंगलवार के दिन की अश्विनी, यात्रा के लिए शनि के दिन की रोहिणी और विवाह के लिए गुरुवार के दिन का पुष्य नक्षत्र वर्जित है।

आवश्यकतावश अन्य शुभ दिन नहीं मिल रहा हो, कार्य आवश्यक हो तो मंगल की अश्विनी इत्यादि जो निषिद्ध काल कहा गया है उसमें शुभ कार्य किये जा सकते हैं।

गुरुवार का दिन यद्यपि विवाह आदि के लिए अत्यन्त उत्तम है, किन्तु जैसे मधु और घी का योग विष उत्पन्न करता है और जैसे वायु से अग्नि अधिक दीप्त होती है वैसे ही गुरु-पुष्य के योग का विवाह भी निषिद्ध ही कहा गया है॥ २२॥

अथानन्दादीनष्टाविंशतियोगान् शालिन्युपजातिभ्यामाह—

आनन्दाख्यः कालदण्डश्च धूम्रो धाता सौम्यो ध्वांक्षकेतू क्रमेण।
श्रीवत्साख्यो वज्रकं मुद्गरश्च छत्रं मित्रं मानसं पद्मलुम्बौ॥ २३॥
उत्पातमृत्यू किल काणसिद्धी शुभोऽमृताख्यो मुसलो गदश्च।
मातङ्गरक्षश्चरसुस्थिराख्यप्रवर्धमानाः फलदाः स्वनाम्ना॥ २४॥

पीयूषधारा—आनन्देति। स्पष्टार्थं पद्यद्वयम्। यदाह नारदः—"आनन्दः कालदण्डोऽथ धूम्रो धाता शुभाह्वयः। ध्वांक्षो ध्वजाख्यःश्रीवत्सवज्रमुद्गरछत्रकाः॥ मित्रमानसपद्माख्यलुम्ब कोत्पातमृत्यवः। काणः सिद्धिः शुभामृत मुसलातङ्क कुंजराः। राक्षसाख्यश्चरस्थैर्यवर्धमानाः क्रमादमी। योगाः स्वसंज्ञाफलदास्त्वष्टाविंशतिसंख्यकाः॥' इति॥ २३–२४॥

पीताम्बरा—जिन योगों के नाम शुभ हैं वे शुभ फल, जो अशुभ नाम के हैं वे अशुभ फल देने वाले ये २८ आनन्दादि योग हैं। जो क्रमशः १–आनन्द, २–कालदण्ड, ३–धूम्र, ४–धाता, ५–सौम्य, ६–ध्वाङ्क्ष, ७–केतु, ८–श्रीवत्स, ९–वज्र, १०–मुद्गर, ११–छत्र, १२–मित्र, १३–मानस, १४–पद्म, १५–लुम्ब, १६–उत्पात, १७–मृत्यु, १८–काण, १९–सिद्धि २०–शुभ, २१–अमृत, २२–मुशल, २३–गद, २४–मातङ्ग, २५–रक्ष, २६–चर, २७–सुस्थिर और २८–प्रवर्धमान नाम के हैं।

इन २८ योगों में २; ३, ६, ७, ९, १०, १५, १६, १७, १८, २२; २३, २५ ये तेरह अशुभ और शेष १५ शुभ हैं॥ २३॥ २४॥

अथैते योगाः कथं ज्ञेया इत्यनुष्टुमाह—

दास्रादर्के मृगादिन्दौ सार्पाद्भौमे करादबुधे।
मैत्राद्गुरौ भृगौ वैश्वाद्गण्या मन्दे च वारुणात्॥ २५॥

पीयूषधारा—दास्रादिति । अत्र नक्षत्राणां साभिजितां गणना कार्या । यतोऽष्टाविंशतिरेते योगाः सम्भवन्ति । तथा सत्येकैकवारे दास्रादश्विनीनक्षत्रात्साभिजिद्दिननक्षत्रं गणनीयं । तद्यत्संख्याकं स्यात्तत्संख्याको योग आनन्दादिर्भवति। यथा दिननक्षत्रं श्रवणः तदाश्विनीतः साभिजिद्गणनया त्रयोविंशतिसंख्यमस्ति । तथासत्यानन्दादियोगेषु त्रयोविंशतिसंख्यो गदयोगो जातः । एवमिदौ सोमवारे मृगशीर्षात्पूर्ववद्गणनया आनन्दादियोगा ज्ञेया इत्यर्थः । एवं सर्वत्र व्याख्येयम् । सार्पमाश्लेषा, कर हस्तनक्षत्रं, मैत्रमनुराधा, वैश्वमुत्तराषाढा, वरुणं शततारका । यदाह नारदः—'रविवारक्रमादेते दास्रभादिदुभाद्विधो । सार्पाद्भौमे बुधे हस्तान्मैत्रभाद्देवमंत्रिणि' ॥ वैश्वदेवाद्भृगुसुते वारुणाद्भास्करात्मजे ॥ इति ॥ २५ ॥

पीताम्बरा—आनन्दादियोग ज्ञान—

आनन्दादि योग पञ्चाङ्गों में दिये रहते हैं । उन्हें स्वयं अपनी बुद्धि से जानने के लिए जैसे सं० २०२७ चैत्रकृष्ण अमावस्या शुक्रवार को पूर्वाभाद्रपद नक्षत्र ११ दण्ड २५ पल तक हैं तो शुक्रवार को उत्तराषाढ़ से गिनकर अभिजित सहित छठा नक्षत्र पूर्वा भाद्रपद होने से इस दिन ११ दण्ड २५ पल तक छठा योग ध्वाङ्क्ष पञ्चाङ्ग में लिखा है । इसी प्रकार रविवार के दिन अश्विनी से चन्द्रवार के दिन मृगशीर्ष से मङ्गलवार को अश्लेषा से, बुध को हस्त से, गुरुवार के दिन अनुराधा, से शुक्रवार के दिन उत्तराषाढ़ा से, शनिवार के दिन शतिभिषा नक्षत्र से (अभिजित को भी लेकर) इष्ट दिन के नक्षत्र तक गिनती करने से जो संख्या मिलेगी, उतनी ही संख्या का वह आनन्दादि योग उस दिन होगा । जितने समय तक वह नक्षत्र पञ्चाङ्ग में लिखा हो उसके आगे दूसरे नक्षत्र के लग जाने से योग भी उसके आगे का होगा ॥ २५ ॥

अथानन्दादिषु ये दुष्टयोगास्तेषां कियतां सत्यावश्यकत्वे परिहार इति शालिन्याह—

ध्वांक्षे वज्रे मुद्गरे चेषुनाड्यो वर्ज्या वेदाः पद्मलुम्बे गदेऽश्वाः ।
धूम्रे काणे मौसले भूर्द्वयं द्वे रक्षोमृत्यूत्पातकालाश्च सर्वे ॥ २६ ॥

पीयूषधारा—ध्वांक्ष इति । ध्वांक्षवज्रमुद्गरयोगेषु आद्या इषुनाड्यः पञ्च घट्यो वर्ज्याः । पद्मलुम्बयोगयोर्वेदाश्चतस्रो घटिका वर्ज्याः । एवं गदे अश्वाः सप्त घटिका; धूम्रे भूरेकैव घटिका; काणे घटिकाद्वयं, मुसलयोगे घटिके द्वे, राक्षसमृत्यूत्पातकालाः षष्टिघटिकात्मकाः सर्वेऽपि वर्ज्याः । अत्र श्लोके अनुक्तेऽपि चरयोगे घटिकात्रयं वर्ज्यम् । उक्त च ज्योतिःसारसागरे—'ध्वांक्षेंद्रायुधमुद्गरेषु घटिकास्त्याज्यास्तु पञ्चादितः पद्मालुंबकयोश्चतस्र उदिता धूम्रे सदैका पुनः । द्वे काणे मुसलाह्वयेऽपि च गदे सप्तैव तिस्रश्चरे मृत्यूत्पातकरक्षसां दिनगतास्ताः कालदण्डे तथा ॥' अत्र दिनशब्देनाहोरात्रमुच्यते । पद्मालुंबकयोरित्यत्राङ्प्रश्लेषश्छन्दोऽनुरोधार्थः ॥ २६ ॥

पीताम्बरा—योगों की वर्ज्य घटिका ज्ञान—

ध्वांक्ष, वज्र और मुद्गर योग में (कार्य आवश्यक हो तो) आदि की ५ घटी, पद्मलुम्ब में ४, गद की ७, धूम्र में एक मुशल-काण की आदि की दो घटी त्याग देनी चाहिए । किन्तु राक्षस मृत्यु उत्पात और कालयोगों का समग्र समय वर्जित कहा है ॥ २६ ॥

अथ दोषापवादभूतान् रवियोगाननुष्टुभाह

सूर्यभाद्वेदगोतर्कदिग्विश्वनखसम्मिते ।
चन्द्रर्क्षे रवियोगाः स्युर्दोषसङ्घविनाशकाः ॥ २७ ॥

पीयूषधारा—सूर्यभाविति । सूर्यो यस्मिन्नक्षत्रेऽस्ति ततश्चन्द्रर्क्षं यद्दिने । तस्मिन् चतुर्नवषट्दशत्रयोदशविंशतिसंख्याके सति रवियोगाः स्युः । कीदृशः दोषाणां संघः समूहस्तस्य विनाशका इत्यर्थ । उक्तं च वसिष्ठेन—'सूर्याच्चतुर्थे दशमे च षष्ठे विश्वर्क्षके विंशतिमे नवर्क्षे । भवन्ति षड् भानुमहर्क्षयोगाः कुयोगविध्वंसकराः शुभेषु' ॥ इति ॥ २७ ॥

पीताम्बरा—रवियोग—सूर्य नक्षत्र से चन्द्रमा के नक्षत्र तक गिनती करने से यदि सूर्य से चन्द्रमा का नक्षत्र, ४, ६, ९, १०, १३, २० इन संख्याओं में पड़े तो उस दिन रवियोग होगा जो समग्र दोषों को अच्छी प्रकार दूर करता है ।

जैसे—जिस दिन कृतिका में सूर्य है और आर्द्रा में चन्द्रमा है तो उस दिन पञ्चाङ्गों में रवियोग अवश्य दिया होगा । न भी दिया हो तो ज्योतिषी स्वयं समझ लेगा कि आज रवियोग है ॥ २७ ॥

अथ सूर्यादिवारेषु नक्षत्रविशेषैः सिद्धियोगानिन्द्रवज्रोपजातिभ्यामाह—

सूर्येऽर्कमूलोत्तरपुष्यदास्रं चन्द्रे श्रुतिब्राह्मशशीज्यमैत्रम् ।
भौमेऽश्व्यहिर्बुध्न्यकृशानुसार्पं ज्ञे ब्राह्ममैत्रार्ककृशानुचान्द्रम् ॥ २८ ॥
जीवेऽन्त्यमैत्राश्व्यदितीज्यधिष्ण्यं शुक्रेऽन्त्यमैत्राश्व्यदितिश्रवोभम् ।
शनौ श्रुतिब्राह्मसमीरभानि सर्वार्थसिद्ध्यै कथितानि पूर्वैः ॥ २९ ॥

पीयूषधारा—सूर्येति । रविवारे हस्तमूलत्र्युत्तरापुष्याश्विन्यो नक्षत्राणि सिद्धियोगाः स्युः । एवं चन्द्रे श्रवणरोहिणीमृगशिरः पुष्यानुराधाः सिद्धियोगाः । एवं भौमेऽश्विन्युत्तराभाद्रपदाकृत्तिकाश्लेषाः ज्ञे बुधे रोहिण्यनुराधाहस्तकृत्तिकाश्लेषाः गुरौ रेवत्यनुराधाश्विनीपुनर्वसुपुष्याः । शुक्रे रेवती पूर्व फल्गुन्य श्विनीपूनर्वसुश्रवणाः । शनौ श्रवणरोहिणीस्वात्यो नक्षत्राणि सर्वार्थसिद्धयै पूर्वैराचार्यैः कथितान्युक्तानि । अत्रैते सिद्धियोगाः 'दास्रादर्के मृगादिन्दौ' इत्यादिप्रकारेणानन्दादिसमीचीनयोगसम्बन्धिनक्षत्रैरुपनिबद्धाः । अत एवानयोरार्षमूलाभावः । अमुमेवाशयं मनस्यभिसंधाय जगन्मोहनज्योतिःसारसागरादिनिबन्धेषु स्वेच्छया न्यूनाधिकनक्षत्रैः सिद्धियोगा उक्ताः । तत्र भीमपराक्रमः—'मूलं रवौ पुष्यकरोत्तराणि वेधा मृगांकः श्रवणं च सोमे । कृशानुपुष्योत्तरभानि भौमे बुधेऽनुराधा वरुणः कृशानुः ॥ बृहस्पतौ पुष्यपुनर्वसू च भगोश्विनी च श्रवणं च शुक्रे । शनैश्चरे स्वातिपितामहौ च योगाः किलैते शुभदायिनः स्युः' इति ॥ दीपिकायां च—'ध्रुवगुरुकरमूलं पौष्णभंचार्कवारे' इत्यादिभिर्नक्षत्रैः सिद्धियोगाभिधानं युक्तमेव । 'हस्तर्क्षमर्कवारेन्दाविन्दुभं प्रथमं कुजे । सौम्ये मित्रभमाचार्ये पुष्यं पौष्णं भृगोः सुते रोहिणी मन्दवारे तु सिद्धियोगाह्वया अमी' इति । नारदोक्तवचनार्थेऽस्मिन्पद्ये, उक्ता एवेति स्वयं पुनर्नोक्ताः ॥ २८ ॥ २९ ॥

पीताम्बरा—सर्वार्थसिद्धियोग—रविवार के दिन हस्त, मूल, तीनों उत्तरा, पुष्य और अश्विनी, चन्द्रवार को श्रवण, रोहिणी, मृगशिरा, पुष्य और अनुराधा, मंगल को अश्विनी, उत्तराभाद्र, कृतिका और आश्लेषा, बुधवार के दिन रोहिणी, अनुराधा, हस्त, कृतिका और मृगशिरा, वृहस्पति के दिन रेवती, अनुराधा, अश्विनी, पुनर्वसु और पुष्य, शुक्रवार के दिन रेवती, अनुराधा, अश्विनी, पुनर्वसु और श्रवण, शनिवार के दिन श्रवण, रोहिणी और स्वाती हो तो ऐसे दिन में सर्वार्थसिद्धियोग होता है। ऐसे योग सब कार्यों में सिद्धि देते हैं ॥२८॥२९॥

१. दिन नक्षत्र से सर्वार्थसिद्धियोग जानने का चक्र—

दिनानि	नक्षत्राणि—					नक्षत्र-संख्या
र.	हस्तः	मूलं	उत्तरात्रयम्	पुष्यः	अश्विनी	७
चं.	श्रवणः	रोहिणी	मृगशिरः	पुष्य	अनुराधा	५
मं.	अश्विनी	उत्तराभा०	कृत्तिका	आश्लेषा		४
बु.	रोहिणी	अनुराधा	हस्त	कृत्तिका	मृगशिरः	५
वृ.	रेवती	अनुराधा	अश्विनी	पुनर्वसुः	पुष्यः	५
शु.	रेवती	अनुराधा	अश्विनी	पुनर्वसुः	श्रवणः	५
श.	श्रवणः	रोहिणी	स्वाती			३

अथोत्पातमृत्युकाणसिद्धियोगान् शालिन्याह—

द्वीशात्तोयाद्वासवात्पौष्णभाच्च ब्राह्मात्पुष्यादर्यमर्क्षाद्युगर्क्षैः[1] ।
स्यादुत्पातो मृत्युकाणौ च सिद्धिर्वारेऽर्काद्ये तत्फलं नामतुल्यम्[2] ॥ ३० ॥

पीयूषधारा—द्वीशादिति । आदित्यवारादिषु क्रमाद्द्वीशाद्विशाखातः, तोयभात्पूर्वाषाढातः, वासवाद्धनिष्ठातः, पौष्णभाद्रेवतीतः, ब्राह्माद्रोहिणीतः, पुष्यात् अर्यमर्क्षादुत्तराफल्गुनीत आरभ्य युगर्क्षैश्चतुर्भिर्नक्षत्रैः क्रमादुत्पातमृत्युकाणसिद्धियोगाः स्युः । यथा रवौ विशाखा उत्पातः मैत्रं मृत्युः, ज्येष्ठा काणः, मूलं सिद्धिः । एवं सोमे पूर्वाषाढा उत्पातः, उत्तराषाढा मृत्युः, अभिजित्काणः, श्रवणं सिद्धिः । भौमे धनिष्ठोत्पातः, शततारका मृत्युः, पूर्वाभाद्रपदा काणः, उत्तराभाद्रपदा सिद्धिः । बुधे रेवत्युत्पातः, अश्विनी मृत्युः, भरणी काणः, कृत्तिका सिद्धिः ।

---

(१) "ब्राह्मात्पुष्यादर्यमर्क्षाच्चतुर्भैः" अयमपि पाठः क्वचित् पुस्तके समुपलभ्यते ।

(२) अथ दिननक्षत्रवशेनोत्पातादियोगचतुष्टयज्ञापकचक्रम्—

गुरो रोहिण्युत्पातः, मृगो मृत्युः, आर्द्राकाणः, पुनर्वसुः सिद्धः। शुक्रे पुष्य उत्पातः, आश्लेषा मृत्युः, मघा काणः, पूर्वाफल्गुनी सिद्धिः। शनावुत्तरफल्गुन्युत्पातः, हस्तो मृत्युः चित्रा काणः, स्वाती सिद्धियोग इत्यर्थः। तदुक्तं 'विशाखादिचतुर्वर्गमर्कवारादिषु क्रमात्। उत्पातमृत्युकाणाख्या योगाश्चामृतसंयुताः ॥' अमृतं सिद्धिः। ननु चायं पुनरुक्तः श्लोकार्थः। आदित्यवारादिषु हि—'दास्रादर्के मृगादिंदौ' इत्यादि क्रमेणानन्दादियोगगणनया उत्पातमृत्युकाणसिद्धियोगा एव सम्भवन्ति नान्ये। किं च—'सूर्येर्कमूलोत्तरपुष्यदास्रम्' इति मूलादीनामेव सिद्धियोगाभिधानात्पुनरुक्तिश्चोच्यते। बालानां शीघ्रबोधनार्थं तथोक्तिः। अथवावश्यं वर्ज्या एते उत्पातमृत्युकाणाः सिद्धियोगोऽप्यतिप्रशस्त इत्येतदर्थं तथोक्तिः। ननु तर्हि देशभेदेन परिहारो वक्ष्यमाणोऽनुपपन्नः। सत्यं। कार्यास्यावश्यकर्तव्यत्वे समीचीनदिनांतराप्राप्तावपवादप्रवृत्तिरिति युक्तमुत्पश्यामः। तत्फलमिति। तेषामुत्पातमृत्युकाणसिद्धियोगानां फलं नामतुल्यम्। यस्य योगस्य यादृशं नाम तद्योगसत्वे प्रारब्धकार्यफलमपि तादृशमेवेत्यर्थः उक्तं च नारदेन—'योगाश्चसंज्ञाफलदास्त्वष्टाविंशतिसंज्ञकाः' इति ॥ ३० ॥

पीताम्बरा–उत्पातमृत्यु काण और सिद्धियोग—

रविवार के दिन विशांखा से, सोमवार के दिन पूर्वाषाढ़ा से, मंगलवार के दिन धनिष्ठा से, बुधवार के दिन रेवती से, गुरुवार के दिन रोहिणी से, शुक्रवार को पुष्य से और शनिवार के दिन उत्तराफाल्गुनी से चार-चार नक्षत्रों में क्रमशः उत्पात, मृत्यु, काण और सिद्धियोग होते हैं।

यद्यपि पूर्व श्लोक में इनकी गणना व्यवस्था स्पष्ट कर दी है फिर भी शिष्यों की शीघ्र स्मृति के लिए पुनः इस श्लोक में इनका निर्देश किया गया है।

स्पष्ट समझने के लिए चक्र दियां जा रहा है ॥ ३० ॥

वार	र.	चं.	मं.	बु.	बृ.	शु.	श.
उत्पात	विशा	पू. मा.	धनि.	रे.	रो;	पुष्य	उ. फा.
मृत्यु	अनु	उ. षा.	श.	अश्वि.	मृ.	श्ले.	ह.
काण	ज्ये.	अभि.	पू. भा.	भ.	आ..	म.	चि.
सिद्धिः	मू.	श्र.	उ. भा.	कृ.	पुन.	पू. फा.	स्वा.

अथ दुष्टयोगानां देशभेदेन परिहारमनुष्टुभाह—

कुयोगास्तिथिवारोत्थास्तिथिभोत्था भवारजाः ।
हूणवङ्गखशेष्वेव वर्ज्यास्त्रितयजास्तथा ॥ ३१ ॥

पीयूषधारा—कुयोगा इति। तिथिवारोत्थाः कुयोगाः दुष्टयोगाःक्रकचादयः, तिथिभोत्थाः, 'अनुराधा द्वितीयायाम्' इत्यादयः, भवारजाः 'याम्यं त्वाष्टं वैश्वदेवम्' इत्यादयः तथा त्रितयजा-तिथिवारनक्षत्रजाः । 'वर्जयेत्सर्वकार्येषु हस्तार्कं पञ्चमीतिथौ' इत्येवमादयस्ते सर्वे दुष्टयोगा हूणवंगखशेष्वेव । हूणवङ्गौ प्राच्यदेशौ । खशो देश उत्तरस्यां दिशि प्रसिद्धस्तत्रैव ते वर्ज्याः । अन्यदेशेषु निषिद्धा न भवन्तीत्यर्थसिद्धमेव । उक्तं च नारदेन—"तिथिवारोद्भवा नेष्टा योगा वारर्क्षसम्भवाः । हूणवङ्गखशेभ्योऽन्यदेशेष्वेते शुभप्रदाः' ॥ अत्र तिथिवारयोर्वारर्क्षयोश्च युतेरुपलक्षणत्वादन्ययुतावपि परिहारो ज्ञेयः ॥ ३१ ॥

पीताम्बरा—दुष्ट योगों के वर्ज्य देश—

तिथि और वार से, तिथि और नक्षत्र से, नक्षत्र और वार से, उत्पन्न और तिथि-वार-नक्षत्र इन तीनों से उत्पन्न जो कुयोग हैं उन्हें हूण वंग और खश देशों में ही वर्जित करना चाहिए ।

हूण, वंग क्रमशः भारत के उत्तर पूर्व के देश हैं । खश देश उत्तर में हैं । हूण देश ५० अक्षांश उत्तर मंगोलिया आदि को कहा जा सकता है । वंग देश प्रसिद्ध वंगाल है । खश देश हिमालय के पर्वतीय आवास को कहा जा सकता है ॥ ३१ ॥

अथ समस्तशुभकृत्ये वर्ज्यपदार्थान् शार्दूलविक्रीडितेनाह—

सर्वस्मिन्विधुपापयुक्ततनुलवावर्धे निशाह्नोर्घटी-
त्र्यंशं वै कुनवांशकं ग्रहणतः पूर्वं दिनानां त्रयम् ।
उत्पातग्रहतोऽद्र्यहांश्च शुभदोत्पातैश्च दुष्टं दिनं
षण्मासं ग्रहभिन्नभं त्यज शुभे यौद्धं तथोत्पातभम् ॥ ३२ ॥

पीयूषधारा—सर्वस्मिन्निति । हे पंडित ! सर्वस्मिन् शुभे कार्ये एतानि वस्तूनि निश्चयेन त्यज परिहरेत्यर्थः । कानीत्यत्राह—विध्विति । विधुश्चंद्रः पापाः क्षीणचंद्रसूर्यभौम-शनयः । 'क्षीणेंद्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः' इति **वराहोक्तेः** । राहुकेत्वोरपि पापत्वं **दीपिकायामुक्तम्**—'अक्षीणेंद्वर्कसौरारा: पापांज्ञ स्तैर्युतो बुधः । शुभाः पापौ तमःकेतू विष्णु-धर्मोत्तरोदितौ ॥' इति । वशिष्ठेनापि—सूर्यभौमशनिराहुकेतवः पापसंज्ञखचराः क्षीणचंद्रः । पूर्णचन्द्रशुक्रसोमजाः सर्वकर्मसु हि सौम्य खेचराः ॥' इति । तत्र विधुना पापेन वा पापैर्वा युक्तौ तनुलवौ लग्नवांशौ त्यज । 'पूर्णो क्षीणोऽपि वा चन्द्रो लग्ने सर्वत्र गर्हितः' इति कश्य-पोक्तेः । श्रीपतिश्च—'सर्वार्थसिद्धिषु शशी न शुभो विलग्ने ।' इति । दैवज्ञमनोहरे गुरुः—'पापेन्दुलग्नगौ त्याज्यौ सर्वेषु शुभकर्मसु । अक्षीणं कर्किगोजस्थं केप्याहुर्लग्नगं शुभम् ॥'

इति। अथ निशाह्लोरर्धे राज्यर्धे दिनार्द्धे च घटीत्र्यंशं विंशतिपानि दश पूर्वं दश पश्चाच्च पलानि त्यज। उक्तं च शार्ङ्गीये—मूर्तः कालो निवसति महानिशायां दिने दले यस्मात्। दश पूर्वे दश परंतस्तस्माद्वर्ज्यानि च पलानि ॥' इति। अथो कुनवांशकं पापग्रहनवांशं त्यज। यदाह नारदः—'क्रूरोगांशा न च ग्राह्या न शस्तास्ते नवांशकाः। कुनवांशकलग्नं यत्त्याज्यं सर्वगुणान्वितम् ॥' इति क्रूरैर्क्रूरग्रहैरुग्रा भयजनका अंशा नवांशा न ग्राह्या इत्यर्थः। अथ ग्रहणतः पूर्वं दिनानां त्रयं त्यज। ग्रहणतः सूर्यचंद्रग्रहणदिनात्प्रथमं दिवसत्रयं त्याज्यम्। यदाह गर्गः—'चन्द्रसूर्योपरागेषु त्र्यहं प्रागशुभं भवेत्। सप्ताहमशुभं पश्चात्स्मृतं ग्रहणशूलकम् ॥' इति। उपरागो ग्रहणम्। 'उपरागो ग्रहो राहुग्रस्ते त्विदौ च पूपणि' इत्यमरोक्तेः। अथ उत्पातग्रहतोद्रचहांश्च, उत्पातो नाम स्वभावतो वैपरीत्यम्। यदाह वराहः—'तेषां संक्षेपोयं प्रकृतेरन्यथात्वमुत्पातः' इति। ते चोत्पातास्त्रिविधाः। दिव्या आन्तरिक्षा भौमाश्च। तत्र दिव्यः केत्वादिः आन्तरिक्षो गन्धर्वनगरादिः भौमो भूमिकम्पादिः एतदप्याह वराहः—'अपचारेण नराणामुपसर्गः पापसञ्चयाद्भवति। संसूचयन्ति दिव्यान्तरिक्षभौमास्त उत्पाताः ॥ दिव्यं ग्रहर्क्षवैकृतमुल्कानिर्घातपवनपरिवेषाः। गन्धर्वपुरपुरन्दरचापादि यदान्तरिक्षं तत् ॥ भौमं चरस्थिरभवं तच्छान्तिभिराहतं शममुपैति' इति। ते ह्युत्पाता यस्मिन् दिने स्युस्तद्दिनमारभ्याद्रचहान् सप्त दिनानि त्यज। **यदाह नारदः**—'उत्पातग्रहणादूर्ध्वं सप्ताहं निखिलग्रहे' इति। **दीपिकायां च**—'अनिष्टे त्रिविधोत्पाते सिंहकासूनुदर्शने। सप्तरात्रं न कुर्वीत यात्रोद्वाहादिमङ्गलम् ॥' इति। अनिष्टे अकालवृष्ट्यादिदूषिते काले इति तट्टीकाकारो व्याख्यात्। अद्रचहानीति अद्रयश्च तान्यहानि चेति कर्मधारयसमासे 'राजाहः सखिभ्यष्टच्' इति समासांते टचि कृते 'नस्तद्धिते' इति टिलोपे च 'रात्राह्नाः पुंसि' इति पुलिङ्गत्वम्। अत एव 'द्व्यहाः प्रदेया अविशुद्धशुद्धौ' इत्यादयः प्रयोगा उपपद्यन्ते। तथा ग्रहणतो ग्रहणत ऊर्ध्वं सप्त दिनानि त्यज। अत्र ग्रहणशब्देन सर्वग्रहणं विवक्षितम्। ततो न्यूनत्वे त्रैराशिकम्। **यदाह वशिष्ठः**—'सर्वग्रासे दिनान्यष्टौ सर्वकार्येषु वर्जयेत्। षट् दिनानि त्रिभागोने अर्धग्रासे चतुर्दिनम् ॥ चतुर्थांशे त्रिरात्रं स्याद्ग्रहणे चन्द्रसूर्ययोः ॥' **इति नारदोऽपि**—'निःशेषे सप्त सप्त च' इत्याह। एतच्च यद्यप्यविशेषेणोक्तं तथापि ग्रहानन्तरमेव ज्ञेयम्। 'उत्पातग्रहणादूर्ध्वं सप्ताह निखिलग्रहे' इति तस्यैवोक्तेः। **अंगिरा** अपि 'सर्वग्रासे तु सप्ताहमर्धग्रासे दिनत्रयम्। त्रिद्वयेकाङ्गुलतो ग्रासे दिनमेकन्तु वर्जयेत् ॥' इति। अनयोर्वाक्ययोर्विषयव्यवस्थादेशभेदेनाचरभेदादवगन्तव्या। क्वचित्सामान्यतो दिनसप्तकमुक्तम्। यदाह गर्गः—'सूर्यचन्द्रोपरागौ द्वौ महादोषाद्वयावुभौ। सप्तरात्रं तयोरूर्ध्वं सर्वशोभननाशनम् ॥' इति। एतदपि सर्वग्रासपरतया योज्यम्। **शार्ङ्गीयविवाहपटले**—चन्द्रस्य सर्वग्रासे उभयतो दिनसप्तकं त्याज्यमित्युक्तम्—'कृत्स्नचन्द्रग्रहे त्याज्यं प्राक् पश्चाद्दिनसप्तकम्' इति। उत्पातविशेषे ग्रहणे च बहूनि दिनानि वर्ज्यान्याहुः। यदाह चण्डेश्वरः—'ग्रहे रवीन्द्वोरवनिप्रकंपे केतूद्गमोल्कापतनादिदोषे। व्रते दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित् ॥' इति। ग्रहे कार्यस्यावश्यकत्वविशेषे परिहार उक्तो ज्योतिर्निबन्धे—'पञ्च दिनानि वशिष्ठस्त्रिदिनं गर्गस्तु कौशिकस्त्वेकम्। यवनाचार्यस्य मतं पञ्च मुहूर्ताश्च दूषयति राहुः ॥' इति।

नित्यनैमित्तिकयोरयं दोषो न—

अयं च ग्रहणयोनिषेधो नित्यनैमित्तिकादिकृत्यव्यतिरिक्तविषयः। यदाह गुरुः—'नित्ये नैमित्तिके काम्ये जपहोमक्रियासु च। उपकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥' इति। ग्रहो ग्रहणम्। अथ शुभदोत्पातैश्च दुष्टं दिनं त्यज, शुभं कल्याणं ददति लोकेभ्य इति शुभदा एतादृशा ये उत्पाता वसंताद्यृतुपुरस्कारेणोत्पातविशेषाः शुभा इत्युक्तम्। तादृशोरुत्पातैर्दुष्टं दूषितं दिनं द्वित्वातिरिक्तसंख्याविशेषानवगमादेकत्वस्य च प्रतीतेरेकं दिनं त्याज्यमित्यर्थः। अत्र हेतुः शुभदत्वमुत्पातानाम्।

शुभदा उत्पातयोगाः—

शुभदोत्पातानाह ऋषिपुत्रकृतैः श्लोकैर्वराहः

'वज्राशनिमहीकंपाः सन्ध्यानिर्घातनिःस्वनाः। परिवेषरजोधूमरक्तार्कास्तमनोदयाः ॥ १ ॥
द्रुमेभ्योऽन्नरसः स्नेहमधुपुष्पफलोद्गमाः। गोपक्षिमधुवृद्धिश्च शिवाय मधुमाधवे ॥ २ ॥
तारोल्कापातकलुषं कपिलार्केन्दुमण्डलम्। अनग्निज्वलनास्फोटधूमरेखानिलाकुलम् ॥ ३ ॥
रक्तपद्मारुणं सान्ध्यं नमः क्षुब्धार्णवोपभम्। सरितां चाम्बुसंशोषं दृष्ट्वा ग्रीष्मे शुभं भवेत् ॥४॥
शक्रायुधपरीवेषविद्युच्छुष्कविरोहणम्। कम्पोद्वर्तनवकृत्यं रसनं दारणं क्षितेः ॥ ५ ॥
यद्युदपानसरसां वृद्धयूर्ध्वतरणप्लवाः। शीरणं चाद्रिगेहानां वर्षासु न भयावहम् ॥ ६ ॥
दिव्यस्त्रीभूतगन्धर्वविमानाद्भुतदर्शनम्। ग्रहनक्षत्रताराणां दर्शनं च दिवाम्बरे ॥ ७ ॥
गीतवादित्रनिर्घोषो वनपर्वतसानुषु। सस्यवृद्धिरपां हानिरपापाः शरदिस्मृताः ॥ ८ ॥
शीतानिल षारत्वं दर्शनं मृगपक्षिणाम्। रक्षो यक्षादिसत्त्वानां दर्शनं वागमानुषी ॥ ९ ॥
दिशोधूमान्धकाराश्च सनभोवनपर्वताः। उच्चैः सूर्योदयेऽस्ते च हेमन्ते शोभनाः स्मृताः ॥१०॥
हिमपाताऽनिलोत्पातविरूपाद्भुतदर्शनम्। कृष्णाञ्जनाभमाकाशं तारोल्कापातपिंजरम् ॥११॥
चित्रगर्भोद्भवाः स्त्रीषु गोजाश्वमृगपक्षिषु। पत्राङ्कुरलतानां च विकाराः शिशिरे शुभाः ॥१२॥

ऋतुस्वभावजा ह्येते दृष्टाः स्वर्तौ शुभप्रदाः।
ऋतोरन्यत्र चोत्पाता दृष्टास्ते भृशदारुणाः ॥ १३ ॥ इति।

अथ ग्रहभिन्नभं ग्रहैर्भौमादिभिः पञ्चभिर्भिन्नं सिद्धान्तोक्तरीत्या भेदयोगं प्राप्तमेतादृशं भं नक्षत्रं त्यज। तथा योद्धं यन्नक्षत्रं भौमादि पञ्चग्रहयुद्धमध्यपतितं सदृश्यन्ते तत्त्यज। तत्र क्रूरयोगादेव दोषसत्त्वे युद्धोपघातस्तु दोषाधिक्यसूचनार्थः। सौम्यग्रहयुद्धे तु स एव दोषः। अत्र केचित् यस्मिन् दिननक्षत्रे भौमादीनां युद्धं जातं तन्नक्षत्रं त्याज्यमित्याहुस्तन्न, **प्रमाणाभावात्**। तथोत्पातभमुत्पातैर्दिव्यान्तरिक्षभौमैर्दूषितं भं त्यज। अयमर्थः। भौमान्तरिक्षयोरुत्पातयोग्रहयुद्धं चेत्प्रत्यक्षदृश्यनक्षत्राभावाद्दिननक्षत्रमेव त्याज्यम्। दिव्योत्पाते तु केत्वादिनां प्रत्यक्षतो यन्नक्षत्रमाक्रान्तं तत्त्याज्यम्। भौमान्तरिक्षोत्पातसाहचर्याद्दिननक्षत्रमपि त्याज्यम्। एवं नक्षत्रचतुष्टयं षण्मासम्। 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया। षण्मासमभिव्याप्येत्यर्थः। यदुक्तं शार्ङ्गीयविवाहपटले—'क्रूरैर्भुक्तं युक्तं भोग्यं च तथैव च खेटयुद्धगतम्। ग्रहभिन्नकेतुहतभं त्यजेन्महोत्पतादुष्टं यत् ॥ यत्राह्नसंदर्शनदुष्टमृक्षं शीतांशुयुक्तं च विवाहलग्ने। आमासषट्कं विदधीत तस्मिन्विवाहयात्रादिशुभं न चैव ॥' इति नारदोपि—'ग्रहणोत्पातभं त्याज्यं मङ्गलेषु ऋतुत्रयम्' इति।

मङ्गलेषु 'ऋतुत्रयमित्यत्र' 'ऋत्यक' इति प्रकृतिभावः। गुरुरपि—'उत्पातैः पीडितास्ताराः षण्मासं प्रकृति ययुः। राहुकेतुविभुक्तं यदृक्षचक्रं निपीडितम्॥ वत्सरार्धेन शुध्येत ग्रहयुद्धगतं च भम्। नक्षत्रग्रहयोगेन यदुक्तं दोपसंच यम्॥ तदिदं सर्वकार्येषु शुभेषु परिवर्जयेत्' इति।

ग्रहयुद्धे चत्वारो भेदाः—

ग्रहयुद्धे भेदाश्चत्वारः। भेदः, उल्लेखः, अंशुविमर्दनम्, अपसव्यं चेति। यथा वराहः—'आसन्न क्रमयोगाद्भेदोल्लेखांशुमर्दनाऽसव्यैः। युद्धं चतुःप्रकारं पराशराद्यैर्मुनिभिरुक्तम्॥' इति॥ तल्लक्षणानि सूर्यसिद्धांते—'उल्लेखस्तारकास्पर्शाद्भेदे भेदः प्रकीर्त्यते। युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम्॥ अंशादूनेऽपसव्यं स्याद्युद्धमेकोऽत्र चेदनुः' इति। ननु ग्रहयुद्धादिकं सिद्धान्तविरुद्धम्। यतः 'कक्षाः सर्वा अपि दिविषदां चक्रलिप्तांकितास्ता वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्व लिप्ताः। तस्मादेते शशिजभृगुजादित्यभौमेज्यमन्दा मन्दाक्रान्ता इव शशधराद्भ्रान्ति यान्तः क्रमेण॥' इति भास्कराचार्योक्तेर्महान्तरोर्ध्वाधोभावेनावस्थितानां ग्रहाणां युद्धासम्भव एव। लोके हि समीपवर्तिनोः पुंसोर्युद्धादि दृश्यते तत्कथमियमत्र शास्त्रे ग्रहयुद्धोक्तिः। सत्यम्। अत्र युक्तिपुरःसरं वराह एव समादधातिस्म—'वियतिचरग्रहाणामुपर्युपर्यात्ममार्गसंस्थानाम्। अतिदूरादृग्विषये समतामिव सम्प्रयतानाम्॥ आसन्नक्रमयोगाद्भेदोल्लेखांश्च मर्दनाऽसव्यैः। युद्धं चतुःप्रकारं पराशराद्यैर्मुनिभिरुक्तम्॥' इति। तेन भूवर्तिनां राज्ञामन्येषां वा शुभाशुभफलसूचानर्थं युद्धसमागमाद्युक्तिः। उक्तं च सूर्यसिद्धान्ते—'भावाभावाय लोकानां कल्पनेयं प्रदर्शिता। स्वमार्गतः प्रयान्त्येते दूरमन्योन्यमार्गतः॥' इति। ननु यथा ग्रहणं तिथिसंधौ भवति तथा नक्षत्रद्वयसंधौ जायमानं किं नक्षत्रं दूषयति किं परं किं पूर्वं किमुभयमिति। अविशेषादुभयमिति वयं ब्रूमः। यदुक्तं शार्ङ्गीयविवाहपटले—'यस्मिन् विधुं राहुरिनं च धिष्ण्ये गृह्णाति तत्त्याज्यमृतुत्रयं स्यात्। पाणिग्रहेषु रणं विधत्ते द्वयोर्भयोश्चैतद्द्वयमेव जह्यात्॥' इति। अयासन्नपक्षद्वयग्रहणे किं द्वयोस्त्यागः षण्मासमुत कस्यचित्कश्चिद्विशेषः। अयमपि निर्णयस्तत्रैवाभ्यधायि 'पक्षांतरेण ग्रहणद्वयं च यदा तदादिग्रहणोपगर्भम् पक्षाद्विशुद्धं भवति द्वितीयं पाणिग्रहे शुद्ध्यति भोगषट्कात्॥ इत्यलमतिप्रसंगेन॥ ३२॥

पीताम्बरा—शुभ कार्य में वर्ज्य—चन्द्रमा, तथा पापग्रहों, (मंगल, शनि, राहु, केतु, सूर्य और क्षीण चन्द्रमा तथा पापग्रहों से युक्त होने पर बुध भी पापग्रह है) से युक्त लग्न तथा नवमांश, मध्यान्ह और मध्यरात्रि से १० पल = ४ मिनट पहिले और पश्चात, पापग्रह का नवमांश, जिस दिन ग्रहण लगता है उससे तीन दिन पहिले और तीन दिन पश्चात् उत्पात, भूकम्प आदि के बाद ७ दिन, तथा शुभद उत्पात जिस दिन हो उससे दूषित सारे दिन को शुभ कर्मों में वर्जित करना चाहिए।

तथा ग्रहों से भेदित नक्षत्र, ग्रहों का जिस नक्षत्र में युद्ध हुआ हो वे नक्षत्र, तथा जिस नक्षत्र में उत्पात हुआ है उस नक्षत्र में भी ६ महीने तक शुभ कार्य नहीं करने चाहिए।

स्वभावतः प्रकृति में प्रतिकूलता जब कभी आ जाती है तो उसे उत्पात कहते हैं। यह उत्पात तीन प्रकार के होते हैं—(१) दिव्य उत्पात—केतु, पुच्छलतारा आदि दर्शनः (२)

आन्तरिक्ष—अकस्मात् कोई गन्धर्व नगर इन्द्रधनुप आदि का दिखाई देना, (३) भौम उत्पात —भूमिकम्प आदि। उक्त उत्पातादि जिस दिन जिन नक्षत्रों में होते हैं वे दिन शुभ कर्म में त्याज्य हैं।

रविचन्द्र ग्रहण में—नित्यनैमित्तिक कार्यों में दोष नहीं कहा गया है। नित्यनैमित्तिक काम्य जप होम आदि क्रियाओं में ग्रहण का वेध नहीं माना जाता है।

ऋतुओं के स्वभाव के अनुसार देखे गये, फलफूल-कुसुम अन्न आदि शुभ कहे गये हैं। ऋतुओं के स्वभाव के प्रतिकूल देखी गई प्रकृति को उत्पात कहा गया है।

जैसे चन्द्रसूर्य ग्रहण का मध्यकाल तो तिथि सन्धि (पूर्णान्त में चन्द्रग्रहण और लम्बन संस्कृत भूगर्भीय दर्शान्त में सूर्यग्रहण होता है) में होता है, ऐसे ही यदि ग्रहण नक्षत्र सन्धि में भी हो सकता है तो शुभ कर्म में पूर्व या पर या दोनों किस नक्षत्र को वर्जित किया जाय? कोई विशेष वाक्य नहीं मिलने से "पीयूष" के मत से पूर्व और पर के दोनों नक्षत्रों को शुभ कार्य में कथित समय की अवधि तक वर्जित करना चाहिए।

क्रमशः प्रथमपक्ष की पूर्णिमामें चन्द्रग्रहण दूसरेपक्ष की अमामें सूर्यग्रहण यदि हो तो अर्थात् आसन्न पक्षद्वय में दोनों के ग्रहण हों तो दोनों ग्रहणों की दोनों नक्षत्रों को ६ मास तक शुभ कर्म के लिए वर्जित किया जाना चाहिए या क्या होना चाहिए? "पीयूष" ने इसका भी समाधान स्पष्ट रूप से दिया है कि पूर्वपक्ष का ग्रहण द्वितीयपक्ष के ग्रहण में गतार्थ हो जाता है। इसलिए दूसरे पक्ष के ग्रहण के ही नक्षत्र को ६ महीने की अवधि तक शुभ कर्म में वर्जित करना चाहिए ॥ ३२ ॥

अथ ग्रासभेदेन कियत्संख्याकेषु ग्रहणीयनक्षत्रनिषेध तथा प्रागादिदिवसांश्च निषिद्धानि-द्रवज्रा छन्दसाह—

नेष्टं ग्रहर्क्षं सकलार्धपादग्रासे क्रमात्तर्कगुणेन्दुमासान्।
पूर्वं परस्तादुभयोस्त्रिघस्रग्रस्तेऽस्तगे वाप्युदितेऽर्धखण्डे ॥ ३३ ॥

पीयूषधारा-नेष्टमिति। ग्रहर्क्षं ग्रहणनक्षत्रं क्रमात्संपूर्णार्धचतुर्थांशग्रासे सति षट्त्र्येकमासान् नेष्टम्। तथा-ग्रहणभं सर्वग्रासे मासषट्कं, अर्थग्रासे मासत्रयं, चतुर्थांशग्रासे मासमेकं त्यजेदित्यर्थः यदाह गुरुः—'सर्वग्रासे तु षण्मासांस्त्रीन्मासांश्च दलग्रहे। आपादग्रहणे धिष्ण्यं मासमेकं विवर्जयेत् ॥' इति अथ पूर्वमिति क्रमादित्यनुवर्तत एव। अत्रापि ग्रस्तेऽस्तगे ग्रस्तास्ते पूर्वं त्रिघस्त्रास्त्रिदिनं नेष्टम्। पूर्वं न सम्यक् त्रिदिनमित्यर्थः। अर्थादिप्रेतनानि दिनानि समीचीनानि। तथा ग्रस्तेऽभ्युदिते ग्रस्तोदये परस्तात्पश्चात्रिदिनं नेष्टं पूर्वं सम्यक् त्रिदिनमित्यर्थः। तथा अर्द्धखण्डे ग्रस्तोदयग्रस्तास्तयोरभावेपि अर्धग्रासे बिबमानादर्धग्रासे उभयोः कालयोः प्राक्पश्चात्त्रिदिनं नेष्टम्। यदाह गुरुः—'ग्रस्तास्ते त्रिदिनं पूर्वे पश्चाद्ग्रस्तोदये तथा। खण्डग्रासे त्रित्रि दिनं निःशेषे सप्त सप्त च ॥' इति। कश्यपोऽपि—'ग्रस्तोदये परो दोषो ग्रस्तास्तेऽर्वाक् शनीनयोः। द्युनिशार्धे तूभयं स्यात्खंडिखंडव्यवस्थयोः ॥" इति। वसिष्ठोऽपि—'ग्रस्तोदये चोर्ध्वमनिष्टमादौ ग्रस्तास्तमानेप्युडुमासषट्कम् ॥' इति। अतः खण्डग्रहणादिसद्भावेऽपि ग्रस्तोदयग्रस्तास्तत्वप्रभावात्पूर्वं पश्चाच्चोक्तदिनानि वर्ज्यानीति सर्वत्र विषयविवेकः ॥३३॥

पीताम्बरा—वर्जित समय की अवधि—सूर्य चन्द्रमा का सम्पूर्ण खग्रास ग्रहण जिस नक्षत्र में हो उस नक्षत्र में ६ महीने तक शुभ कार्य नहीं करना चाहिए।

इसी प्रकार अद्‌र्ध ग्रहण के नक्षण को तीन मास तक, चतुर्थांश ग्रहण के नक्षत्र को १ महीने तक शुभ कार्य में वर्जित करना चाहिए।

ग्रहण लगे हुए सूर्य या चन्द्रमा का अस्त हो तो ग्रहण के पहिले के तीन दिन, यदि ग्रहण लगे सूर्य चन्द्रमा का उदय हो तो ग्रहण दिन के पश्चात् के ३ दिन तथा उदयास्त भिन्न समय में खण्डग्रास हो तो ३ दिन पीछे भी शुभ कार्यों में नेष्ट हैं ॥ ३३ ॥

अथ सामान्यतोऽवश्यं वर्ज्यानि पंचांगदूषणादीनि वसन्ततिलकयानुष्टुभा चाह। जन्मर्क्षमास तिथिप्रभृतयः पदार्थाः सर्वेषु कर्मसु वर्ज्या इति द्वितीयश्लोकेनान्वयः। तान् पदार्थानाह—

जन्मर्क्षमासतिथयो व्यतिपातभद्रा वैधृत्यमापितृदिनानि तिथिक्षयर्द्धौ।
न्यूनाधिमासकुलिकप्रहरार्धपाता विष्कम्भवज्रघटिकात्रयमेव वर्ज्यम् ॥ ३४ ॥
परिधार्धं पञ्च शूले षट् च गण्डातिगण्डयोः।
व्याघाते नव नाड्यश्च वर्ज्याः सर्वेषु कर्मसु ॥ ३५ ॥

पीयूषधारा—जन्मर्क्षेति। यस्मिन्नक्षत्रे जन्म भवेत्तज्जन्मर्क्षं, यस्मिन् मासे जन्म भवेत्स-जन्ममासः, यस्यां तिथौ जन्म भवेत्सा जन्मतिथिः एते वर्ज्याः। तदाह वशिष्ठः—'स्वजन्ममा-सर्क्षतिथिक्षणेषु वैनाशकाद्यृक्षगणेषु भेषु। नोद्वाहमात्माभ्युदयाभिलाषी नैवाद्यगर्भद्वितयं कदाचित् ॥' अयं च जन्मनक्षत्रमासतिथिनिषेधः आद्यगर्भस्यैव। यदाह नारदः—'जन्ममासे न जन्मर्क्षे न जन्मदिवसेऽपि वा। आद्यगर्भसुतस्यापि दुहितुर्वा करग्रहः ॥' इति अनेनाद्यगर्भव्यतिरिक्तिकन्या-यास्तादृशवरस्य जन्मर्क्षमासतिथिषु शुभफलत्वमुक्तं भवति। अत एवाह च्यवनः—'जन्मर्क्षे जन्ममासे वा तारायामथ जन्मनि। जन्मलग्ने भवेदूढा पुत्राढ्या पतिवल्लभा ॥' इति।

जन्ममासलक्षणम्—

अथ जन्ममासलक्षणम् जगन्मोहने वृद्धगर्गः—'आरम्य जन्मदिवसं यावत्त्रिंशद्दिनं भवेत्। स जन्ममासो विज्ञेयो गर्हितः सर्वकर्मसु ॥' इति अस्यापि विशेषस्तत्रैव—'जातं दिनं दूषयते वसिष्ठः पंचैव गर्गस्त्रिदिनं तथात्रिः। तज्जन्मपक्षं किल भागुरिश्च व्रते विवाहे गमने क्षुरे च ॥' इति। वस्तुतस्तु यस्मिश्चांद्रमासे चैत्रादौ जन्माभूत्स चांद्रमासो जन्ममासतया त्याज्य इति युक्तमुत्पश्यामः। 'इन्द्राग्नी यत्र हूयेते मासादिः सः प्रकीर्तितः। अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ ॥' इति हारीतवचनात्। उपवासव्रतोद्वाहयात्राक्षौरोपनायनम्। तिथिवर्षा-दिनिखिलं चांद्रमानेन गृह्यते ॥' इति कश्यपोक्तेश्च। अथात्र तिथिशब्दो वसिष्ठवाक्यस्वर-सादुक्तः। अत एव नारदसंहितायां रत्नमालादिग्रन्थेषु च दिवसपदं तिथिपरं व्याख्येयम्। अन्यथा जन्मवारेऽप्यतिप्रसङ्ग स्यात्। अथ व्यतीपातो वर्ज्यः सप्तविंशतियोगेषु व्यतीपातो नाम योगः स्पष्टसूर्यचन्द्रयोगजन्मा सप्तदशसंख्याको निन्द्यः। उक्तं च वसिष्ठेन—'स वैधृतो यो व्यतिपातयोगः सर्वोप्यनिष्टः परिघार्धमाद्यम्।' इति। तथा भद्रा वर्ज्या भद्रा सप्तमं करणं वर्ज्यम्। यदाह वसिष्ठः—'न कुर्यान्मङ्गलं विष्ट्यां जीवितार्थी कदाचन। कुर्वन्नज्ञस्तदा क्षिप्रं

तत्सर्वं नाशतां व्रजेत् ॥' इति । भद्राप्रवृत्तिरङ्गविभागकल्पनं च विशेषतोऽग्रे वक्ष्यते । तथा वैधृतिः पूर्वलक्षणलक्षितः सप्तविंशतिसंख्याको योगो निंद्यः। अत्र सम्मतिः पूर्वमुक्ता। अथ 'नामैकदेशे नामग्रहणम्' इतिन्यायमनुसृत्य भीमो भीमसेन इत्यादिवदमा अमावस्या निंद्या । 'सदैव दर्शे पितृकर्म चैव नान्यद्विधेयं शुभपौष्टिकाद्यम् । मूढैः कृतं यच्च शुभोत्सवाद्यं विनाशमायात्यचिराद्भृशं यत् ।।' इति वसिष्ठोक्तेः । अथ पितृदिनं माता च पिता च पितरौ 'पुमान् स्त्रिया' इत्येकशेषः । पित्रोर्दिनं मातापित्रोर्मरणदिनं । श्राद्धदिनमिति यावत् तदपि निषिद्धम् । यदाह शार्ङ्गधरः—'भद्रार्धयामाकुलिकं व्यतिपातं वैधृतिं च परिधार्धम् । क्रान्तिसमत्वं जह्यात्संक्रांति क्षयदिनं पित्रोः ॥' इति । अथ तिथिक्षयर्द्धी वर्ज्ये क्षयश्च ऋद्धिश्च क्षयर्द्धी तिथेः क्षयर्द्धी तिथिक्षयर्द्धी तिथिक्षयस्तिथिवृद्धिश्चैते वर्ज्ये । अनयोः प्रसिद्धत्वाल्लक्षणंनोक्तम् ।

तिथिक्षयवृद्धिस्वरूपादि—

तत्र तिथिक्षयलक्षणं तत्र यो वारस्तिथिद्वयान्तं स्पृष्ट्वा तृतीयतिथेः कंचिदादिमभागमपि स्पृशति तत्र वारे मध्यमा तिथिक्षयसंज्ञा । यथा नवमी रवौ घटिकाद्वयं पुनर्दशमीरवौ षट्पंचाशद्घटिकाः ५६ एकादश्याश्च घटिकाद्वयं रविवारेण सह संबद्धमिति दशमी तिथिः क्षयसंज्ञिता अवमसंज्ञितेत्यपि चाहुः । अथ तिथिवृद्धिलक्षणं यत्र या तिथिर्वारद्वयांतं स्पृष्ट्वा तृतीयवारस्यादिमं कंचिद्भागं स्पृशति तत्र सा तिथिर्वृद्धिसंज्ञा त्रिद्युस्पृगित्यपि चेत्याहुः । यथा तृतीया रवौ अष्टपंचाशद्घटिकाः ५८ ततश्चतुर्थी सोमे षष्टिघटिकाः ६० ततो भौमवासरे चतुर्थी घटिकात्रयं ३ अतश्चतुर्थी वारत्रयसंबद्धा तिथिर्वृद्धिसंज्ञा । यदाह वसिष्ठः—'स्युस्तिस्रस्तिथयो वारे एकस्मिन्नवमा तिथिः । तिथिर्वारत्रयं चैका त्रिद्युस्पृक्द्वेतिनिंदिते ॥ कृतं यन्मङ्गलं तत्र त्रिद्युस्पृगवमे दिने । भस्मीभवति तत्क्षिप्रमग्नौ सम्यग्यथेन्धनम् ॥ इति ।

आवश्यके तिथिक्षयादीनां दोषापवादः—

अथ शुभकृत्यावश्यकत्वे तिथिक्षयतिथिवृद्धयोः परिहारमाह दोषापवादाध्याये वसिष्ठः—'अवमाख्यं तिथेर्दोषं केन्द्रगो देवपूजितः । हन्ति यद्वत्पापचयं व्रतं द्वैवार्षिकं यथा ॥ त्रिद्युस्पृगाह्वयं दोषं सौम्यः केन्द्रगतः सदा । हन्ति यद्वत्पापचयमशून्यशयनव्रतम् ॥' इति । अथ न्यूनाधिमासौ क्षयमासाधिकमासौ वर्ज्यौ । 'असंक्रान्तिमासोऽधिमासः स्फुटं स्याद्द्विसंक्रान्तिमासः क्षयाख्यः कदाचित्' इति । द्वयोरपि लक्षणं सिद्धान्तशिरोमणावभिहितम् ! ग्रन्थकृदपि संक्रान्तिप्रकरणे—'स्पष्टार्कसंक्रातिविहीन उक्तो मासोऽधिमासः क्षयमासकस्तु । द्विसंक्रमः' इति वक्ष्यति । एतच्च तत्रैव सम्यग्व्याख्यास्यते । तदुक्तं वसिष्ठसंहितायाम्—'यस्मिन्दर्शस्यान्तार्वागिवापरं दर्शम्। उल्लंघ्य भवति भानोः संक्रान्तिः सोऽधिमासः स्यात् ॥ आद्यन्तदर्शयोर्मध्ये भानोरेव कदाचन । संक्रान्तिद्वितयं स्याच्चेन्न्यूनमासः स उच्यते ॥ मासप्रधानाखिलमेव कर्म मुक्त्वाऽखिलं कर्म न कार्यमत्र । यज्ञोपवासव्रततीर्थयात्राविवाहकर्मादि । विनाशमेति ॥' इति । अथ कुलिकः वारसम्बन्धी मुहूर्तदोषो वर्ज्यः । तथा प्रहरार्धं वारसम्बन्धेनार्धयामा वर्ज्याः । यदाह वसिष्ठः—निधनं प्रहरार्धे तु निःस्वत्वं यमघण्टके । कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदाः ॥' इति । कुलिकादीन् दोषान् ग्रन्थकृदग्रे वक्ष्यति । अथ पातो महापातो महागणित साध्यो व्यतीपातनामको वैधृतिनामकश्च वर्ज्यः । यदाह नारदः—'यस्मिन्दिने

महापातस्तद्दिन वर्जयेच्छुभे । अपि सर्वगुणोपेतं दम्पत्योर्मरणप्रदम् ॥' इति । कश्यपोऽपि—'महावैधृतिपाताभ्यां दूषितं लग्नमुत्तमम् । राजावधूतं पुरुषं यद्वत्तत्संपरित्यजेत् ॥' इति । पातो व्यतीपातः । महाशब्दः प्रत्येकमभिसम्बध्यते । महावैधृतिर्महाव्यतीपातश्च ताभ्यामित्यर्थः । महापातो नाम रवीन्दुक्रान्तिसाम्यम् । तदानयनं तु गणितग्रन्थेभ्यः सूर्यसिद्धान्तादिभ्यो ज्ञेयम् । ततो महापातकालं निर्णीय यत्तत्कालस्यातिसूक्ष्मत्वात्कस्मिन्काले मङ्गलकृत्यं निषिद्धमित्याशङ्क्य महापातस्थितिकालानयनमप्युक्तं तत्रैव । तत्प्रयोजनं सूर्यसिद्धान्ते—'आद्यन्तकालयोर्मध्ये कालो ज्ञेयोऽतिदारुणः । प्रज्वलज्ज्वलनाकारसर्वकर्मसु गर्हितः ॥ स्नानदानजपश्राद्धव्रतहोमादिकर्मसु । प्राप्यते । सुमहच्छ्रेयस्तत्कालज्ञानतस्तथा ॥' इति आद्यन्तकालौ स्पर्शमोक्षस्थितिरूपौ । सिद्धान्तशिरोमणावप्युक्तम् । 'पातस्थितिकालान्तर्मङ्गलकृत्यं न शस्यते तज्ज्ञैः । स्नानजपहोमदानादिकमत्रोपैति खलु वृद्धिम् ॥' इति । यत्तु वसिष्ठेनोक्तम्—'महापातो वैधृतिश्च उपरागसमस्तदा । तस्माद्दिनत्रयं त्याज्यं मध्यपूर्वापराभिधम् ॥' इति । वराहेणापि वृहद्यात्रायामुक्तम्—'एष्यो धनं क्षपयति व्यतिपातयोगो मृत्युं ददाति न चिरादपि वर्तमानः । सन्तापशोकगदविघ्नभयान्यतीतस्तस्माद्दिनत्रयमपि प्रजहीत विद्वान् । तदेव वचनद्वयमपि महापातोपयोगिगणिताशक्त्या कदा महापातः स्यादिति सूक्ष्ममहापातस्थितिकालज्ञानाद्विवाहप्रकरणे 'पञ्चास्याजौ' इति वक्ष्यमाणरीत्या महापातसम्भावनापरया पातदिवसं निर्णीय पूर्वापरवर्तमानदिनानां त्यागपरमिति प्रतिभाति । 'यस्मिन्दिने महापातस्तद्दिनं वर्जयेच्छुभे' इति । नारदवाक्यमप्येवमेव व्याख्येयम् । यदा तु महापातस्य स्थितिरूपसूक्ष्मकालज्ञानं स्यात्तदा 'स्थूलात्सूक्ष्मं ज्यायः' इति न्यायेन स एव पातमध्यकालो विवाहादिमङ्गलकृत्येषु त्याज्योऽन्यथा गणितग्रन्थेषु पातस्थितिकालानयनस्य वैयर्थ्यप्रसङ्ग इति निष्कृष्टोऽर्थः । विष्कम्भेति । विष्कम्भवज्रयोगयोः प्रथमातिक्रमे कारणाभावादादिनं घटिकात्रयमेव वर्ज्यम् । तथा परिघस्य परिघाख्ययोगस्य घटिकानामाद्यमर्धं त्रिंशद्घटिकात्मकं त्याज्यम् । शूले पञ्चादिमा घट्यो वर्ज्याः । गण्डातिगण्डयोगयोरादिमाः षड् नाड्यो वर्ज्याः । व्याघातयोगे नवादिमा नाड्यो वर्ज्याः । यदाह श्रीपतिः—'परिघस्य चार्धम् । तिस्रस्तु योगे प्रथमे सवज्रे व्याघातसंज्ञे नव पञ्च शूले । गण्डेतिगण्डे च षडेव नाड्यः शुभेषु कार्येषु विवर्जनीयाः ॥' इति । ननु सवज्रे इदं कस्य विशेषणं प्रथमयोगस्य वा व्याघातयोगस्य वा भिन्नभिन्नघटिकानिर्देशादुभयोस्तद्विशेषणमयुक्तम् । अत्र ब्रूमः । प्रथमस्यैव विशेषणं वज्रयोगसहिते प्रथमयोगे विष्कम्भयोगे तिस्रो नड्यो वर्ज्या इत्यर्थः । किमत्र प्रमाणमिति चेच्छृणु । कश्यपादिवाक्यस्वरसात् । यदाह कश्यपः—'विष्कम्भवज्रयोस्तिस्रः षट् च गण्डातिगण्डयोः । व्याघाते नव शूले तु पञ्च नाड्यस्तु गर्हिताः ॥' इति नारदोऽप्येवमेव । अनेन—'विष्कम्भादिघटीत्रयं च नवकं व्याघातवज्रोद्भवम्' इति वदन्महेश्वरः प्रत्याख्यातो भवति । एवं च—'विष्कम्भाद्यत्रिनाडी शुभकृतिषु च षट् गण्डयोः पञ्च शूले व्याघाते वज्रकेऽशङ्काः' इति गणेशज्योतिर्विदुक्तिरपि चिन्त्या ॥ ३४–३५ ॥

पीताम्बरा—जन्मनक्षत्रादि विचार—जिस वटु-कन्या का उपनयन विवाहादिक शुभ संस्कार करने हों, उनके जन्मनक्षत्र, जन्ममास और जन्मतिथि में शुभ संस्कार नहीं करने चाहिए । इसी प्रकार व्यतिपात योग, भद्रा, करण, वैधृति योग, अमावास्या तिथि, माता और पिता की मृत्यु की (श्राद्ध तिथि) तिथि, तिथिक्षय (जिसका मान दो सूर्योदय के मध्य में न हो) ।

तिथिवृद्धि (जो तिथि दोनों सूर्योदयों तक रहती है ।) क्षयमास (जिस चान्द्रमास में सूर्य की दो संक्रान्तियाँ आ जाती हैं) । अधिकमास (जिस चान्द्रमास में सूर्य की कोई संक्रान्ति न पड़ती हो) कुलिक नामक मुहूर्त, अर्धयाम, पातकाल ये सब शुभ कर्म में त्याज्य हैं। विष्कम्भ और वज्र योग की आवश्यकता समझ कर तीन घटी त्याग कर शेष समय में शुभ कार्य किया जा सकता है।

जिस नक्षत्र में जन्म हो उसे जन्मनक्षत्र, इसी प्रकार जिस चान्द्रमास में जन्म हो उसे जन्ममास, जिस तिथि में जन्म हुआ है उसे जेन्मतिथि समझना चाहिए। आद्य गर्भ (प्रथम गर्भ) से उत्पन्न वटु-कन्या के लिए जन्ममास आदि में उनका यज्ञोपवीत विवाहादिक संस्कार का निषेध किया गया है। द्वितीयादि गर्भ से उत्पन्न संस्कार्यों के जन्ममास नक्षत्रादिकों में उनके संस्कार किये जाने से शुभ फल की ही प्राप्ति होती है ।

यदि प्रथम गर्भ से उत्पन्न पुत्र या कन्या की अत्यन्त अल्पायुष्य हो या वे गर्भ मे ही नष्ट हो गये हों अथवा प्रसव के अनन्तर सद्यः निधन हो गया हो तदुपरि कालान्तर में उत्पन्न दीर्घायुष्य पुत्र या कन्या की ही लोक में ज्येष्ठ सन्तान की संज्ञा होगी तो उन सन्तानों का जन्ममास नक्षत्रादिकों में चूडा-उपनयन-विवाहादि अच्छी तरह हो सकते हैं। क्योंकि उनका जन्म आद्य गर्भ न होकर द्वितीय गर्भ से है। तथा ज्येष्ठ सन्तान का ज्येष्ठ मास में जो संस्कार निषेध किया गया है, ऐसे द्वितीय गर्भ से उत्पन्न ज्येष्ठ सन्तानों के लिए ज्येष्ठ मास में संस्कारों का निषेध नहीं होता है ऐसे द्वितीय गर्भ के वर-कन्याओं का विवाह यज्ञोपवीत ज्येष्ठमास में भी अच्छी तरह किया जाना चाहिए।

केन्द्र-कोणग शुभग्रह की स्थितियोंवश आवश्यकता होने पर तिथिक्षयादि दोष नही होता है।

परिघ योग की पूर्वार्ध घटी, शूलयोग के अदि की ५ घटी, गण्ड और अतिगण्ड योग की आदि की ६ घटी तथा व्याघात योग के आदि की ९ घटी सभी शुभ कार्यों में वर्जित करनी चाहिए ॥ ३३–३५ ॥

अथ पक्षरन्ध्रतिथीरावश्यकत्वे सति तन्निष्ठवर्ज्यघटीश्चानुष्टुभाह—

वेदाङ्गाष्टनवार्केन्द्रपक्षरन्ध्रतिथौ त्यजेत् ।
वस्वङ्कमनुतत्त्वाशाशरा नाडीः पराः शुभाः ॥ ३६ ॥

पीयूषधारा—वेदाङ्गति । चतुर्थी षष्ठी अष्टमी नवमी द्वादशी चतुर्दशी एताः पक्षरन्ध्रसंज्ञास्तिथयो ज्ञेयाः । आसु शुभकृत्यावश्यकत्वे सति क्रमादादिमा वस्वङ्कमनुतत्त्वाशाशरानाडीस्त्यजेत् । यथा चतुर्थ्यामादिमा अष्टघटिकास्त्याज्या इत्यर्थः । अथ परा उर्वरिता नाड्यः शुभकृत्ये शुभा ज्ञेयाः । यदाह दोषनिरूपणाध्याये वसिष्ठः—

'चतुर्दशी चतुर्थी च अष्टमी नवमी तथा । षष्ठी च द्वादशी चैव पक्षच्छिद्राह्वया इमाः ॥ क्रमादेतासु तिथिषु वर्जनीयाश्च नाडिकाः । भूताष्टमनुतत्त्वाङ्कदशशेषास्तु शोभनाः ॥ दोपनाडीषु यत्कर्म शुभं सर्वं विनश्यति । विवाहे विधवा नारी व्रात्यः स्याच्चोपनायने ॥ सीमन्ते गर्भनाशः स्यात्प्राशने मरणं ध्रुवम् । अग्निना दह्यते क्षिप्रं गृहारम्भे विशेषतः ॥ राजराष्ट्रविनाशः स्यात्प्रतिष्ठायां विशेषतः । किमत्र बहुयोक्तेन कृतं कर्म विनश्यति ॥' इति ।

कश्यपस्तु सर्वसाधारण्येन 'दशैव घटिकास्त्याज्या' इत्याह—'अष्टमी द्वादशी **षष्ठी** पक्षरन्ध्रास्तु तासु च । मङ्गले सर्वदा त्याज्या नूनं हि दश नाडिकाः ॥' इत्यनेन **एतस्यैव**

तिथिवारनक्षत्रयोगकरणात्मकस्य पञ्चाङ्गस्य शुद्धिः पञ्चाङ्गशुद्धिरित्युक्तम्। नारदेन—'तिथिवारर्क्षयोगानां करणस्य च मेलनम्। पञ्चाङ्गमस्य शुद्धिः पञ्चाङ्गशुद्धिरुदाहृता ॥ यस्मिन् पञ्चाङ्गदोषोस्ति तस्मिल्लग्नं निरर्थकम् ॥' इति ॥ ३६ ॥

पीताम्बरा—पक्षों की रन्ध्रतिथियाँ—दोनों पक्षों (कृष्ण और शुक्ल) की रन्ध्र (छिद्र) तिथियाँ और उनमें विशेष अनिष्टसूचक घटयात्मक समय बताया जा रहा है कि—

चतुर्थी, षष्ठी, अष्टमी, नवमी, द्वादशी और चतुर्दशी की प्रारम्भ की क्रमशः ८, ९, १४, २५, १० और ५ घटी शुभ कार्यों में त्याग कर शेष घटियों में शुभ कार्य किये जा सकते हैं। (भद्रा आदि वर्ज्यकाल को ध्यान में रखना चाहिए)। कहीं-कहीं शास्त्रों में अमावस्या को भी पक्षरन्ध्र तिथि कहा गया है ॥ ३६ ॥

अथ कुलिककालवेलायमघण्टकण्टकदोषाननुष्टुभाह—

कुलिकः कालवेला च यमघण्टश्च कण्टकः।
वाराद्द्विघ्ने क्रमान्मन्दे बुधे जीवे कुजे क्षणः ॥ ३७ ॥

पीयूषधारा—कुलिक इति। वारात् वर्तमानवारात् मन्दे शनैश्चरे गणिते सतियोऽङ्को भवेत्त स्मिन् द्विगुणे योऽङ्कस्तत्संख्यः क्षणो मुहूर्तः कुलिको भवति। एवं वर्तमानवारात् बुधे, जीवे, कुजे, गणिते ततो द्विगुणिते सति योऽङ्कः स क्रमात्कालवेलायमघण्टकण्टकसंज्ञकाः दुष्ट-मुहूर्ताः स्युः। यथा रवितः शनिः सप्तसंख्याकः स द्विगुणश्चतुर्दश जाता अतंस्तत्संख्याको मुहूर्तः कुलिकसंज्ञो रविवारे भवति। एवं रवावष्टमो मुहूर्तः कालवेला तथा रवौ दशमो मुहूर्तो यमघण्टः तथा रवौ षष्ठो मुहूर्तः कण्टकसंज्ञ इत्यर्थः। एवं सोमवारादावपि कलिककालवेलायम-घण्टकण्टका; स्युरित्यर्थः। यदाह कश्यपः—"शैलाक्षवेदा—७,५,४, स्तर्काब्धिनगाः ६,४,७, पञ्चाग्निबाहवः ५,३,२। येदाक्षिबाणा ४,२,५ लोकेकेभा ३,१,८, स्त्वक्षिगिरिवह्नयः २,७,३, ॥ चन्द्रर्तुतर्काः १,६,६, कुलिकयमघण्टार्धयामकाः। प्रहरार्धप्रमाणास्ते भानुवारादितः क्रमात् ॥' इति। अत्रार्धयामः सम्पूर्णस्त्याज्योऽन्वर्थत्वात्। कुलिकयमघण्टयोस्तूत्तरार्धं त्याज्यम्। उक्तं च दैवज्ञमनोहरे = 'अहनि निशि गजांशः स्वे दिनेशादिकानां भवति तु गुरुभौमज्ञार्किकालक्रमेण। प्रभवति यमघण्टः कण्टकः कालवेला कुलिक इति विरुद्धस्तत्परार्धं निषिद्धम्।' इति। गजां-शोऽर्धप्रहरः एते मुहूर्तदोषा दिनषोडशांशत्वेन ज्ञेयाः। गजांश इत्युक्त्वा तत्परार्धनिषिद्ध-मित्युक्तेः।

एतेषां दोषफलानि—

दोषफलमाह वसिष्ठः—'निधनं प्रहरार्धे तु निःस्वत्वं यमघण्टके। कुलिके सर्वनाशः स्याद्रात्रावेते न दोषदाः ॥' इति। कण्टकालवेलयोरन्वर्थत्वादत्र फलं नोक्तम्।

एते रात्रौ न दोषदाः—

'रात्रावेते न दोषदाः' इत्यस्यार्थवादो रत्नकोशे—'तमस्विनीगन्धमुपेत्य वारदोषास्तथा शक्तिमनाप्नुवन्तः। अन्धं समासाद्य विलासिनीनां कटाक्षबाणा इव निष्फलाः स्युः ॥ इति। तथा च न 'न वारदोषाः प्रभवन्ति रात्रो देवेज्यदैत्येज्यदिवाकराणाम्। दिवा शशाङ्कार्कजभूसुतानां सर्वत्र निन्द्यो बुधवारदोषः ॥' इति ज्योतिर्निबन्धकृदुक्तिः सङ्गच्छते।

देशभेदेन यमघण्टकादिदोषापवादः—

अथ शुभकृत्यावश्यकत्वे देशभेदेन यमघण्टकण्टकादिदोषपरिहारमाह गर्गः—

'विन्ध्यस्योत्तरकूले तु यावदातुहिनाचलम् ।
यमघण्टकदोषोऽस्ति नान्यदेशेषु विद्यते ॥
मत्स्याङ्गमगधान्ध्रेषु यमघण्टस्तु दोषकृत् ।
काश्मीर कुलिकं दुष्टमर्धयामस्तु सर्वतः ॥' इति ॥ ३७ ॥

पीताम्बरा—कुलिकादि गणना—वर्तमान वार से शनिवार तक गिनती करने से जो अङ्क आवे उसे द्विगुणित करने से जो अङ्क आवे उस अङ्कसंख्यातुल्य उस वर्तमान वार में कुलिक मुहूर्त्त होता है। जैसे बुधवार को कुलिक नामक मुहूर्त की संख्या क्या होगी ? ऐसे प्रश्न के उत्तर के लिए बुधवार से शनिवार तक चौथी संख्या को दूना करने से ८ होता है अतः बुधवार के दिन आठवाँ मुहूर्त कुलिक संज्ञक होगा।

इसी प्रकार वर्तमान वार से बुधवार तक की संख्या को द्विगुणित करने से जो संख्या प्राप्त हो तत्संख्यक मुहूर्त का नाम का कालवेला होता है ।

तथा वर्तमान वार से वृहस्पतिवार तक की द्विगुणित संख्या के तुल्य मुहूर्त का नाम यमघण्ट एवं वर्तमान वार से मंगलवार तक की द्विगुणित संख्या तुल्य मुहूर्त का नाम कण्टक नामक मुहूर्त होता है। स्पष्ट समझने के लिए नीचे सारिणी दी जा रही है कि किस वार को कौन-कौन से मुहूर्तों के नाम कुलिक, कालवेला, यमघण्ट और कण्टक होंगे ।

स्पष्ट ज्ञानार्थ चक्रम्—

वार	सू.	चं.	मं.	बु.	वृ.	शु.	श.
कुलिक	१४	१२	१०	८	६	४	२
कालवेला	८	६	४	२	१४	१२	१०
यमघण्ट	१०	८	६	४	२	१४	१२
कण्टक	६	४	२	१४	१२	१०	८
अर्धयाम							

उक्त कुलिकादि मुहूर्तों में यात्रा करने से मृत्यु, विवाह करने से कन्या विधवा और व्रत-बन्ध में ब्रह्मवध अर्थात् वेदशास्त्र-ज्ञान-शून्यता होती है।

"वसिष्ठ" के मत से ये कुलिकादि मुहूर्त रात्रि में दोषप्रद नहीं होते हैं।

इसी प्रसंग पर 'रत्नकोष' के मत से, दिशाशूल = वारदोष में जैसे पूर्व दिशा की सोम-शनि को, बृहस्पतिवार को दक्षिण दिशा की, सूर्य और शुक्रवार को पश्चिम की और मङ्गल-बुधवार को उत्तर दिशा की यात्रा नहीं करनी चाहिए। यह सामान्य वचन कहते हुए विशेष मत भी कहा है कि—रात्रि में सूर्य, बृहस्पति और शुक्रवारों का वारदोष तथा दिन में सोम, मंगल और शनिवार का वारदोष नहीं होता है। किन्तु बुधवार का दोष यात्रा के लिए दिन और रात्रि दोनों समयों में होता है। वारों का यह परिहार यात्रा आवश्यक होने पर ही चरितार्थ करना चाहिए।

कुलिकादिक उक्त दुष्ट मुहूर्तों में यमघण्टक दोष विन्ध्य और हिमालय के बीच के देशों में ही विशेष दोषयुक्त हैं। इस सम्बन्ध में "रविवारादि शन्यतं गुलिकादि निरूप्यते" इत्यादि विस्तार जैमिनिसूत्र प्रभृति गुरुकृत टीका से भी समझना चाहिए ॥३७॥

अथ सूर्यादिवारेषु शिष्याणां सद्य एव दोषज्ञानार्थं दुर्मुहूर्तादिनामकान् मुहूर्तान् शार्दूलविक्रीडितवसन्ततिलकाभ्यामाह—

सूर्ये षट्स्वरनागदिङ्मनुमिताश्चन्द्रेऽब्धिषट्कुञ्जरा-
ङ्कार्कविश्वपुरन्दराः क्षितिसुते व्द्यब्ध्यग्नितर्का दिशः।
सौम्ये व्द्यब्धिगजाङ्कदिङ्मनुमिता जीवे द्विषड्भास्कराः
शक्राख्यास्तिथयः कलाश्च भृगुजे वेदेषुतर्कग्रहाः ॥३८॥

दिग्भास्करा मनुमिताश्च शनौ शशिद्वि-
नागा दिशो भवदिवाकरसम्मिताश्च।
दुष्टः क्षणः कुलिककण्टककालवेलाः
स्युश्चार्धयामयमघण्टगताः कलांशाः ॥३९॥

पीयूषधारा—सूर्ये इति। दिगिति। रविवारे षष्ठसप्तमाष्टमदशमचतुर्दशसंख्या मुहूर्ता निन्द्याः। सोमवारे चतुर्थषष्ठाष्टमनवमद्वादशत्रयोदशचतुर्दशमुहूर्ता निन्द्याः। भौमे द्वित्रिचतुःषड् दशसंख्या मुहूर्ता निन्द्याः। बुधे द्विचतुरष्टनवदशचतुर्दशसंख्या मुहूर्ता निन्द्याः। गुरौ विषड्द्वादशचतुर्दशपञ्चदशषोडशसंख्या मुहूर्ता निन्द्याः। शुक्रे चतुःपञ्चषण्नवदशद्वादशचतुर्दशसंख्या मुहूर्ता निन्द्याः। शनौ एकद्विवसुदशैकादशद्वादशसंख्यका मुहूर्ता निन्द्याः। एषु मुहूर्तेषु केषुचित् दुष्टक्षणो दुर्मुहूर्तो ज्ञेयः। केषुचित्कुलिककण्टककालवेलाः स्युः केषुचिदर्धयामयमघण्टाः स्युः। तत्प्रमाणमाह—कलांशा इति। कलांशा षोडशांशाः। दिनस्येति शेषः। यस्मिन्दिने कुलिकादिजिज्ञासा तद्दिने यद्दिनमान तत्षोडशभिर्भाज्यं यल्लब्धं घटीपलात्मकं तन्मुहूर्तपरिमाणं तेषु मुहूर्तेषु यथासम्भवं दुमुहूर्तादयो दोषा ज्ञातव्याः। तथा हि रवौ चतुर्दशसंख्यो मुहूर्तो दुर्मुहूर्तः कुलिकश्च षष्ठः कण्टकसंज्ञः सप्तमाष्टमावर्धयामाख्यौ। तत्राष्टमः कालवेलाख्यश्च दशमो यमघण्टाख्यः। एवं सोमवारादिष्वपि बोद्धव्यम्। तत्र कुलिककण्टककालवेलायमघण्टज्ञानं पूर्व-

श्लोकेऽप्यधायि । दुमुहूर्तार्धयामान्विवाहप्रकरणे 'रवावर्यम' इत्यादिना वक्ष्यति ननु दुर्मुहूर्तकुलिकादेर्वाचनिकस्यार्थस्य 'सूर्ये पट्स्वर' इत्यादिलघुप्रकारेणाभिधानात्पूर्वं परस्ताच्च पुनर्ग्रन्थोक्तप्रकाराभिधानमुक्तं प्रतिभाति । केचिद्दृष्टान्तार्थमिदमभिधानम् । तथा हि ग्रन्थेषु दुर्मुहूर्तकुलिककण्टककालवेलार्धयामयमघण्टानां श्लोकपट्केनाभिधानात् व्याख्यानगम्यार्थत्वाच्चेति गौरवम् । अत्र तु सर्वमप्यर्थं शब्दतः सङ्क्षिप्य श्लोकद्वयेन व्याख्यानानपेक्षमभिधानमिति लाघवमिति दृष्टान्तदर्शनद्वारा सर्वत्र लाघवप्रकरणसूचनार्थं शिष्याणामत्र ग्रन्थपठनादरातिशयार्थं च पुनरुक्तिः । ॥३८-३९॥

पीताम्बरा—कुलिकादि ज्ञान प्रकार—जिस दिन दुर्मुहूर्त (कुलिकादिकों को जानने के लिए) ज्ञान करना अपेक्षित है, उस दिन के दिनमान में १६ का भाग देकर लब्ध घटी-पल एक मुहूर्त का मान होता है । जैसे रविवार को १४वाँ मुहूर्त कुलिक होता है । इसलिए इसका समय जानना हो तो शुभ संवत् २०२८ चैत्रशुक्ल द्वितीया रविवार के दिन काशी में दिनमान ३०।२६ दिया है । ३० घटी २६ पल में १६ का भाग देने से—

```
१६ ) ३०।२६ ( १            १६ ) ८६६ ( ५४
     १६                         ८०
     ---------                  ---
     १४ × ६०                     ६६
       = ८४०                     ६४
          २६                    ---------
         ----                    २ × ६०
         ८६६                     १२० ( ७
                                 ११२
                                 ---
                                   ८
```

अर्थात् १ घटी ५४ पल एक मुहूर्त का मान हुआ । इसलिए १।५४।७ × १४ = २६।३७ अर्थात् सूर्योदय से तेरहवें मुहूर्त की समाप्ति २४ घटी ४२ पल से २६ घटी ३७····पल तक कुलिक नामक मुहूर्त रविवार के दिन सिद्ध होता है । दिनमान में ८ का भाग देकर वारेश से गणना करते हुए आठवाँ भाग निरीश होता है और शनि का भाग गुलिक होता है । गुलिक और कुलिक एक ही अर्थ के द्योतक हैं । जैसे दिनमान ३०।२६ ÷ ८ = ३।४८।१५ यह दो मुहूर्त का मान होता है । रविवार से शनिवार तक की संख्या ७ होती है । इसलिए सूर्योदय से ३।४८।१५ × ७ = २६।३७····घटी तक गुलिक का मान हुआ । ३।४८।१५ ÷ २ = १ मुहूर्तमान = १।५४।७····होता है । इसलिए सूर्योदय से २६।३७ – १।५४···· = २४ घटी ४२ पल से २६ घटी ३७ पल तक पूर्व तुल्य कुलिक मुहूर्तमान के तुल्य गुलिक का इष्टकाल स्पष्ट सिद्ध होने से प्राचीन आचार्यों की गुलिक संज्ञा कुलिक शब्द से समान अर्थ में सिद्ध होती है ।

प्रसंगागत विचार से अलम् । आगे यहाँ पर

रविवार के दिन ६, ७, ८, १०, १४ वें

सोमवार के दिन ४, ६, ८, ९, १२, १३ वें

मंगलवार के दिन १, ३, ४, ६, १० वें
बुधवार के दिन २, ४, ८, ९, १०, १४, वें
गुरुवार के दिन २, ६, १२, १४, १५. १६ वें
शुक्रवार के दिन ४, ५, ६, ९, १०, १२, १४ वें
शनिवार के दिन १, २, ८, १०, ११, १२ वें

दिनमान के ये उक्त कलांश दिनमान के १६ वें विभाग, दुष्टक्षण—कुलिक, कण्टक, कालवेला, अर्धयाम, यमघण्ट, अदिक दुर्मुहूर्त शुभ कर्म में त्याज्य हैं।

सर्वत्र लाघव के लिए उदाहरण द्वारा शिष्यों की स्मृति में विपयज्ञान स्पष्ट स्थिर रखने के अभिप्राय से उक्त मुहूर्त परिगणित किए गए हैं, अतः यहां पर पुनरुक्ति दोप नहीं समझना चाहिए ॥३८-३०॥

अथ विवाहादिशुभकृत्ये होलिकाष्टकनिषेधमनुष्टुभाह—

विपाशैरावतीतीरे शुतुद्र्याश्च त्रिपुष्करे।
विवाहादिशुभे नेष्टं होलिकाप्राग्दिनाष्टकम् ॥४०॥

पीयूषधारा—विपाशेति। विपाशा नदी इरावती चैते नद्यो पश्चिमदेशे प्रसिद्धे। एतयोर्नद्यो-स्तीरवर्तिदेशेपु तथा त्रिपुष्कराख्ये च होलिका फाल्गुनपौर्णमास्यामग्निदाहः ततः प्राक्‌दिनाष्टकं विवाहादिशुभकृत्ये नेष्टं निपिद्धमित्यर्थः। अत्र तावद्धोलिकाष्टकनिपेधः शीघ्रबोधे —'शुक्लाष्टमीं समारभ्य फाल्गुनस्य दिनाष्टकम्। पूर्णिमावधिकं त्याज्यं होलाष्टकमिदं शुभे ॥'[1] इति।

एतद्दोषापवादः—

अस्यापवादोऽपि तत्रैव--'शुतुद्र्वां च पिपाशायामैरावत्यां त्रिपुष्करे। होलाष्टकं विवाहादौ त्याज्यमन्यत्र शोभनम् ॥' इति ४०॥

पीताम्बरा—होलाष्टकादि दोष—विपाशा (व्यास) इरावती, शतद्रु (सतलज) नदियों के तीरवर्ती देशों तथा त्रिपुष्कर देश (अजमेर आदि) में, होलिकाष्टक दोप, फाल्गुन शुक्ल पूर्णमा (होलिका दहन-तिथि) से पहिले के आठ दिन विवाह आदिक शुभ कर्म में वर्जित हैं।

ये नदियाँ पञ्जाब प्रान्त की हैं। इनमें व्यास, रावी और सतलज....आदि नदियों के समीप के, धवलपुर, लुधियाना,शिमला, फिरोजपुर, गुरुदासपुर, होशियारपुर, कांगड़ा कपूरथला आदिक नगर या देशों में होलिकाष्टक दोष प्रायः विवाहादि शुभ कार्यों में ही वर्जित हैं ॥४०॥

अथ मृत्युयोगादिदुष्टयोगपरिहारमाह—

मृत्युक्रकचदग्धादीनिन्दौ शस्ते शुभाङ्गगुः।
केचिद्यामोत्तरं चान्ये यात्रायामेव निन्दितान् ॥४१॥

पीयूषधारा—मृत्विति। मृत्युवो मृत्युयोगा आनन्दादिष्वष्टाविंशतियोगेषु 'दास्रादर्क' इत्यादिना प्रागुक्ताः। क्रकचः—'षष्ठयादितिथो मन्दाद्विलोमम्' इत्युक्तः। दग्धयोगः—सूर्येशप-ञ्चाग्निरसाष्टनन्दा' इत्युक्तः। आदिशब्देन विषयोगाश्च गृह्यन्ते। चन्द्रे शस्ते समीचीने सति।

समीचीनत्वं गोचरप्रकरणे वक्ष्यते। मृत्युक्रकचदग्धादीन् शुभानिष्टफलमपास्य शुभफलदान् जगुरूचुः। यदाह राजमार्तण्डः–'क्रकची मृत्युयोगाख्यो दिनं दग्धं तथैव च। चन्द्रे शुभे क्षयं यान्ति वृक्षा वज्रहता इव ॥'[१] इति। अथ केचिदाचार्या यामोत्तरं मृत्युक्रकचदग्धादीन् शुभाञ्जगुः। तथा च दीपिकायां राजमार्तण्डः–'उत्पाते यमघण्टे च काणे च क्रकचे तथा। तिथौ दग्धे च काले च प्राग्यामात्परतः शुभम् ॥' इति।

अथान्ये आचार्या मृत्युक्रकचदग्धादीन् यात्रायामेव निन्दितान् जगुः विवाहादीनि तु प्रतिषेधा- भावादवश्यं कार्याणि। यदाह लल्लः–'वारर्क्षतिथियोगेषु यात्रामेव विवर्जयेत्। विवाहादीनि कुर्वीत गर्गादीनामिदं वचः ॥' इति। वारर्क्षतिथियोगेषु निन्द्येष्विति शेषः ॥४१॥

पीताम्बरा–चन्द्र शुद्धि की महत्व—गोचर प्रकरण में वर्णित चन्द्रमा की शुद्धि यदि हो तो मृत्यु क्रकच दग्ध आदि पद से विषयोग और हुताशन योगों का अनिष्ट फल दूर हो जाता है। चन्द्रमा की शुभ स्थिति वश उक्त योग शुभफलद हो जाता है।

कुछ आचार्यों का मत हैं कि उक्त योगों का एक प्रहर समय बीत जाने पर शेष समय शुभ ही होता है। कुछ आचार्य उक्त योगों का अनिष्ट फल मात्र "यात्रा में ही होता है", ऐसा निर्देश करते हैं ॥४१॥

अथ पुनरप्यपवादं भुजङ्गप्रयातेनाह—

अयोगे सुयगोऽपि चेत्स्यात्तदानीमयोगं निहत्यैष सिद्धिं तनोति।
परे लग्नशुद्धया कुयोगादिनाशं दिनार्धोत्तरं विष्टिपूर्वं च शस्तम् ॥४२॥

पीयूषधारा—अयोग इति। अयोगे क्रकचादौ सति सुयोगः सिद्धियोगोऽपि चेत्स्यात्तदा एष सिद्धियोगः अयोगं अयोगफलं निहत्य सिद्धि कार्यसिद्धिं तनोति निष्पादयति। यदाह राजमार्तण्डः–'अयोगः सिद्धियोगश्च द्वावेतौ भवतो यदि। अयोगो हन्यते तत्र सिद्धियोगः प्रवर्तते ॥'[१] इति। अन्यच्च–'हन्त्यमृताख्यो योगः सर्वाण्यशुभानि लीलया नियतम्। न भवति पुनरिह शक्तो वैधृति-विष्टिव्यतीपाते' इति। यत्तु दीपिकाकारवचनम्–'यदि विष्टिर्व्यतीपातो दिनं वाप्यशुभं भवेत्। हन्यतेऽमृतयोगेन भास्करेण तमो यथा ॥' इति। तदमृतयोगस्यातिप्राश- स्त्यसूचनार्थं न तु भद्राव्यती-पातादिदोषापवादकं। 'हन्त्यमृताख्यो योग' इत्येकवाक्यतावलात्। अथ परे आचार्या लग्नशुद्धया समीचीनलग्नबलेन कुयोगानां मृत्युक्रकचादीनां नाशं वदन्तीति- शेषः। यदाह स एव–'यत्र लग्नं विना कर्म क्रियते शुभसंज्ञकम्। तत्र तेषामयोगानां प्रभावाज्जा यते फलम् ॥'अथावश्यकशुभकृत्ये कालान्तरप्रतीक्षऽयोग्यतायां परिहारमाह। विष्टिपूर्वे विष्टि- भंद्रा तत्पूर्वं तदादिव्यतीपातादिकं दिनार्धो-त्तरं मध्याह्नादनन्तरं शस्तं प्राहुः। अर्थान्मध्याह्नं यावत्कालो निषिद्धः। 'विष्टिरङ्गारकश्चैव व्यती-पातश्च वैधृतिः। प्रत्यरं जन्मनक्षत्रं मध्याह्नात्परतः शुभम् ॥' इति तेनैवोक्तत्वात् ॥४२॥

पीता०–सिद्धियोग का माहात्म्य—क्रकच–दग्ध–विषाख्य दुष्टयोगों के दिन यदि सिद्धि- योग भी आ जाय तो दुष्टयोगों के दुष्टफलों का सम्यक् उच्छेद कर सिद्धि आदिक योग शुभ ही फल देते हैं।

उक्त दुष्ट योगों के परिहार के लिए दूसरा भी पक्ष है। जब कि शुभ कार्यों में लग्नादि द्वादश भावों में ग्रहों की सुन्दर समीचीन संस्थिति हो तो शुभ कार्यों में अशुभ फल देनेवाले उक्त दुष्टयोग अशुभ फल देने में प्रभावशून्य हो जाते हैं।

भद्रा (विष्टि) व्यतिपात आदिक जिस दिन हों उस दिन का मध्याह्न से आगे का समय शुभ कार्यों में ग्रहण किया जा सकता है। भद्रा सम्बन्धी दिन का पूर्वार्द्ध (मध्याह्न से पहले का समय) तो शुभ कार्य में अग्राह्य ही होता है ॥ ४२ ॥

अथ भद्रानिषिद्धेति पूर्वमुक्तं तदधुना प्रस्तावात्तन्निषिद्धकालं शालिनीछन्दसाह—

शुक्ले पूर्वार्धेऽष्टमीपञ्चदश्योर्भद्रैकादश्यां चतुर्थ्यां परार्धे।
कृष्णेऽन्त्यार्धे स्यात्तृतीयादशम्योः पूर्वे भागे सप्तमीशम्भुतिथ्योः ॥ ४३ ॥

पी० धा०—शुक्ल इति ॥ शुक्लपक्षेऽष्टम्यां च पूर्णिमायां च पूर्वार्धे भद्रा भवति, एकादश्यां चतुर्थ्यां चोत्तरार्धे भद्रा। अथ कृष्णे कृष्णपक्षे तृतीयायां दशम्या चान्त्यार्धे भद्रा स्यात्। सप्तम्यां शंभुतिथौ चतुर्दश्यां च पूर्वभागे पूर्वार्धे भद्रा स्यात्। पूर्वे इति। 'पूर्वादिभ्यो नवभ्यो वा' इत्यस्मिनभावपक्षे रूपं। अष्टम्यादीनां तिथीनां गतभोग्यघटिकायोगार्धं भद्राप्रमाणमिति यावत्। 'तिथेर्गतैष्यैक्यदलं तन्मानं करणं भवेत्' इति वोपदेवोक्तेः। 'तिथ्यर्धभागं सर्वेषां करणानां प्रकल्पयेत्' इति सूर्यसिद्धान्तोक्तेश्च। उक्तं च दीपिकायाम्—'तृतीयदशमीशेषे तत्पञ्चम्योस्तु पूर्वतः। कृष्णे विष्टिः सिते तद्वत्तासां परतिथिष्वपि ॥' इति। बृहस्पतिना तु स्पष्टमुक्तम्—'सिते चतुर्थ्यामन्त्यार्धमष्टम्याद्यार्धमेव च। एकादश्यां परार्धे तु पूर्वार्धे पूर्ण शीतगौ ॥ कृष्णे तृतीयान्त्यार्धं हि सप्तम्याद्यार्धमेव च। दशम्यामुत्तरार्धे तु चतुर्दश्यर्धमादितः ॥ विष्टचाख्योयं महादोषः कथितोऽत्र समस्तगः। तदानीं कृत्सकर्म कर्त्रा सह विनश्यति ॥' इति। पूर्णशितगौ पूर्णिमायाम्।

भद्रानामानि तत्स्वरूपञ्च रत्नकोशे प्रत्येकं भद्रानामानि—हंसी नन्दीन्यपि च त्रिशिराः सुमुखी करालिकाश्चैव। वैकृति रौद्रमुखी च चतुर्मुखी विष्टयः क्रमशः ॥' चतुर्थ्यादितिथिसम्बन्धिभद्रानामाभिधानं नाम सादृश्येन फलतारतम्यसूचनार्थम्। भद्रास्वरूपं रत्नमालायाम्—'उद्बद्धोद्भटतरपीडिताऽतिकृष्णा दंष्ट्रोग्रापृथुहनुगण्डदीर्घनासा। कार्यघ्नी हुतवहनं समुद्गिरन्ती विश्वान्तः पतति समन्ततोऽत्र विष्टिः ॥' इति ॥४३॥

पीता०—भद्रा ज्ञान—शुक्लपक्ष की अष्टमी और पूर्णिमा के पूर्वार्ध तथा चतुर्थी और एकादशी के उत्तरार्ध में भद्रा (विष्टि) करण होता है। कृष्णपक्ष की तृतीया दशमी के पूर्वार्ध में तथा सप्तमी और चतुर्दशी के पूर्वार्ध में भद्रा होती है। तिथि का पूरा मान निकालकर उसमें दो का भाग देने से आधा पूर्वार्ध और आधा उत्तरार्ध होता है। जैसे यदि अष्टमी तिथि का पूरा मान ६४ घटी हो तो जिस समय सप्तमी समाप्त हो रही हो उस समय से अष्टमी तिथि के पूर्वार्ध की ३२ घटी तक भद्रा समझनी चाहिए।

"रत्नकोश" ग्रन्थ में भद्रा के नाम और नाम सदृश फल भी बताया गया है। ये नाम क्रमशः (१) हंसी (२) नन्दीनि, (३) त्रिशिरा, (४) सुमुखी, (५) करालिका, (६) वैकृति, (७) रौद्रमुखी, (८) चतुर्मुखी।

(१) हंसी, (२) नन्दिनी, (३) त्रिशिरा, (४) सुमुखी, (५) करालिका, (६) वैकृति, (७) रौद्रमुखी, (८) चतुर्मुखी। अर्थात् श्लोक में कथित तिथियों के पूर्वार्ध व परार्ध में क्रमशः भद्रा के उक्त नाम समझने चाहिए। जैसे शुक्लपक्ष अष्टमी पूर्वार्घ की भद्रा का नाम हंसी पूर्णिमा के पूर्वार्घ की भद्रा का नाम नन्दिनि इत्यादि क्रम से भद्रा के नाम भी समझने चाहिए ॥४३॥

अथ चतुर्थ्यादितिथिभद्रायां मुखपुच्छविभागादिकं शार्दूलविक्रीडितेनाह—

पञ्चद्व्यद्रिकृताष्टरामरसभूयामादिघटचः शरा
विष्टेरास्यमसद्गजेन्दुरसरामाद्र्यश्विबाणाब्धिषु।
यामेष्वन्त्यघटीत्रयं शुभकरं पुच्छं तथा वासरे
विष्टिस्तिथ्यपरार्धजा शुभकरी रात्रौ तु पूर्वार्धजा ॥४४॥

पीयूषधारा पञ्चेति। चतुर्थ्यादितिथिनां क्रमशः पञ्चादिप्रहरेषु शराः पञ्च नाडयः आदिमा विष्टेर्भद्राया आस्यं सुखं। यथा चतुर्थ्याः पञ्चमप्रहर आदिभूताः पञ्च घटचो भद्रामुखम्। एवमष्टम्या द्वितीयप्रहरे एकादश्याः सप्तमप्रहरे पौर्णमाश्याश्चतुर्थप्रहरे, तृतीयाया अष्टमप्रहरे, सप्तम्यास्तृतीयप्रहरे, चतुर्दश्याः प्रथमप्रहरे, भद्रामुखमित्यर्थः। तद्भद्राया मुखमसदशुभमित्यर्थः। अथ पुनश्चतुर्थ्यादितिथीनां क्रमेण गजादिप्रहरेषु अन्त्यं अन्ते भवमन्त्यम्। 'दिगादिभ्यो यत्' इति यत्। घटीत्रयं पुच्छं पुच्छ संज्ञं तच्छुभकरं समस्तकार्येष्वित्यर्थः। यथा चतुर्थ्या अष्टमप्रहरस्यान्त्यघटीत्रयं भद्रापुच्छं एवमष्टम्याः प्रथमहरस्य एकादश्याः षष्ठप्रहरस्य पूर्णिमायास्तृतीयप्रहरस्य तृतीयायाः सप्तमप्रहरस्य सप्तम्यार्द्वितीयप्रहरस्य दशम्याः पञ्चमप्रहरस्य चतुर्दश्याश्चतुर्थप्रहरस्यान्त्याघटीत्रयं भद्रापुच्छमित्यर्थः। यदाह गुरुः—'भूतदस्रस्वरांभोधिवसुवन्हयङ्गरूपकाः। यामेष्वेषु क्रमादास्यं भवेत्तिथ्यर्धविष्टिषु ॥' इति। व्यवहारसमुच्चये—'दशम्यामष्टम्यां प्रथमघटिकापंचकपरं हरिद्युः सप्तम्या द्विदश १२ घटिकान्ते त्रिघटिकम्। तृतीया राकायां खयम २० घटिकाभ्यः परभवं शुभं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमे ॥' इति। हरिद्युरेकादशी राकापूर्णिमा। ननु भद्रा देवतेत्यभिधीयते तस्याः पुच्छकथनात्तु पशुत्वसिद्धिदृश्यते देवता च कथं पशुर्भवितुमर्हतीति। सत्यम्। दैत्येन्द्रैर्देवेषु पराजितेषु रुद्रस्य ज्वालामालाकुलनेत्रालोकितशरीराद्देवी भद्रासंज्ञा मुखपुच्छादिमत्युत्पन्ना सती दैत्याञ्जघान। यदुक्तं श्रीपतिना—

'दैत्येन्द्रैः समरेऽमरेषु विजितेष्वीशः क्रुधा दृष्टवान्
स्वं कार्यं किल निर्गता खरमुखी लाङ्गूलिनी च त्रिपात्।
विष्टिः सप्तभुजा मृगेन्द्रगलका क्षामोदरी प्रेतगा
दैत्यघ्नी मुदितैः सुरैस्तु करणप्रान्ते नियुक्ता सदा ॥' इति।

चलकरणानि तत्र भद्रा—

करणान्याह गर्गः—'ववं च वालवं चैवं कौलवं तैतिलं गरम्। वणिजं विष्टिमित्याहुः करणानि चराणि तु ॥' इति। विष्टिर्भद्रा। 'अन्ते कृष्णचतुर्दश्याः शकुनिर्दर्शभागयोः।

नागभं किंस्तुघ्नं प्रतिपद्दले ॥' इति । अतस्तिथ्यर्धभोगः करणमित्युक्तेः प्रतिपत्पूर्वार्धे स्थिरकरणं किंस्तुघ्नं ततो ववकरणं प्रतिपद्द्वितीयार्धे । बालवकौलवकरणे द्वितीयायाः पूर्वोत्तरार्धयोः । तैतिलगरकरणे तृतीयापूर्वोत्तरार्धयोः । चतुर्थीपूर्वार्धे वणिक् उत्तरार्धे तु भद्रा । एवं पञ्चमीषष्ठीसप्तमीषु ववबालवकौलवतैतिलगरवणिक्करणानि भवन्ति । ततोऽष्टम्याद्यर्धे भद्रा भवति । एवं पुनः पुनरावृत्तावुक्ततिथिषु भद्रा ज्ञेयाऽत एवोक्तम् 'शुक्ले पूर्वार्धेऽष्टमीपञ्चदश्योः' इत्यादि । एवं चतुर्दश्याः पूर्वार्धे भद्रा । उत्तरार्धादारभ्य शकुन्यादीनि स्थिरकरणानि चत्वारि ।

भद्राकृत्यम्—

भद्राकृत्यमाह वसिष्ठः—वधबन्धविषाग्न्यस्त्रच्छेदनोच्चाटनादि यत् । तुरङ्गमहिषोष्ट्रादिकर्म विष्टयां तु सिद्धयति ॥ न कुर्यान्मङ्गलं विष्टयां जीवितार्थी कदाचन । कुर्वन्नज्ञस्तदा क्षिप्रं तत्सर्वं नाशतां व्रजेत् ॥' इति ।

भद्राङ्गविभागः फलञ्च—

तत्राङ्गविभागः फलं च कश्यपसंहितायाम्—'मुखे पञ्च गले त्वेका वक्षस्येकादश स्मृताः । नाभौ चतस्रः षट् कट्यां तिस्रः पुच्छे तु नाडिकाः ॥ कार्यहानिर्मुखे मृत्युर्गले वक्षसि निःस्वता । कट्यामुन्मत्तता नाभौ च्युतिः पुच्छे ध्रुवो जयः ॥' इति ।

तत्र नाडीभेदे विशेषः—

अयं च भद्राङ्गविभागो नाडीनां त्रिंशतोक्तः । त्रिंशतो न्यूनाधिकत्वे तु त्रैराशिकेन मुखादीनामङ्गानां विभागज्ञानम् । यथा यदि नाडीत्रिंशता इदमुक्तमङ्गपरिमाणं तदेष्टपरिमाणेन किमिति त्रैराशिकं । एवं सति उक्ताङ्गपरिमाणं भद्राभोगमितघटीभिः संगुण्यं त्रिंशता भाज्यं लब्धं समोऽङ्गविभागः त्रैराशिकस्वरूपं लीलावत्यामुक्तम्—'प्रमाणमिच्छा च समानजाती आद्यन्तयोस्तत्फलमन्यजाति । मध्ये तदिच्छाहतमाद्यहृत्स्यादिच्छाफलं व्यस्तविधिर्विलोमे ॥' इति ।

भद्रामुखादिकालः—

तत्र मुखादिकालो रत्नमालायाम्—'जलशिखिशशिरक्षःशर्वकीनाशवायुत्रिदशपतिककुप्सु प्रोक्तमास्यं हि विष्टेः । नियतमृषिभिराशासंख्ययामक्रमेण स्फुटमिह परिहार्यं मङ्गलेष्वेतदेव ॥' इति । जलं वरुणः कीनाशो यमः । शुक्लचतुर्थ्या उत्तरार्धे पश्चिमदिशि भद्रामुखं तच्चाशासंख्यया क्रमेण पञ्चमे प्रहरे भवति । अर्थादेव भद्रायाः प्रहरचतुष्टयाधिकस्थितिभावादान्ते एव घटिकात्रयं पुच्छम् । ततोऽष्टम्यां द्वितीयप्रहरे तेन प्रकारेण आग्नेय्यां दिशि मुखम् । मुखाच्च प्राक् पुच्छमिति प्रथमप्रहरान्त एव पुच्छघटिकामित्येवं सर्वास्वपि भद्रातिथिष्ववगंतव्यम् ।

तत्प्रयोजनम्—

प्रयोजनपि तत्रैव 'मनुवसुमुनितिथियुगदशशिवगुणसंख्यासु तिथिषु पूर्वस्याः । आयाति विष्टिरेषा पृष्ठे शुभदा पुरस्त्वशुभा ॥' इति । तदेतदात्ययिककार्यसम्भवे सति मुखदिक्सम्मुखयात्रानिषेधकमवधेयम् । ग्रन्थान्तरे अन्यदप्युक्तम्—'असिते सर्पिणी ज्ञेया सिते विष्टिस्तु वृश्चिकी । सर्पिण्यास्तु मुखं त्याज्यं वृश्चिक्याः पुच्छमेव च ॥' इति ।

परिहारः—

अथ परिहारमाह—तथेति । विष्टिस्तिथ्यपरार्धजा तिथ्युत्तरार्धे सम्भूता वासरे दिवसे यदि स्याद्भद्रा तदा शुभकरी । तेनैव प्रकारेण तिथिपूर्वार्धजा रात्रौ भद्रा चेत्स्यात्तदा शुभा शुभकरी स्यात् । उक्तं च—'रात्रिभद्रा यदाऽह्नि स्याद्दिवाभद्रा यदा निशि । न तत्र भद्रादोषः स्यात्सा भद्रा भद्रदायिनी ॥' इति । रात्रिभद्रा तिथ्युत्तरार्धोद्भवा, दिवाभद्रा तिथिपूर्वार्धोद्भवा' । अमुमर्थं स्पष्टमाह गुरुः—'निशि पूर्वार्धजा विष्टिर्दिवा चापरतः शुभा । क्रमागता तु या विष्टिः सैव हालाहलोपमा ॥' इति । लल्लोऽपि–'दिवा परार्धजा विष्टिः पूर्वार्धोत्था यदा निशि । तदा विष्टिः शुभायेति कमलासनभाषितम् ॥' ब्रह्मसिद्धान्तेऽपि—'दिवापरार्धजा विष्टिर्विष्टिरेव दिवानिशोः । सा त्याज्या त्वन्यथा विष्टिः सर्वकर्मशुभप्रदा ॥' इति । ननु यत्तु नारदकश्यपादिभिरुक्तम्—'करणानि बवादीनि शुभसंज्ञानि षट् क्रमात् । क्रमायाताक्रमायाता विष्टिर्नेष्टा तु मङ्गले ॥' इति । अत्र क्रमायाता दिवारात्रिक्रमायात दिवाभद्रा रात्रौ रात्रिभद्रा च दिवेत्यर्थः । एवं सति द्विविधाया अपि भद्राया दोषवत्त्वोक्तेः पूर्वोक्तपरिहाराभिधानमयुक्तम् । उच्यते । इदमेव क्रमायातेति वचनं ज्ञापकमुक्तार्थस्य । अन्यथा सामान्यतो भद्रा दुष्टेत्युक्ते द्विविधभद्राया दोषवत्त्वसिद्धेरनर्थकमिदं स्यात् । तस्माच्छुभकार्याणां भद्रारूपदुष्टदिनव्यतिरिक्तकालप्रतीक्षायोग्यत्वे तदेव कार्यं न दुष्टदिने । 'अबाधेनोपपत्तौ बाधो न न्याय्यः' इति न्यायाद्वचनस्य निषेध एव तात्पर्याच्च । अवश्यकर्तव्यस्य तु शुभकर्मणः कालान्तरप्रतीक्षामसहमानस्य इति परिहारमाश्रित्य दुष्टदिने कृतिरुचितैव । 'विष्टिरङ्गारकश्चैव' इत्यपि परिहार एतत्पर एवेत्यलं पल्लवितेन ॥४४॥

पीताम्बरा–भद्रा मुख और पुच्छ—चतुर्थी आदिक तिथियों में "भद्रा का मुख और पुच्छ किन-किन प्रहरों में होता है" उन प्रहरों का उल्लेख किया जा रहा है । जैसे, शुक्लपक्ष की चतुर्थी तिथि की पाँचवीं प्रहर के आदि की ५ घटी में भद्रा का मुख होता है । इस प्रकार अष्टमी के दूसरे प्रहर में, एकादशी के सातवें प्रहर में, पौर्णमासी के चतुर्थ प्रहर और कृष्णपक्ष की तृतीया में आठवें प्रहर, सप्तमी के तीसरे प्रहर, दशमी के छठे प्रहर और चतुर्दशी के प्रथम प्रहर की आदि की ५ घटियों में भद्रा का मुख होता है, जो शुभ कार्यों में अशुभ होता है ।

शुक्लपक्ष की पुनः चतुर्थी तिथि के अष्टम प्रहर की अन्त्य की, अष्टमी के प्रथम प्रहर के, एकादशी के छठे प्रहर की, पूर्णिमा के तीसरे प्रहर की और कृष्णपक्ष की तृतीया के सप्तम प्रहर की, सप्तमी के द्वितीय प्रहर की, दशमी के पांचवें प्रहर की और चतुर्दशी के चौथे प्रहर के अन्त्य की ३ घटियों में भद्रा का पुच्छ होता है जो शुभ कहा गया है । तिथि के सम्पूर्ण मान (भोग घटी) में आठ से विभक्त लब्धि का मान गत प्रहर होता है ।

$$\text{तिथिभोग} \div ८ = \text{लब्धि} + \frac{\text{शेष}}{८} \quad \text{गत प्रहर । गत प्रहर} + १ = \text{वर्तमान प्रहर ।}$$

दिन की भद्रा यदि तिथि के उत्तरार्ध की हो (कृष्णपक्ष की तृतीया, दशमी और शुक्लपक्ष में एकादशी, चतुर्थी इत्यादि में भद्रा उत्तरार्ध (परार्ध) में होती है) और रात की भद्रा तिथि के पूर्वार्ध की हो (जैसे कृष्णपक्ष की सप्तमी, चतुर्दशी; शुक्लपक्ष की अष्टमी, पूर्णिमा में भद्रा पूर्वार्ध में होती है) तो वह शुभ मानी जाती है ।

ग्रन्थान्तरों में, कृष्णपक्ष की भद्रा का नाम सर्पिणी और शुक्लपक्ष की भद्रा का नाम वृश्चिकी है।

भद्रा तो देवता कही गई है, किन्तु भद्रा का पुच्छ कहने से भद्रा पशु है क्या ? क्योंकि पूँछ तो पशुओं की होती है, इस प्रकार की शंकाओं का समाधान है कि, दैत्यों से पराजित देवताओं की आराधना से रुद्र के ज्वालामालाकुलनेत्रालोकित शरीर से मुख और पूँछवाली भद्रा नाम की देवी का आविर्भाव हुआ जिसने दैत्यों का वध किया, इत्यादि वर्णन पौराणिक कथाओं से स्पष्ट है।

शुक्लपक्ष में क्रमशः ४, ८, ११, १५ और कृष्णपक्ष में क्रमशः ३, ७, १०, १४ तिथियों में भद्रा होती है। नीचे भद्राज्ञान की एक सारिणी दी जा रही है जिससे भद्रा, का मुख, पुच्छ कब कितना है सब स्पष्ट हो जाता है॥ ४४॥

	क्रमशः शुक्लपक्ष की भद्रा तिथियाँ				क्रमशः कृष्णपक्ष की भद्रा तिथियाँ			
परार्ध पूर्वार्ध क्रम से तिथियाँ और भद्रा	परार्ध ४	पूर्वार्ध ८	पराध ११	पूर्वार्ध १५	परार्ध ३	पूर्वार्ध ७	परार्ध १०	पूर्वार्ध १४
उन प्रहरों की संख्या जिनके आदि की ५ घटियों में मुख होता है	५	२	७	४	८	३	६	१
उन प्रहरों की संख्या जिनमें अन्त्य की ३ घटियों में पुच्छ होता है	८	१	६	३	७	२	५	४

अथ भद्रानिवासं तत्फलं चानुष्टुभाह—

कुम्भकर्कद्वये मर्त्ये स्वर्गेऽब्जेऽजात्त्रयेऽलिगे।
स्त्रीधनुर्जूकनक्रेऽधो भद्रा तत्रैव तत्फलम्॥ ४५॥

पीयूषधारा—कुम्भेति। अब्जे चन्द्रमसि कुम्भद्वये कुम्भमीनस्थे कर्कद्वये कर्कसिंहराशिस्थिते सति भद्रा मर्त्ये मनुष्यलोके तिष्ठति। अथ मेषादित्रये मेषवृषमिथुनस्थितेऽलिगे वृश्चिकस्थिते चन्द्रे स्वर्गे भद्रा तिष्ठति। कन्याधनुस्तुलामकरराशिस्थितेऽधः पाताललोके भद्रा तिष्ठति॥ अथ भद्रा तत्रैव मर्त्यस्वर्गपातालेषु फलं स्वोक्तशुभाशुभफलं ददातीत्यपवादद्वारा प्रयोजनमुक्तं भवति। उक्तं—'मेषोक्षकोर्प्यमिथुने घटसिंहमीनकर्केषु चापमृगतौलिसुतासु चन्द्रे। स्वर्मर्त्यनागनगरीः क्रमशः प्रयाति विष्टिः फलान्यपि ददाति हि तत्र देशे॥' इति। भूपालवल्लभे—'कन्यातुलामकरधन्विषु नागलोके मेषालिवैणिकवृषेषु सुरालये स्यात्। पाठीनसिंहघटकर्कटकेषु मर्त्ये चन्द्रे वदन्ति मुनयस्त्रिविधां हि विष्टिम्॥' इति। पाठीनो मीनः॥४५॥

पीताम्बरा–भद्रा निवास—कुम्भ और मीन राशि तथा कर्क और सिंह राशि में जब चन्द्रमा रहता है तब भद्रा मनुष्यलोक में वास करती है। अतः मनुष्यलोक में ही उसका अधिक अशुभ फल होता है।

मेष, वृषभ, मिथुन और वृश्चिक इन चार राशियों के चन्द्रमा में भद्रा स्वर्गलोक में रहती है, इसलिए ऐसी स्थिति मे मनुष्यलोक में भद्रा का अधिक अनिष्ट फल नही होगा ।

कन्या, तुला, धनु और मकर राशियों के चन्द्रमा में भद्रा पाताललोक में रहती है वहीं उसका फल भी होता है ।

जिस दिन कार्य आवश्यक हो और उस दिन भद्रा से कार्य में बाधा पड़ रही हो और यदि उस दिन भद्रा स्वर्ग या पाताल लोक में हो तो आवश्यक कार्य किया जा सकता है । एक प्रकार से यह भद्रा दोष का लघु परिहार है ।।४५।।

एवं महता ग्रन्थसन्दर्भेण पञ्चाङ्गदूषणान्युक्तान्यधुना कालाशुद्धौ निषेध्यवस्तूनि शार्दूलविक्रीडिताभ्यामाह—

वाप्यारामतडागकूपभवनारम्भप्रतिष्ठे व्रता-
रंभोत्सर्गवधूप्रवेशनमहादानानि सोमाष्टके ।
गोदानाग्रयणप्रपाप्रथमकोपाकर्मवेदव्रतं
नीलोद्वाहमथातिपन्नशिशुसंस्कारान् सुरस्थापनम् ।।४६।।
दीक्षामौञ्जिविवाहमुण्डनमपूर्वं देवतीर्थेक्षणं
संन्यासाग्निपरिग्रहौ नृपतिसंन्दर्शाभिषेकौ गमम् ।
चातुर्मास्यसमावृती श्रवणयोर्वेधं परीक्षां त्यजेद्-
वृद्धत्वास्तशिशुत्व इज्यसितयोर्न्यूनाधिमासे तथा ।।४७।।

पीयूष धारा—वाप्यारामेति—दीक्षेति। वापी दीर्घिका, आराम उपवनं, तडागः पुष्करिणी, कूपः प्रसिद्धः, भवनं गृहं एतेषामारंभप्रतिष्ठे आरम्भो निर्माणं, प्रतिष्ठा उत्सर्गः तत्र गृहप्रतिष्ठा गृहप्रवेशो ज्ञेयः व्रतारम्भोत्सर्गौ व्रतानामनन्तशिवरात्रिव्रतादीनामारम्भः। उत्सर्गोऽनन्तव्रतादीनामुद्यापनं । महादानानि षोडशमहादानानि, सोमः सोमयागः, अष्टका अष्टकाश्राद्धं, गोदानं केशान्तसंज्ञं कर्म, आग्रयणं नवान्नेष्टिः, प्रपा जलशाला, 'प्रपा पानीयशालिका' इत्यभिधानात् । महाराष्ट्राः षट्के इति वदन्ति । पहुआ इति कान्यकुब्जाः । प्रथमारभ्यमाणं श्रावणीकर्म, वेदव्रतं महानाम्न्यादित्रयम् । उपनिषद्व्रतं, महानाम्नीव्रतं, वेदव्रतं च । नीलोद्वाहः नीलशब्दवाच्यः काम्यो वृषोत्सर्गः । न त्वेकादशाहे क्रियमाणः तस्य तदैव विहितत्वान्मुहूर्तविचारानुन्मेषः। अतिपन्नशिशुसंस्काराः अतिपन्ना अतिक्रान्ता जातकर्मनामकर्मादयःशिशूनां संस्काराः । दीक्षा मन्त्रग्रहणादिकाः । मुण्डनं चौलं, अपूर्व देवेक्षणं तीर्थेक्षणं च । अग्निपरिग्रहोऽग्निहोत्रमग्न्याधानं; चातुर्मास्यं चातुर्मास्याख्यो यागः, समावर्तनं समावृतिः मौञ्जीमोक्षः, श्रवणयोर्वेधः, परीक्षा तप्तमाषादिरूपा दिव्य मितियावत्। अन्यानि कर्माणि नामतः स्पष्टानि। एतानि सर्वाणि कर्माणि त्यजेन्न कुर्यात् । इज्यसितयोर्बृहस्पतिशुक्रयोर्वृद्धत्वे शिशुत्वे बाल्यें च तथा न्यूनाधिमासे अधिकमासे च न कुर्यात् । अयं च निषेधः प्रथमोपक्रान्तकृत्येषु । न तु नित्यवदारब्धवार्षिकयात्रादौ । अत्र मूलवचानानि लिख्यन्ते । तत्र शुक्रास्तादिषु ज्योतिःसारसागरे कश्चोच्चयः—'वापीकूपतडागपानगमनं क्षौरं प्रतिष्ठाव्रतं विद्यामंदिरकर्णवेधनमहादानं वनं सेवनम् । तीर्थस्नानविवाहदेवभवनं

मन्त्रादिदेवेक्षणं दूरेणैव जिजीविषुः परिहसेदस्तङ्गते भार्गवे ।। बाले शुक्रे वृद् धे जीवे वृद्धे शुक्रे जीवे बाले । जीवे सिंहे सिंहादित्ये जीवादित्ये नष्टे जीवे ।। तथा मलिम्लुचे मासि सुराचार्ये तथास्तगे । वापीकूपतडागादिक्रियाः प्रागुदितास्त्यजेत् ।।' इति । वनमारामादि । सेवनं राजादीनां । नष्टे जीवे नष्टबले नीचस्थिते गुरावित्यर्थः । लल्लः—'उपनयनं गोदान-परिणयनगृहप्रवेशगमनानि । अस्तमितेषु न कुर्यात्सुरगुरुभृगुपुत्रचन्द्रेषु ।।' इति शातातपः—'अस्तङ्गते गुरौ शुक्रे बाले वृद्धे मलिम्लुचे । उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ।।' अस्तमयादिफलमाह बादरायणः—'गुरोरस्ते पतिं हन्याच्छुक्रास्ते चैव कन्यकाम् । चन्द्रे नष्टे उभौ हन्यात्तस्मादस्तं विवर्जयेत् ।।' इति । विवाह इति शेषः । 'बालभावे स्त्रियं हन्याद्वृद्धभावे नरं तथा । तस्माद्बाले च वृद्धे च विवाहं नैव कारयेत् ।।' उपलक्षणमेतत् । एवं व्रतबन्धादिष्वपि कर्तुः मरणं ज्ञेयम् । 'एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापि विनियुज्यते' इति न्यायात् । उक्तं च शार्ङ्गीयविवाहपटले—'विवाहो व्रतबन्धो वा यात्रा वा गृहकर्म च । गुरावस्तमिते शुक्रे ध्रुवं मृत्युं विनिर्दिशेत् ।।' इति । अथाधिमासक्षयमासवर्ज्यानि । तत्र गृह्यपरिशिष्टे—'सोमयागादि-कर्माणि नित्यान्यपि मलिम्लुचे । तथैवाग्रयणाधानचातुर्मास्यादिकान्यपि ।।' महालयाष्टका-श्राद्धोपाकर्माद्यपि कर्म यत् । स्पष्टमासविशेषाख्यविहितं वर्जयेन्मले ।।' इति । गर्गबृहस्पती अपि 'अग्न्याधानं प्रतिष्ठां च यज्ञदानव्रतानि च । वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ।। माङ्गल्यमभिषेकं च मलमासे विवर्जयेत् ।। मरीचिः—'गृहप्रवेशगोदानस्थानाश्रममहोत्सवम् । न कुर्यान्मलमासे तु संसर्पेऽस्पतौ तथा ।।' इति । यदा क्षयमासो भवति तदा पूर्वोत्तरावधिमासौ भवतः । तत्र पूर्वः संसर्पः । द्वितीयोऽहस्पतिः । एतान्यधिकमासक्षय, मासवर्ज्यानि । गुरुशुक्र-योरस्तादावपि वर्ज्यानि । यदाह वृद्धगार्ग्यः—'बाले वा यदि वा वृद्धे शुक्रे वास्तङ्गते गुरौ । मलमास इवैतानि वर्जयेद्देवदर्शनम् ।।' इति । अत्र देवदर्शनमपूर्वं विवक्षितम् । यदाह गर्गः—अपूर्वदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे । मलमासेष्वनावृत्ततीर्थयात्रां परित्यज्येत् ।।' इति । अनावृत्ततीर्थयात्रामपूर्वतीर्थयात्राम् । दीपिका—'नो शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममा-सेष्टमेन्दौ विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मतारासु चाथ । नाडीनक्षत्रहीने सुरगुरुरजनी-नाथताराविशुद्धौ प्रातः कार्या परीक्षा द्वितनुचरगृहांशोदये शस्तलग्ने ।।' इति । गुरुसहितरवौ गुर्वादित्ये इत्यर्थः । इदं सिंहस्थितमकरस्थितास्तमितगुरूणामुपलक्षणम् । उक्तं च व्यवहारो-च्चये—'सिंहस्थे मकरस्थे च जीवे चाऽस्तमिते तथा । मलमासे न कर्तव्या परीक्षा जयकाङ्क्षिणा ।।' इति । मलमासग्रहणं क्षयमासस्याप्युपलक्षणम् । नाडीनक्षत्राणि वैनाशिकनक्षत्राणि । परीक्षा दिव्यम् । अयमत्र तात्पर्यार्थः । अनियतकालविहितानि चूडाकरणवाप्यारामादिशुभ-कृत्यानि गुर्वादेरस्तादिषु सर्वथा न कार्याणि । यानि तु नियतकालानि सीमन्तनामकरणादीनि तानि गुर्वादेरस्तादिसत्त्वेऽपि स्वोक्तकाल एव भवन्ति । 'चतुर्थे गर्भमासे स्यात्सीमन्तोन्नयन-क्रिया । षष्ठेऽष्टमे वा कुर्वीत सूत्रानन्तरविधानतः ।।' इति शौनकादिमुनिवचनेभ्यः कालस्यापि नियामकत्वावगतेः । अत एवाह बृहस्पतिः—'मासप्रयुक्तकार्येषु मूढत्वं गुरुशुक्रयोः । न दोषकृन्मलो मासो गुर्वादित्यादिकं तथा ।।' इति । यमोऽपि—'चन्द्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकम् । कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा ।।' इति । अन्यत्रापि 'सीमन्तजातकादीनि प्राश-नान्तानि यानि वै । न दोषो मलमासस्य मौढ्यस्य गुरुशुक्रयोः ।।' इति । एवं सति प्रतिबन्धव-

शादतिक्रान्तकालेषु जातकर्मादिषु सत्सु गौणकालस्य तुल्यत्वात् । उक्तं च वसिष्ठेन—'अतीतकालान्यखिलानि तानि कार्याणि सौम्यायनगे दिनेशे । सिते गुरौ चाप्यथ दृश्यमाने तदुक्तपञ्चाङ्गदिनेऽप्यखण्डे ॥' इति । अत एवोक्तं अतिपन्नशिशुसंस्कारानिति ॥४६-४७॥

पीताम्बरा—गुरु-शुक्र के अस्तादि समयों में त्याज्य कर्म—वापी (बावली, दीर्घिका) उपवन (बगीचा) पोखरा, कुवाँ और घर (मकान) का निर्माण और उत्सर्ग (प्रतिष्ठा) या गृहप्रवेश, एकादशी, प्रदोष, अनन्त, शिवरात्रि आदिक व्रतों का आरम्भ और उनका उद्यापन, वधूप्रवेश, षोडश महादान, सोमयाग अष्टका श्राद्ध, गोदान (केशान्त कर्म), नवान्न-इष्टि, जलशाला, उपनयन के पश्चात् सर्वप्रथम प्रारम्भ किया जाने वाला श्रावणीकर्म, वेदव्रत, (उपनिषद् व्रत महानाम्नी व्रत) काम्य वृषोत्सर्ग (प्रेत क्रिया में, एकादशाह का वृषोत्सर्ग तो एकादशाह में ही होगा) समय पर नहीं हुए बालकों के जातकर्म, नामकर्मादि संस्कार, देव स्थापन, मन्त्र ग्रहण, मुण्डन (चौल), उपनयन, विवाह, सर्वप्रथम किसी देव या तीर्थ का दर्शन, संन्यास ग्रहण, अग्निहोत्र (अग्न्याधान), राजदर्शन, राज्याभिषेक, प्रथमा यात्रा, चातुर्मास याग समावर्तन (मौञ्जी मोक्षः) कर्णवेध और परीक्षा, (तप्तमाषादिरूपा दिव्य परीक्षा) ये सब कार्य बृहस्पति और शुक्र के बाल, वृद्ध और अस्तंगत की स्थितियों तथा क्षय और अधिक मास में त्याज्य हैं ।

जिस वर्ष में क्षयमास होता है उसी वर्ष में क्षयमास के पूर्व और पर मासों में दो अधिक मास होते हैं । क्षयमास के पूर्व मास का नाम संसर्प और पर मास का नाम अहस्पति होता है । ऐसी स्थितियों में भी पूर्वोक्त कार्य वर्ज्य हैं ।

सीमन्त, जातकर्म, नामकरण, अन्नप्राशनादिक कर्म, गुरु-शुक्र के अस्तादि में भी किये जाने चाहिए । क्योंकि नियतकालीन संस्कारों में उक्त अस्तादि दोष विचारणीय नहीं होता है ॥४६-४७॥

कुछ आचार्यों का मत है कि गुरु के अस्त में जो कार्य वर्ज्य हैं वे बृहस्पति के वक्र और अतिचार में भी वर्जित हैं ॥४६-४७॥

अथ सिंहस्थगुर्वादिदोषान् शालिन्याह—

अस्ते वर्ज्यं सिंहनक्रस्थजीवे वर्ज्यं केचिद्वक्रगे चातिचारे ।
गुर्वादित्ये विश्वघस्रेऽपि पक्षे प्रोचुस्तद्वद्दन्तरत्नादिभूषाम् ॥४८॥

पीयूषधारा—अस्ते वर्ज्यमिति । यदस्ते गुर्वादिरस्ते वर्ज्यमुक्तं तत् सिंहनक्रस्थजीवे सिंहस्थगुरौ मकरस्थगुरौ च वर्ज्यं निषिद्धम् । यदाह वराहः—'उद्यानचूडाव्रतबन्धदीक्षाविवाहयात्रादिवधूप्रवेशः । तडागकूपत्रिदशप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्यात् ॥' इति । देवीपुराणेऽपि—सिंहसंस्थे गुरौ यत्नात्सर्वारम्भान् विवर्जयेत् । प्रारब्धं न च सिध्येत महाभयकरं भवेत् ॥ पुत्रभ्रातृकलत्राणि हन्याच्छीघ्रं न संशयः । कारको व्रजते नाशं सन्तानं म्रियतेऽचिरात् ॥ देवारामतडागश्च प्रपोद्यान-गृहाणि च । विवाहयज्ञोपनयचूडादि च न सिध्यति ॥ यथा सिंहस्थितो जीवस्तथैव मकरस्थितः' इति । त्रिस्थलीसेतौ—'गुर्वादित्ये गुरौ सिंहे शुक्रे वास्तमुपागते । त्यजेद्दानं महादानं व्रतं देवविलोकनम् ॥' इति । लल्लोऽपि—'नीचस्थे वक्रसंस्थेप्यतिचिरणगते बालवृद्धे-

स्तगे वा संन्यासो देवयात्रा व्रतनियमविधिः कर्णवेधस्तु दीक्षा । मौञ्जीबन्धो गणानां परिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते वा ॥' इति । अयमपि निषेधो नियतकालविहितानां न भवति । उक्तं च शार्ङ्गीये-'सीमन्तजातकादीनि प्राशनान्तानि यानि वै । कर्तव्यानि न दोषोऽस्ति पञ्चाननगते गुरौ ॥' इति । उपलक्षणमेतत् । एवं मकरस्थेऽपि कार्याणि शुभानि । क्वचिदपूर्वतीर्थयात्रायां मौढ्यादिदोषाभावोऽभिहितः । त्रिस्थलीसेतौ—'गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये । सुरासुरगुर्वोर्णां च मौढ्यदोषो न विद्यते ॥' वायुपुराणे—'गयायां सर्वकालेषु पिण्डं दद्याद्विधानतः । अधिमासे जन्मदिने ह्यस्ते च गुरुशुक्रयोः ॥ न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि बृहस्पतौ ॥' इति । अत्र श्राद्धस्य यात्रापूर्वकत्वाद् गयायात्रापि न निषिद्धेति ज्योतिर्निबन्धे व्याख्यातम् । गुर्वाद्यस्तस्योपलक्षणत्वात्सिंहस्थगुरावपि गोदावरीयात्रा न निषिद्धेत्याहुः । अन्यच्च—'अधिमासे सिंहगुरावस्ते च गुरुशुक्रयोः । तीर्थयात्रा न कर्तव्या गयां गोदावरीं विना ॥' इति । अत्राधिमासे च जन्मर्क्ष इति पठन्ति तत्र यात्रायां जन्मनक्षत्रस्यातिनिषिद्धत्वाद्गोदावरीगयायात्रयोरपवादो युक्त एव । तथा ग्रहणार्धोदयकपिलाषष्ठीसंक्रान्त्युद्देशेनापूर्वतीर्थयात्रायां कर्तव्यायां शुक्रास्तादिमहादोषो नास्तीत्युक्तम् । त्रिस्थलीसेतौ लल्लेन–उपप्लवे शीतलभानुभान्वोरर्धोदये वा कपिलाख्यषष्ठ्याम् । सुरासुरेज्यास्तमयेऽपि तीर्थयात्राविधिः संक्रमणेऽपि शस्तः ॥' इत्यलमियता । अथ गुर्वाद्यस्ते यद्वर्ज्यमुक्तं तद्वक्रगे गुरावथवातिचारगे गुरौ वर्ज्यम् । यदाह वात्स्यः—'यात्रोद्वाहौ प्रतिष्ठां च गृहचूडाव्रतादिकम् । वर्जयेद्यत्नतश्चैव जीवे वक्रातिचारगे ॥ कीर्तिभङ्गः प्रतिष्ठायां चौरभीतिस्तथाध्वनि । तथोद्वाहे भवेन्मृत्युर्व्रते हानिर्भयं गृहे ॥' इति । क्वचिदस्यापवादोऽभिहितः राजमार्तण्डे—'वक्रातिचारगे जीवे वर्जयेत्तदनन्तरम् । व्रतोद्वाहादिचूडायामष्टाविंशतिवासरान् ॥' इति । मुक्तावल्या त्वतिचारस्यैवापवादः—'अतिचारे सूरपूज्यो भवनाद्भवनान्तरं यदा याति । अष्टाविंशति दिवसान् विवर्जयेत्परिणयं प्रयत्नेन ॥' इति । परिणय इत्युपलक्षणम् । अस्यापवादो दीपिकायां–'त्रिकोणजायाधनलाभराशौ वक्रातिचारेण गुरुः प्रयातः । यदा तदा प्राह शुभं विलग्नं हिताय पाणिग्रहणं वसिष्ठः ॥' इति । अत एव लल्लः—'प्रतिषिद्धो नोद्वाहो वक्रिणि जीवे तथातिचारगते । गोचरबलं प्रधानं लग्नं च पराशरः प्राह ॥' इति । विवाहे एव कर्तव्येऽयमपवाद इति केचित् । न तु यज्ञोपवीतादौ लग्नं च पराशरः प्राहेति सामान्योक्तेः । सर्वस्यापि कर्मणोऽपवाद इत्यन्ये । विशेषमाह लल्लः—'यद्यप्यनुपचयस्थो जीवः कन्याति कालमावहित । गुणवद्वरोपलब्धौ तथापि पाणिग्रहः कार्यः ॥' इति । अथ केचिद्गुर्वादित्ये गुरुसहिते आदित्ये सूर्ये एकराशिगतौ गुरुसूर्याविति यावत् । स गुर्वादित्यस्तस्मिन्नपि सर्वमतोक्तं शुभकर्म वर्ज्यम् । यदाह शौनकः—'एकराशिगतौ सूर्यजीवौ स्यातां यदा पुनः । व्रतबन्धविवाहादिशुभकर्माखिलं त्यजेत् ॥ इति । यत्तु गुरुवचनम् । गुरुक्षेत्रगतो भानुर्भानुक्षेत्रगतो गुरुः । गुर्वादित्यः स विज्ञेयो गर्हितः सर्वकर्मसु ॥' इति । तदविचारितरमणीयम् । तथाहि-गुरुक्षेत्रे धनुर्मीनौ तत्र भानुः सूर्ये गुर्वादित्यस्तदसत् । धनुरर्कस्य दक्षिणायनत्वादेव निषेधसिद्धेः । मीनार्कस्य तु यज्ञोपवीतव्यतिरिक्तकार्यमात्रनिषेधसिद्धेः । तथा भानुक्षेत्रं सिंहस्तत्र गतो गुरुर्गुर्वादित्य इति चेन्न । तत्र सिंहस्थगुरुत्वादेव निषेधसिद्धेः । अतो गणितवशेन यस्मिन्नेव क्षेत्रे भानुस्तस्मिन्नेव राशौ गुरुः स गुर्वादित्य इति तन्न । सम्भवत्येकवाक्यताकरणे भिन्नवाक्यताकरणस्य वैयर्थ्यापत्तेः । ननु गुरोर्बाल्यवृद्धत्वास्तमयानां

पृथक्निषेधोऽनर्थकः गुर्वादित्यनिषेधेनैव सिद्धत्वादिति चेन्मैवं वोचः। राश्यादौ सूर्यः तद्राशेरे-वान्तेऽष्टाविंशत्यंशे गुरुः तत्राष्टाविंशत्यंशानां व्यवधानात्तावद्गुरोरस्ताभावः। कालांशाश्च गुरोरेकादश ११ तदन्तरे ह्यस्तमयत्वोक्तेः। सप्तदशांशान्तरितत्वाच्च वार्धकमपि नास्ति। यतो बाल्यं वार्धकं च परमं पक्ष १५ मात्रं नारदादिभिरुक्तम्। तत्र दिनद्वयमधिकमवशिष्यते। येषां तु दश वा सप्त वा दिनानि बाल्यं वार्धकं चेति पक्षस्तेषामपि सप्त वा दश वा दिनानि बाल्यवार्धकरहितान्यवशिष्यन्ते। तत्र गुर्वादित्यप्रयुक्तोऽपि दोषो यथा स्यादिति वचनारम्भष्टः। एवं बाल्येऽपि द्रष्टव्यम्। नन्वेवं गुर्वादित्य एव तर्हि वक्तव्यो गुरोर्बाल्यवार्धकास्तानां पार्थक्येन दोषाभिधानमनर्थकमिति चेन्न। यदा यत्र राशौ सूर्यस्ततः प्राग्राशौ गुरोरुदयस्तत्र बाल्यदोषः सावकाशः। यदोत्तरराशौ गुरुस्तदा वार्धकदोषः सावकाशः बह्वंशान्तरत्वादस्तमयसम्भावनापि नास्ति। तत्र गुर्वादित्यदोषेण बाल्यवार्धकास्तमयदोषाणां कथं निरासः कर्तुं शक्यः। न हि भिन्नराशिस्थयोरपि गुर्वादित्ययोर्गुर्वादित्यदोषाभिधानं कैश्चिदुक्तम्। तस्मात्प्रागुक्तविषय एव गुर्वादित्यदोषः। यदा त्वेकराशिस्थितत्वं तदा यदि बाल्यवार्धकास्तमयदोषाणां सम्भवस्तदा दोषस्याधिक्यन्यूनतातरतमभावो ध्येयः। तथा हि बृहस्पतेः खलु पञ्चावस्थाः सम्भवन्ति। पूर्वं गुर्वादित्यसंज्ञा साल्पदोषा। ततो यथायथा रविसामीप्यं तथातथा क्षीणताधिक्याद्वार्धकव्यपदेशो गुर्वादित्यव्यपदेशाद्दुष्टफलः। ततः सूर्यातिसान्निध्येनास्तङ्गतत्वेस्तमयाख्यो व्यपदेशः सोऽत्यन्तं दुष्टफलः। ततः पुनरपि कालांशातिक्रमेण रविविप्रकर्षादुदये सति बाल्यत्वव्यपदेशः। प्राक्फलात् किञ्चिन्न्यूनदोषकरः। ततः पुनरपि राश्यन्ते गुर्वादित्यव्यपदेशः। सोऽल्पदोष इति। एवं गुरोर्बाल्यवार्धकदिनानामपि बहुत्वाल्पयोरपि व्यवस्था ध्येया। तथा हि। यदास्तोदयाभ्यां प्राक् पश्चाच्च वार्धकं बाल्यं च पक्षमभिहितं तदा पक्षान्तिमदिनपञ्चकमल्पदोषदम्। यदा तु दशदिनानीति पक्षस्तदा तदन्तिमं दिनत्रयं मध्यमदोषम्। यदा तु सप्तदिनानीति पक्षस्तदा तु महादोष एव। एवं धीमद्भिरत्रापि व्यवस्थाविरोधे सति महादोषाल्पदोषजनिकावश्यकानावश्यकविषयिणी ध्येयेत्यलमतिप्रसङ्गेन। अथ—केचिद्विश्वघस्रेऽपि पक्षे त्रयोदशदिने पक्षे यस्मिन् पक्षे तिथिद्वयह्रासः स त्रयोदशदिनात्मकः पक्षोऽतिनिन्द्यः। तदुक्तं ज्योतिर्निबन्धे— 'पक्षस्य मध्ये द्वितिथी पतेतां तदा भवेद्रौरवकालयोगः। पक्षे विनष्टे सकलं विनष्टमित्याहुराचार्यवराः समस्ताः ॥' ईति। तथा 'त्रयोदशदिने पक्षे तदा संहरते जगत्। अपि वर्षसहस्रेण कालयोगः प्रकीर्तितः ॥' इति। एवंविधे काले सर्वे गुर्वाद्यस्तोक्तं शुभकर्म वर्ज्यं प्रोचुः। तदुक्तं व्यवहारचण्डेश्वरे—'त्रयोदशदिने पक्षे विवाहादि न कारयेत्। गर्गादिमुनयः प्राहुः कृते मृत्युस्तदा भवेत् ॥' इति। विवाहे दम्पत्योश्चौलोपनयनादौ च शिशोर्मृत्युरित्यवधातव्यम्। संस्कार्यतया प्राधान्यात्। ज्योतिर्निबन्धेऽपि 'उपनयनं परिणयनं वेश्मारम्भादिकर्माणि। यात्रां द्विक्षयपक्षे कुर्यान्न जिजीविषुः पुरुषः ॥' इति। अथ प्रसङ्गात्त्रयोदशदिनात्मकपक्षः कथं सम्भवति कथं न सम्भवतीति विचारः प्रस्तूयते। कस्मिंश्चिच्छककाले कस्मिंश्चित्पक्षे प्रतिपत्सोमवारे घटिकैका दशपलाधिका १।१० ततो द्वितीय क्षयोन्मुखत्वात्पक्षस्य सोमवार एवान्तर्हितात् एवावमाख्या जाता घट्यः ५७ पलानि ६, ततः पुनरपचयक्रमेण तिथीनां चतुर्दश्यपि क्षयं गतावमाख्या शुक्रवार एव। ततः शनिवारे पूर्णिमा क्षयोन्मुखी चतुर्दशीतुल्या वा एतादृशः पक्षस्त्रयोदशदिनात्मकः सम्भवति। यद्यपि 'पक्षपरिग्रहे' इत्यस्माद्धातोः 'पचाद्यचि' पक्ष-

शब्दो निष्पन्नो नानार्थश्चास्ति । तथापि ज्योतिःशास्त्रे प्रतिपदाद्यक्षणमारभ्य पञ्चदश्यन्तिमक्षणपर्यन्तं पञ्चदशतिथ्यात्मके काले रूढः शिष्टपरिगृहीतत्वाद्गृह्यते । दिनशब्दोऽप्यत्र त्रयोदशपदसमभिव्याहारादहोरात्रवाचको 'दशाहं शावमाशौचं सपिण्डेषु विधीयते' इत्यादावह शब्दवत् । तत्र दिवसस्तु 'यत्कृच्छ्सूतकचिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानात्' इति भास्करोक्तेः । सावन एवात्र ग्राह्यः । स च सूर्योदयमारभ्यापरसूर्योदयं यावत् तावत्कालो रविवाराद्यपरपर्यायः सकललोकप्रसिद्धो गृह्यते । तत्र 'त्रयोदशदिने पक्षे नूनं संहरते जगत्' इति वचनादेतादृशस्य त्रयोदशदिनात्मकस्य पक्षस्य दोषवत्ता स्मर्यते । कथमस्य पक्षस्य त्रयोदशदिनात्मकत्वम् । उच्यते । त्रयोदशसंख्याकानि दिनानि यस्मिन्स त्रयोदशदिनस्तादृशे पक्ष इति व्युत्पत्त्या पक्षस्यान्यपदार्थकत्वात्तस्य पञ्चदशतिथ्यात्मकस्य त्रयोदशाहोरात्रसम्बन्धोऽभिहितो भवति । प्रस्तुतोदाहरणे तावत्प्रतिपदन्तिमघटीसम्बन्धः प्रातःकाले सोमवारस्य जातः । ततो द्वितीयादितिथिसम्बन्धः सोमवारमारभ्यैव जातः । ततः क्रमेण पञ्चदश्याः शनिवारसम्बन्धोऽभूदिति पक्षस्य त्रयोदशदिनात्मकत्वमजनिष्ट । यदि प्राग्लक्षणलक्षितस्य पक्षस्य त्रयोदशाहोरात्रसम्बन्धो विवक्ष्यते, तदा पक्षस्य त्रयोदशदिनात्मकता खपुष्पतुल्यैव भवेत् । यतोऽपचयाभिमुखत्वात्तिथीनां मध्ये एकस्या एव तिथेः क्षयः स्यान्न द्वयोस्तिथ्योस्तदा पक्षस्य चतुर्दशदिनात्मकता सम्भवति । पक्षस्य मध्ये द्वितिथी पतेतां तदा भवेद्रौरवकालयोगः । पक्षे विनष्टे सकलं विनष्टमित्याहुराचार्यवराः समस्ताः ॥' इतिवाक्याद्द्वयोस्तिथ्योरेव क्षयपक्षस्य त्रयोदशदिनात्मकता सम्भवेत् । सा चाल्पावशिष्टप्रतिपत्सम्भवेदिति निष्कृष्टोऽर्थः । अत्रैवं विधमन्यदप्युदाहरणम् । विंशत्युत्तरपञ्चदशशती १५२० मिते शककाले कार्तिकशुक्लपक्षे जातमस्ति तदेवं विधेयम् । एवं च यदा कदाचिच्छककाले पञ्चदशी तिथिगुरुवारे घटिकैका १ पुनस्तस्मिन्नेव वारे प्रतिपत् ५९ क्षयगता ततस्तस्मिन्नेव वारे पुनर्द्वितीया संलग्ना पुनः प्रातरारभ्य शुक्रवारसम्बन्धेन द्वितीया सम्पूर्णाभूत्पुनः क्षयाभिमुखत्वात्तिथीनां चतुर्दश्याः पञ्चदश्याः वा क्षयः संवृत्तस्तदा पञ्चदशी तिथिर्गुरुवार एव समभूत्तदा चतुर्दशदिनात्मक एव पक्षो भवति । यतः प्रतिपत्सम्बन्धः शुक्रवारे एकपलात्मकोऽपि नाभूत्किन्तु गुरुवारेणैव । ननु 'पक्षस्य मध्ये द्वितिथि पतेताम्' इति लक्षणात् त्रयोदशदिनात्मकः पक्षो भविष्यतीति चेन्न । यतोऽत्र मध्यशब्दः पठ्यते स यद्यष्टमीतिथिमुत षष्ठ्यादितिथिपञ्चकात्मकविभागमाक्षिपति तथापि द्वितिथी पतेतामिति वाक्यार्थासम्भव एव स्यात् । सम्भवस्तु वाक्यार्थे लक्षणयोपयुज्यते । अतो यदा हि पक्षे इति सप्तम्यन्तपदे वक्तव्ये मध्यपदोच्चारणसामर्थ्यादाक्षिप्तयोराद्यन्तयोस्तिथ्योर्निवृत्तिमाह । स इति वाक्यार्थोऽवगम्यते । एवं सति प्रतिपत्पञ्चदश्योर्युगपत्क्षये दोषवत्ता नैव भवति । किन्तु द्वितीयामारभ्य चतुर्दश्यन्तं तिथिद्वयह्रासे त्रयोदशदिनात्मकः पक्षोऽतिदोषावहो भवति । यद्येवं द्वितीयापञ्चदश्योः क्षयेतिदोषवत्ता न स्यादिष्यते च तत्रापि । सत्यम् । नहीदमेव वचोतिनिर्णायकं किन्तु त्रयोदशशदिने पक्ष इत्यनेनैकवाक्यतामापन्नं सत् । 'सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणम्' इत्युक्तेः । कथं तिथिद्वयक्षयवान् त्रयोदशाह्होरात्रसम्बन्धवान्पक्षस्त्रयोदशदिनः पक्ष इत्यनुगतलक्षणं क्रियते । अतो नात्र व्याप्तिरित्यस्त्यतिदोषवत्ता । यत्र चतुर्दशदिनात्मकः पक्ष इति प्रसिद्धिस्तत्र पञ्चदशतिथीनां त्रयोदशाहोरात्रसम्बन्धात्पक्षस्य त्रयोदशदिनात्मकता स्यात्सा मा भूदिति तिथिक्षयद्वयवानित्युक्तम् । अतः प्रतिपत्तिथेश्चतुर्दशीपञ्चदश्योरन्यतरतिथेश्च युगपत्क्षये त्रयोदशदिनात्मक-

पक्षत्वं नास्त्येवेति सिद्धान्तः। अत एव भीष्मपर्वणि कुरुपाण्डवसैन्यनिमित्तभूतमुत्पातमाह दुर्योधनं प्रति भीष्मः—'चतुर्दशीं पञ्चदशीं भूतपूर्वां च षोडशीम्। इमां त्वमभिजानेहममावास्यां त्रयोदशीम् ॥' इति। अस्यार्थः। पूर्वं हि पञ्चाङ्गगणनया प्रतिपदमारभ्यामावास्यां तिथिं चतुर्दशीं चतुर्दशाहोरात्रे निष्पन्ना भूतपूर्वां पूर्वभूतामहमभिजाने। पक्षस्यैकतिथिक्षयसद्भावात्। तथामावास्यां पञ्चदशीं पञ्चदशाहोरात्रे पूर्वजातामहमभिजाने। पक्षस्यैकतिथिक्षयवृद्धिराहित्यात्। तथामावास्यां षोडशीं षोडशहोरात्रे पूर्वं जातामहमभिजाने। पक्षस्यैकतिथिक्षयवृद्धिसद्भावात्। पक्षमध्ये तिथिक्षयवृद्धिस्तु खपुष्पतुल्यैव। भूतपूर्वामित्यनेन, गणितसाध्यपञ्चाङ्गेष्वनेकशो दृष्टत्वादाश्चर्यभावोऽभिहितः अतः फलमप्यस्य वराहेण सामान्यत उक्तम्—'शुक्ले पक्षे सम्प्रवृद्धिं प्रयाते ब्रह्मक्षत्रं याति वृद्धिं प्रजाश्च। हीने हानिस्तुल्यता तुल्यतायां कृष्णे सर्वं तत्फलं व्यत्ययेन ॥' इति। व्यत्ययस्तु शुक्लपक्षापेक्षया। अत्रातिदुष्टफलाश्रवणान्नोत्पातरूपत्वमस्य पक्षस्य परमस्मिन्नवसरे त्विमां पञ्चाङ्गे मयादृष्टाममावास्यां त्रयोदशीं प्रतिपत्तिथिमारभ्य त्रयोदशाहोरात्रे तिथिद्वयह्रासाज्जातां कदाप्यननुभूतां नाहमभिजाने इति महानुत्पातो मया दृष्टोऽतो युद्धान्निवर्तस्वेति वाक्यतात्पर्यार्थः। ननु प्रकृतेरन्यत्वमुत्पात इत्युत्पातलक्षणानाक्रान्तत्वमत्रास्ति गणितज्ञानसाध्यत्वाच्छुक्रास्तादिरुत्पातः केनाप्यङ्गीक्रियते। सत्यम्। यद्यपि पक्षद्वयमध्ये तिथीनां क्षयगामित्वात्तिथिद्वयह्रासो दृश्यते बहुधा गणितसाध्यत्वात्तथाप्यस्मिन् कालेप्यस्मिन्नेवैकस्मिन्पक्षे प्रतिपदमारभ्य तिथिद्वयह्राससद्भावाद्बहुभिर्वर्षैरमावास्या त्रयोदशी जाता दृष्टा तादृशी च मया कदापि नानुभूतेति महोत्पातरूपत्वमस्य युक्तमेव सम्पन्नमिति। 'ज्योतिर्विन्नीलकण्ठस्य गोविन्देन तनुभुवा। त्रयोदशाहपक्षस्य तत्त्वं सम्यक् प्रकाशितम् ॥' इति। अथ तद्वत्तेन प्रकारेण दन्तरत्नादिभूषां दन्ता हस्तिदन्तास्तत्सम्बन्धिनीं भूषां रत्नसम्बन्धिनीं भूषां तथादिशब्दात्सुवर्णमणिसम्बन्धिनीं भूषामपि वर्ज्यां प्रोचुः। सर्वस्मिन्निषिद्धे काले इत्यर्थः। यदाह राजमार्तण्डः—'यात्रां चूडां विवाहं श्रुतिविवरविधिं शंखसद्मप्रवेशं प्रासादोद्यानहर्म्यं सुरनरभवनारम्भविद्याविधानम्। मौञ्जीबन्धं प्रतिष्ठां मणिकनकरदा धारणं कुर्वतो ये मृत्युः सिंहस्थितेज्ये गुरुदिनकरयोरेकराशिस्थयोश्च ॥' इति। सिंहस्थगुरोरुपलक्षणत्वाद्गुर्वस्तादावपि प्रथमकर्तव्यसुवर्णादिधारणं वर्ज्यमित्यर्थः ॥४८॥

पीताम्बरा—सिंह-मकर-गुरु में त्याज्य कर्म—गुरु-शुक्र के अस्त में जिन कार्यों को वर्जित किया गया है वे कार्य सिंह और मकर राशि गत बृहस्पति के समयों में भी नहीं करने चाहिए। तथैव सूर्य और बृहस्पति जितने समय तक एक ही राशि पर रहें उस गुर्वादित्य काल में भी ४६, ४७ श्लोक में कहे गये कार्य नहीं करने चाहिए।

इसी प्रकार जिस मास के जिस पक्ष में तेरह ही दिन (त्रयोदशदिनात्मक पक्ष) हों उस पक्ष में भी उक्त कार्य नहीं करने चाहिए। उक्त कथित अशुभ समय में हाथी-दांत और रत्नों से युक्त आभूषणों के बनाना और धारण करना भी निषिद्ध है।

सिंह-मकर के बृहस्पति में सीमन्त, जातकर्म, नामकरण, अन्नप्राशनादि कार्यों के लिए निषेध नहीं है।

उक्त दोषयुक्त समय में यात्रा का भी निषेध बताया गया है। किन्तु "गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता" जबतक अपने पितरों का गया श्राद्ध नहीं किया जाता तबतक

पुत्र में पुत्रत्व नहीं। शास्त्रों की इस ऊँची धर्ममर्यादा के लिए उक्त गुरु-शुक्र आदिक दोषों में गया और गोदावरी की तीर्थयात्रा में दोष नहीं कहा गया है।

त्रयोदश दिनात्मक पक्ष—जिस पक्ष में दो तिथियों की हानि (क्षय) होती है वह पक्ष तेरह दिन का होता है। **अधिक मास-क्षय मास** की समग्र स्थितियाँ-ग्रहगणित सिद्धान्त ग्रन्थों में उदाहरण सहित विशद रूप में वर्णित हैं ही अतः इस स्थल पर अधिक मासादिकों का गणित विवेचन ग्रन्थ गौरवभय से नहीं दिया जा रहा है ॥ ४८ ॥

अथ सिंहस्थगुरोः प्रकारत्रयेण परिहारमिन्द्रवज्रयाह—

सिंहे गुरौ सिंहलवे विवाहो नेष्टोऽथ गोदोत्तरतश्च यावत्।
भागीरथीयाम्यतटे हि दोषो नान्यत्र देशे तपनेऽपि मेषे ॥ ४९ ॥

पीयूष धारा—सिंह इति। अथ प्रथममंशभेदेन परिहार उच्यते। गुरौ सिंहस्थिते सत्यपि सिंहांशे तृतीयांशसहितत्रयदशांशकेभ्योनन्तरं १३।२० तृतीयांशसहितांशत्रयं ३।२० पञ्चमो नवांशः सिंहांशस्तत्र गुरौ सति विवाहो नेष्टो निषिद्धः। उक्तं ज्योतिर्निवन्धे राजमार्तण्डेन—'सिंहराशौ तु सिंहांशे यदा भवति वाक्पतिः। सर्वदेशेष्वयं त्याज्यो दम्पत्योर्निधनप्रदः ॥' इति। विशेषमाह वसिष्ठः—'सिंहे सिंहांशके जीवे कलिङ्गे गौडगुर्जरे। कालमृत्युरयं योगो दम्पत्योर्निधनप्रदः ॥' इति। अतोऽवशिष्टेष्वंशेषु विवाहादि शुभं भवतीत्यर्थः। 'सिंहेऽपि भगदैवत्ये गुरौ पुत्रवती भवेत् ॥ अत्यन्तसुभगा साध्वी धनधान्यसमन्विता ॥' इति। राजमार्तण्डोक्तेः। अथ देशभेदेन द्वितीयः परिहार उच्यते। अथ गोदावरी नदी तस्या उत्तरदिशि भागीरथी गङ्गा तस्या याम्यतटं दक्षिणकूलं यावन्मर्यादीकृत्यगोदावरीगंगान्तरालवर्ती यो देशस्तत्र सिंहस्थ-गुरुर्वर्ज्यो नाऽन्यत्र। अन्यदेशेषु न सिंहस्थगुरुदोषः। तदाह लल्लः—'गोदावर्युत्तरतो याव-द्भागीरथीतटं याम्यम्। तत्र विवाहो नेष्टः सिंहस्थे देवपतिपूज्ये ॥' इति। अर्थाद्गोदावरीदक्षिणे देशे भागीरथ्युत्तरे देशे च सिंहस्थगुरुदोषो नास्ति। यदाह वसिष्ठः—भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तटे। विवाहो व्रतवन्धो वा सिंहस्थेज्ये न दुष्यति ॥ मृगेन्द्रसंस्थिते जीवे मध्यदेशे कर-ग्रहः। मृत्युयोगो मृत्युदः स्याद्दम्पत्योः पञ्चवर्षतः ॥' इति। अत्र विवाहव्रतवन्धावेव निषिद्धौ। आभ्यामन्यानि शुभकर्माण्यनिषिद्धान्येव। अपवादस्य सङ्कोचाश्रयत्वादुपलक्षणत्वायोगात्। अथ सूर्यराशिवशेन तृतीयः परिहार उच्यते—तपनेऽपि मेषे, सूर्ये मेषराशौ विद्यमाने सति वा सिंह-स्थगुरोर्दोषो नास्ति। "मङ्गलानीह कुर्वीत सिंहस्थो वाक्पतिर्यदा। भानौ मेषगते सम्यगित्याहुः शौनकादयः ॥" इति ज्योतिर्निवन्धोक्तेः। अन्यच्च तत्रैव "सिंहगते सुरमन्त्रिणि कन्या मेषगते तपने परिणीता। भूषणरत्नयुता च सुशीला सत्यवती सुखकीर्त्तिसमेता ॥ इति ॥ ४९ ॥

पीताम्बरा—सिंह में सिंहांश त्याज्य—सिंह राशि के बृहस्पति, सिंह राशि के नवांश में ही जिस समय से जितने समय तक रहते हैं उतने समय तक विवाहादि संस्कार नहीं करना चाहिए।

गङ्गा से दक्षिण, गोदावरी से उत्तर में जितने देश आते हैं उन-उन देशों में सिंह के वृहस्पति में विवाहादिक शुभ कार्य त्याज्य हैं। (भौगोलिक स्थितिवश—राजस्थान, गुजरात, मध्यप्रदेश, महाराष्ट्र का कुछ उत्तरी भाग, उड़ीसा (कलिंग), उत्तरप्रदेश और बिहार के

कुछ दक्षिणी भाग, गङ्गागोदावरी के बीच में आते हैं) गङ्गा-गोदावरी के बीच के देशों के अतिरिक्त अन्य देशों में सिंहस्थ गुरु का विवाहादि के लिए निषेध नहीं है।

सिंह राशि के वृहस्पति हों और यदि सूर्य मेष राशि में हो तो सर्वत्र सब देशों में उपनयन और विवाहादिक मङ्गलोत्सव किये जा सकते हैं वृहस्पति की स्पष्ट राश्यादि जिस समय ४।०।०।० से ४।२९°।१९'।५९"·····तक गणित से होगी तवतक सिंहस्थ गुरु कहा जाता है तथा ४।१०°।०'।०" से ४।१३°।२०'।० तक वृहस्पति सिंह राशि के सिंह नवांश पर रहता है।

"ज्योतिर्निवन्ध" में—मेष के सूर्य और सिंह के वृहस्पति में विवाहित कन्या, सुशीला, सत्यवती, भूषण रत्नों से और सुखकीर्ति से युक्त होती हैं" कहा है ॥ ४९ ॥

अथ सिंहराशिगतगुरु निषेधवाक्यानां प्रतिप्रसववाक्यानां च निर्गलितार्थमनुष्टुब्द्वयेनाह—

मघादिपञ्चपादेषु गुरुः सर्वत्र निन्दितः।
गङ्गागोदान्तरं हित्वा शेषाङ्घ्रिषु न दोषकृत् ॥
मेषेऽर्के सन् व्रतोद्वाहौ गङ्गागोदान्तरेऽपि च।
सर्वः सिंहगुरुर्वर्ज्यः कलिङ्गे गौडगुर्जरे ॥ ५१ ॥

पीयूष धारा—मघादिपञ्चेति । मेषेर्क इत्यादि च । श्लोकद्वयं स्पष्टार्थम् ॥५०॥५१॥

पीताम्बरा—मघादि पञ्चपाद गुरु—मघा नक्षत्र के चारों चरण तथा पूर्वफाल्गुनी का एक चरण (अर्थात् ४।०।०·······से ४।१६°।४०'।० तक) इस प्रकार मघादि पञ्चपाद गुरु जितने मास तक रहे उतने मासो (वैवाहिक मासों) में विवाहादिक सब शुभ कर्म सब देशों में त्याज्य हैं। शेष (४।१३°।२० से ४।२९।५९ तक····) पूर्वाफाल्गुनी के तीन और उत्तराफाल्गुनी का १ चरण अर्थात् इन ४ चरणों में गङ्गा-गोदावरी के अन्तरालीय देशों को छोड़कर अन्यत्र सर्वत्र विवाहादिक शुभ कार्यों में दोष नहीं है। मेष राशि के सूर्य में जैसा पूर्व श्लोक में कहा गया है कि सिंहस्थ वृहस्पति में गङ्गा गोदावरी के बीच के देशों में भी विवाहादि होने ही चाहिए।

किन्तु कलिंग गौड (मध्य वंगाल और उड़ीसा का कुछ उत्तरी भाग) और गुजरात में समग्र सिंह राशि गत गुरु वर्जित हैं।

विशेष—(१) सिंह राशि का सिंहांश गुरु सर्वदेशों में त्याज्य है।

(२) गंगा नदी के उत्तर और गोदावरी के दक्षिण में जो देश हैं उन देशों में सिंह के वृहस्पति में विवाहादि शुभ कार्य होने चाहिए।

(३) मेष राशि के सूर्य में सिंह और सिंहांश गत गुरु भी सभी देशों मे विवाहादि शुभ कार्यों में गृहीत है।

(४) मघा नक्षत्र युक्त माघमासीय पौर्णमासी जिस वर्ष में हो उस वर्ष में सिंहगत गुरु का दोष उसी वर्ष में होता है ॥ ५०—५१ ॥

अथ मकरस्थितगुरोः प्रकारद्वयेन परिहारं शालिन्याह—

रेवापूर्वे गण्डकीपश्चिमे च शोणस्योदग्दक्षिणे नीच ईज्यः।
वर्ज्यो नायं कौङ्कणे मागधे च गौडे सिन्धौ वर्जनीयः शुभेषु ॥ ५२ ॥

पीयूष धारा—रेवापूर्वे इति । रेवा नर्मदा नदी तस्याः पूर्वे भागे, गण्डकी नदी तस्याः पश्चिमे भागे शोणस्योत्तरे दक्षिणे च भागे नीच ईज्यः मकरस्थगुरुर्न वर्ज्यः । एषु देशेषु मकरस्थगुरोर्दोषो नास्ति । तदुक्तं लल्लेन—"नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे । गण्डक्याः पश्चिमे भागे मकरस्थो न दोषभाक् ॥" अर्थादन्येषु देशेषु निषिद्ध एव । तद्देशज्ञानार्थं द्वितीयः परिहारः अयं मकरस्थितगुरुः कौङ्कणे देशे मागधे देशे च गौडदेशे कटकाख्यनगराधस्तात् । सिन्धुर्नाम नदोऽस्ति । तत्पारे । शुभेषु शुभकृत्येषु वर्ज्यो निषिद्धः । उक्तञ्च दैवज्ञमनोहरे—"मागधे गौडदेशे च सिन्धुदेशे च कौङ्कणे । व्रतं चूड़ां विवाहं च वर्जयेन्मकरे गुरौ ।।" इति । अतोऽन्येषु देशेषु मङ्गलं कार्यमेवेत्यर्थतः सिद्धम् । व्यवहारचण्डेश्वरे तु विशेषः—"नीचराशिगतो जीवः प्रशस्तः सर्वकर्मसु । नीचांशकगतस्त्याज्यो यस्मादंशेषु नीचता ॥' इति । अत एव वामनपुराणे—"वापीकूपतडागादि निषिद्धं सिंहगे गुरौ । मकरस्थेऽपि तत्कार्यं न दोषः काललोपतः ।।" इति । काललोपो नाम कालनिषेधः सः इह नास्ति । निषेधवाक्यस्य देशपरत्वादंशपरत्वाच्चेति भावः । गरुडपुराणेऽपि—"यदा सिंहगतो जीवो नैव कल्याणमाचरेत् । मकरस्थेऽपि कर्तव्यं नात्र कार्या विचारणा ।।" इत्यत्रापि पूर्वोक्त एवाशयः ।। ५२ ।।

पीताम्बरा—देशविशेष में शुभ कर्म त्याज्य—बृहस्पति की (३।५°) कर्क राशि के ५ अंश में परमोच्च होने से (९।५°) मकर राशि के ५ अंशो में परम नीच होता है । सामान्यतः इसीलिए बृहस्पति की नीच राशि मकर है । नर्मदा नदी का पूर्वभाग, गण्डकी नदी का पश्चिम भाग और शोण (सोन) नदी के ऊत्तर और दक्षिण के बीच के देशों में नीच राशि (मकर राशि) गत बृहस्पति विवाहादिक शुभ कार्यों में त्याज्य नहीं है । किन्तु कौंकण, मागध, गौड और सिन्धु देशों में मकर का बृहस्पति शुभ कार्यों में वर्जित है ।

यहाँ भी "समग्र मकर राशि के गुरु को शुभ कार्यों में वर्जित नहीं करना चाहिए । केवल नीच राशि के नीच अंश में (५° पाचवाँ अंश) गया हुआ बृहस्पति ही शुभ कार्यों में उक्त देशों में त्याज्य करना चाहिए । "व्यवहार चण्डेश्वर" में स्पष्ट है ।। ५२ ।।

अथ लुप्तसंवत्सरदोषापवादं वंशस्थवृत्तेनाह—

गोऽजान्त्यकुम्भेतरभेऽतिचारगो नो पूर्वराशिं गुरुरेति वक्रितः ।
तदा विलुप्ताब्द इहातिनिन्दितः शुभेषु रेवासुरनिम्नगान्तरे ॥५३॥

पीयूष धारा—गोऽजान्त्येति । गौर्वृषः, अन्त्यो मीनः, कुम्भ एतदितरभे यस्मिन् कस्मिंश्चिद्राशौ स्थितो गुरुराक्रान्तराशेः सकाशादग्रिमराशौ महातिचारेण समागतः सन् पश्चात्कियद्भिर्दिनैर्वक्रितो यदा पूर्वराशिं भुक्तराशिं नो एति तदा विलुप्ताब्दः लुप्तसंवत्सर उच्यते । स विलुप्ताब्दः इह शुभकृत्येषु अतिनिन्दितः निषिद्ध इत्यर्थः । तदुक्तं व्यवहारोच्चये—"अतिचारगतो जीवस्तं राशिं नैति चेत्पुनः । लुप्तसंवत्सरो ज्ञेयो गर्हितः सर्वकर्मसु ।" यदा तु गोजान्त्यकुम्भेषु पूर्वराशेः सकाशात् महातिचारेणायाति पूर्वराशिं च नैति तदा न लुप्तसंवत्सरदोषः । यदाह गुरुः—"मेषे वृषे झषे कुम्भे यद्यतीचारगे गुरौ । न तत्र कालदोषः स्यादित्याह भगवा-

न्यमः ।।'' इति । यदि तु दशैकादश वा मासान्भुक्त्वा यस्मिन्कस्मिश्चिद्राशावतिचारेण गुरुः समायाति पूर्वं राशिं च न गच्छति तदा लुप्तसंवत्सर एव नास्ति । यदाह च्यवनः—''मासान् दशैकादश वा प्रयुज्य राशेर्यदा राशिमुपैति जीवः । भुङ्क्ते न पूर्वं च पुनस्तथापि न लुप्तसंवत्सरमाहुरार्याः ।।'' इति । अथ पूर्वराशिभेदेन परिहारमुक्त्वेदानीं देशभेदेन परिहारमाह-रेवेति । लुप्तसंवत्सरो रेवा नर्मदा सुरनिम्नगा गंगा तयोर्नद्योरन्तरे मध्ये निषिद्धः । उक्तं च—''लुप्ताब्ददोषोऽत्रिमतेन मध्ये सोमोद्भवायाः सुरनिम्नगायाः ।। इति । केषुचिद्राशिषु लुप्तसंवत्सरदोषातिशयोऽस्तीत्युक्तं सारसागरे—''अतिचारगते जीवे धनुःकर्कटमीनगे । लुप्तसंवत्सरो ज्ञेयो विवर्ज्यः सर्वकर्मसु ।।''

समसप्तकाख्यो दोषः—

अन्यैर्विवाहादिनिषेधकं समसप्तकाख्यं दोषान्तरमप्युक्तम् । यदाह नारदः—''समगृष्टिर्गुरुः शुक्रस्तन्मासे तु प्रयत्नतः । विवाहादि न कुर्वीत नर्मदातीर उत्तरे ।।' इति । गुरुरपि—''यदा जीवसितौ चक्रे परस्परनिरीक्षितौ । सप्तमस्थौ तदा दोषो मूढत्वादतिरिच्यते'' इति । वसिष्ठोऽपि—''समसप्तकयोर्जीवशुक्रयोश्च परस्परम् । तदा मूढसमो दोषः शुभकार्यविनाशदः ।।'' इति ।। ५३ ।।

पीताम्बरा—सदोष लुप्त संवत्सर वर्ष—मेष, वृषभ, कुम्भ और मीन राशियों से अतिरिक्त शेष आठ राशियों में अतिचार गतिक वृहस्पति वक्री होकर यदि पूर्व (पहले) की राशि में नहीं आता है तो उस वर्ष लुप्त संवत्सरदोष होता है । गंगा और रेवा नदी के बीच के देशों में, लुप्त संवत्सर का दोष होता है । स्पष्टतया उक्त राशियों के अतिरिक्त आक्रान्त राशि से महातिचार से अग्रिम राशि में प्राप्त होते हुए पुनः कुछ दिन में वक्री होकर जब वृहस्पति भुक्त पूर्व राशि में नहीं आवेगा तो विलुप्ताब्द दोष होगा ।

यदि दश या ग्यारह महीने तक जिस किसी भी राशि में अतिचार गति से बृहस्पति आकर और तब पूर्व राशि में नहीं आवेगा तो लुप्त संवत्सर दोष नही होगा ।

''नारद'' के कथन से—जिस मास में गुरु और शुक्र की परस्पर सम दृष्टि होती है उसमें (सम सप्तक में) समसप्तक दोष होने से भी उस मास में विवाहादिक कर्म त्याज्य हैं । वसिष्ठ के मत से इस दोष का नाम मूढदोष है ।। ५३ ।।

अथ ग्रहाणां होरां वक्ष्यति सा च वारप्रवृत्त्यधीना । तदर्थं वारप्रवृत्तिमुपजात्याह—

पादोनरेखापरपूर्वयोजनैः पलैर्युतोनास्तिथयो विनार्द्धतः ।
ऊनाधिकास्तद्द्विवरोद्भवैः पलैरूर्ध्वं तथाऽधो दिनपप्रवेशनम् ।। ५४ ।।

मध्यरेखा—

पीयूषधारा—पादोनेति । रेखा भूमध्यरेखा ''पुरी रक्षसां देवकन्याथ काञ्ची सितः पर्वतः पर्यलीवत्सगुल्मम् । पुरी चोज्जयिन्याह्वया गर्गराटं कुरुक्षेत्रमेरू भुवो मध्यरेखा ।।'' इति भास्करेणोक्ता । उपलक्षणं चैतत् । लंकात आरम्य सुमेरुपर्यन्तं यत्तं सूत्रं तदधोवर्तिनो ये देशास्ते मध्यरेखा उच्यते । तदुक्तं तेनैव–''यल्लंकोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान्स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः'' इति । यस्मिन्देशे वारप्रवृत्तिश्चिकीर्षिता स देशो यदि मध्य-

रेखातः प्राक्पश्चाद्वा यावंति योजनानि भवन्ति तानि स्वदेशचतुर्थांशोनानि कृत्वा तावद्भिः पलैस्तिथयः पञ्चदश युतोनाः कार्याः । यदि मध्यरेखातः प्रत्यग्योजनानि तदा युताः, यदा तु प्राग्योजनानि तदोनाः कार्या इत्यर्थः । अथ यद्दिने वारप्रवृत्तिरिष्टा तद्दिने–"चरपलयुतहीना नाडिकाः पञ्चचन्द्राद्द्विदलमथ निशार्धं याम्यगोले विलोमे" इति भास्करोक्तरीत्या दिनार्द्धं साध्यम् । तस्माद्दिनार्द्धात्संस्कारविशिष्टाः पञ्चदशोनाधिकाश्चेद्भवन्ति तद्विवरोद्भवैः पलैर्दिनार्धस्य संस्कारविशिष्टपञ्चदशानां च यद्विवरमन्तरं तत्सम्बन्धेनोत्थैरुत्पन्नैः पलैरूर्ध्वं तथांधो दिनपस्य वारस्य प्रवेशनं वारप्रवृत्तिः स्यात् । यदा दिनार्द्धात्संस्कारविशिष्टा पञ्चदश चेदूनाः स्युस्तदा सूर्योदयादूर्ध्वं वारप्रवेशनम् । यदा ह्यधिकास्तदा सूर्योदयात्प्राग्वारप्रवृत्तिरित्यर्थः । यथा वाराणसीप्राङ्मध्यरेखाभिधानात् कुरुक्षेत्रात् त्रिषष्टियोजनानि ६३ पादोनानि ४७।१५ प्राग्योजनत्वादेतैः पलैः ४७ ऊनाः पञ्चदश १५ जाताः १४।१३ दिनार्द्धं १७।२ अस्मात् न्यूना इति विवरं २।४९ सूर्योदयादूर्ध्वं वारप्रवृत्तिः ।

अयमर्थो ग्रन्थकृता लाघवायोपनिबद्धः । राजमार्गस्तु वसिष्ठसंहितायां—"प्रभाकरस्योद्गमनात्पुरे स्याद्वारप्रवृत्तिर्दशकन्धरस्य । चरार्धदेशान्तरनाडिकाभिरूर्ध्वं तथाधोऽथ परत्र तस्मात्' इति । श्रीपतिरपि—"चरार्धदेशान्तरयोर्वियोगयोगोत्थपानीयपलैश्च सम्यक् । सूर्योदयादूर्ध्वमृणे धनेधो वारप्रवृत्ति मुनयो वदन्ति ।।" इति तत्र चरमुत्तरदक्षिणगोलवशादृणं धनं च 'अस्वं स्वं चरगोलयोः स्यात्' इति भास्करोक्तेः–देशान्तरमपि पूर्वापरयोजनवशादृणं धनं च । तत्र "योगे युतिः स्यात् क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः ।।" इत्युक्तेः ऋणयोर्देशान्तरचरयोर्योगे सूर्योदयादधो धनर्णयोर्योगेऽन्तरं कार्यम् । तद्यदृणं धनं च तदा सूर्योदयादूर्ध्वमधश्च वारप्रवृत्तिः । ग्रन्थकृता तु चरसंस्कारो मध्याह्नस्य तद्विशिष्टत्वान्न कृतः । देशान्तरसंस्कारोऽवशिष्यते स लङ्कादिनार्धे पञ्चदशघटीमिते कार्यः । तथा कृते सति यदुभयोरन्तरं तावत्सूर्योदयादूर्ध्वमधश्च वारप्रवृत्तिः ।।५४।।

पीताम्बरा—७, ग्रहों की होरा का ज्ञान—पृथ्वी (दीर्घवृत्ताकार) गोली है । पृथ्वी में जो उत्तर-दक्षिण ध्रुव स्थान हैं, उन दोनों में मिलाई गई रेखा से उसके पूर्वार्ध और परार्ध रूप में दो भाग होंगे, तथा दोनों ध्रुवों से ९० अंश की दूरी पर जो रेखा होती है उससे भी पृथ्वी के दो विभाग उत्तरगोलार्ध और दक्षिण गोलार्ध रूप के होते हैं ।

प्राचीन आचार्य याम्योत्तर रेखा को जो (लंका, उज्जैन, कुरुक्षेत्र और ध्रुवों तक गई हुई रेखा को) याम्योत्तर भूमध्य रेखा मानते हैं तथा उज्जैन नगर के सूर्योदय से ग्रहगणित का साधन करते हैं और उज्जैन, कुरुक्षेत्र आदि नगरों को रेखादेशीय नगर कहते हैं और जिनमें देशान्तर अंश शून्य माना गया है । जैसे आजकल ग्रीन्विच को पृथ्वी की याम्योत्तर रूप भूमध्य रेखा में मानने से वहाँ का देशान्तर शून्य माना गया है ।

रेखादेशीय नगरों से अन्य देशीय नगर रेखादेश से पूर्व या पश्चिम में जितने देशान्तर अंशों में पड़ते हैं उतने देशान्तर अंशों से उत्पन्न समय को देशान्तर समय या देशान्तर काल कहा जाता है ।

धर्मशास्त्रीय विवेचना से—रेखादेश में जिस वार को सूर्योदय जिस समय होगा उस बार में रेखादेश से पूर्व और पश्चिम के नगरों में सूर्योदय क्रमशः पहिले और पश्चात् ही होगा ।

पहले के आचार्य रेखादेशीय स्थानों से पूर्व पश्चिम के (स्थानों) नगरों के बीच के

अन्तर को योजनों के मान से मापते थे। (पहले का प्रायः ५ मील = १ योजन)।

काशी (वाराणसी) सदा से विद्या की राजधानी रहने से इस ग्रन्थ के निर्माता आचार्य ने काशी का उल्लेख कर उज्जैन से काशी की दूरी योजन संख्या से ६३ योजन कही है।

अतः रेखादेशीय नगरों से जितने योजन पश्चिम में वार प्रवेश का समय जानना हो उन योजनों के चतुर्थांश तुल्य पलों को १५ में जोड़कर तथा रेखादेश के पूर्व देश में जितने योजन हों उन योजनों का भी चतुर्थांश तुल्य पल १५ घटी में जोड़ना चाहिए। १५ घटी में जोड़ने और घटाने से उत्पन्न समय दिनार्ध से कम और जितने अन्तर से कम हो उतने ही घटी, पल के अनन्तर तथा यही उत्पन्न समय दिनार्ध से अधिक और जितने अनन्तर से अधिक हो उतने ही घटी-पल सूर्योदय से पूर्वस्थ नगर में उस दिन उस वार का प्रवेश होता है।

उदाहरण से प्राचीनों ने उज्जैन से काशी ६३ योजन पूर्व मानी है। ६३ ÷ ४ = १५। ४५ को ६३ में (काशी पूर्व होने से) घटाया ६३–१५।४५ = ४७।१५ शेष रहा। इन शेष पलों को १५ में घटाने से १५।०–०।४७ = १४।१३ यह घटी-पल हुआ। सं० २०२८ चैत्रशुक्ल प्रतिपदि शनिवार (ता० २७-३-७१) को काशी का दिनमान ३०।२२ है अतः दिनार्ध १५।११ हुआ। उक्त घटी पल १४।१३ ये इस दिन के काशी के दिनार्ध से १५।११–१४।१३ = ०।५८ पल कम होने से सूर्योदय के पश्चात् काशी में वार प्रवेश (शनि का) होगा।

खगोल की दृष्टि से रेखादेशीय और अपने देशीय याम्योत्तर वृत्तों का अन्तर (यदि ये दोनों देश एक ही भूपरिधि में हो तो) देशान्तर अंशादि से परिणत कालादि समय जो होता है उसी को देशान्तर काल कहा गया है।

प्राचीनों (सूर्यसिद्धान्त की सारिणीकार मकरन्द ने) ने उज्जैन से काशी का देशान्तर काल ० घटी ४७ पल पूर्व माना है जो लगभग १८ मिनट ४८ सेकेण्ड होता है। प्राचीनों का यह देशान्तर काल स्थूल है, अतः इस स्थूल देशान्तर तथा अन्य स्थूल कारणों से देशान्तर संस्कृत ग्रहों में स्थूलतावश पञ्चाङ्गों के तिथ्यादिकमानों में स्थूलता होती है और सही देशान्तर आदिकों का संस्कार नहीं करने से तिथि, नक्षत्रों और लग्नों की सन्धिकालों में उत्पन्न मानवों की जन्मपत्रिकाएँ भी एक विधि की तो नहीं ही बन सकतीं तथा प्रति वर्ष के विष्नुत्सव, श्राद्धतिथि तथा अन्यान्य अर्थशास्त्रीय तिथि आदिक निर्णयों में एक शोचनीय समस्या उत्पन्न हो गई है। सन्तोष की बात है कि सूर्यसिद्धान्त मत के पचाङ्गों ने उक्त प्राचीन स्थूल देशान्तर की उपेक्षा कर सही देशान्तर अपनाना प्रारम्भ कर दिया है।

पृथ्वी परिधि में ३६० अंशों की प्रति दिन की प्रवह की गति २४ घण्टे या ६० घटी में पूरी हो जाने से अनुपात से ३६० ÷ २४ = १५^0 एक घण्टे या २$\frac{१}{२}$ घटी में १५ अंश की गति सिद्ध होती है। अतः १५ अंश को दो देशों के अन्तर में १ घण्टा या ६० मिनिट लगता है तो १ अंश के अन्तर में $\frac{६०}{१५}$ = ४ मिनिट समय लगेगा। आधुनिक भौगोलिक मानचित्रों के निर्माण से प्राचीनों की स्थूलता भी सूक्ष्म में आ गई है, यह उपलब्धि प्राचीन सिद्धान्तों की ही कही जानी चाहिए, क्योंकि उस युग में उक्त गणितों की उपलब्धियाँ स्थूल या सूक्ष्म रीति से उन्होंने सम्यक् ज्ञात कर ली थी। काशी और उज्जैन क्रमशः ग्रीन्विच से ८३-७६ अंश पूर्व हैं। काशी के देशान्तर में उज्जैन का देशान्तर ८३-७६ कम कर देने से उज्जैन से काशी

७ अंश पूर्व होने से ७ × ४=२८ मि० × $\frac{५}{२}$=७० पल=१ घटी १० पल रेखादेश अर्थात् उज्जैन से काशी का देशान्तर काल होता है। अति सूक्ष्मतया से यह समय १ घटी ६ पल ही होता है।

इसी प्रसंग में—रेखादेशीय और स्वदेशीय याम्योत्तर वृत्तों का अन्तर विषुवद्वृत्त या उसके समानान्तर अहोरात्रवृत्त में कलात्मक देशान्तर होता है। पृथ्वी की सबसे बड़ी परिधि विषुवद्वृत्त में और सबसे कम परिधि ध्रुव के समीपीय प्रदेशों में होती है। विषुवद्वृत्तीय परिधि को मध्यमभूपरिधि कह कर जिसका जो देश है उस देश की उस परिधि का नाम स्पष्ट भूपरिधि का ज्ञान सूर्य-सिद्धान्त के "लम्बज्याघ्नस्त्रिजीवाप्तः स्फुटः भूपरिधिः स्वकः" से किया गया है।

मध्यम भूपरिधि में प्राचीनों की ४८०० योजन में (लगभग ८००० मील) यदि ६० × ६० = ३६०० पल मिलते हैं तो अभीष्ट देशान्तर योजना में

$$\frac{३६०० \times \text{देशान्तर योजन}}{४८००} = \frac{३ \times \text{देशान्तर योजन}}{४}$$

= देशान्तरकाल। समीकरण की युक्ति से $\frac{३ \times \text{देशान्तर योजन}}{४} = \frac{(४-१)\ \text{देशान्तर योजन}}{४}$

= देशान्तर योजन − $\frac{\text{देशान्तर योजन}}{४}$ = देशान्तर पल होते हैं। देशान्तर योजन में योजन का चतुर्थांश कम करना चाहिए गणित गोल से यही सिद्ध होता है।

विचारने की बात यहाँ पर यह है कि यदि काशी और उज्जैन का देशान्तर काल १ घटी १० पल या (२८ मिनट) जो पहिले दिखाया गया है इस सही मान को ग्रहण कर विलोम गणित से काशी और उज्जैन के सही योजनों को ज्ञात करना समीचीन होगा।

यदि ६३ = $\frac{६३}{४}$ = ६३ − १५।४५ = ४७।१५ ∴ ४७।१५ + १५।४५ = ६३ योजन इसी प्रकार की जगह १।१० मान रखा जाय तो ७० + $\frac{७०}{४}$ = ७० + १७।३० = ८७$\frac{१}{२}$ योजन के मान से उज्जैन से काशी पूर्व में सिद्ध होती है। इस प्रकार प्राचीनों की ही गणित सारणि से प्राचीनों को ४८०० योजन मान की मूल भू परिधि की स्थूलता को भी सूक्ष्मता में परिणत किया जा सकता है।

४७।१५ देशान्तर में भूपरिधि = ४८०० तो ७० दे० अं० में $\frac{४८०० \times ७०}{४७।१५}$ = ७१११ $\frac{३१५}{२८३५}$ लगभग ७१११ योजन भूपरिधि प्राचीनों ने माननी चाहिए थी।

निरक्ष (अक्षांश रहित देश) देशीय क्षितिज से निरक्ष देशीय याम्योत्तर वृत्त तक १५ घटी = ६ घण्टा में पूर्व आनीत देशान्तर पल कम करने से निरक्ष देशीय क्षितिज से अपने देशीय याम्योत्तर वृत्त तक १५ घण्टा− $\frac{\text{३ दे. यो. प.}}{४}$ होता है। इस फल को अपने दिनार्ध में कम करने से निरक्ष और अपने देशीय क्षितिजों का अन्तर होगा। अतः रेखादेश से पूर्व के देशों में उक्त पलों के तुल्य काल में ही निरक्ष देशों में सूर्योदय होगा। इसी प्रकार रेखा

से पश्चिम के देशों में आनीत देशान्तर पलों के तुल्य काल पहिले अपने देश के सूर्योदय से निरक्ष देश में सूर्योदय होगा। तभी वार की प्रवृत्ति भी होगी।

प्राचीन आचार्यों ने लंका का अक्षांश शून्य माना है वास्तव में लंका प्रदेश विषुवद्वृत्त से ५ अंश से १० अंश तक में है। तात्पर्य जब निरक्ष क्षितिज में सूर्योदय होता है तभी वार की प्रवृत्ति माननी चाहिए। ('लंका नगर्यामुदयाच्च भानोः' इत्यादि) है। इसलिए अक्षांश शून्यता लंका में नहीं कही जानी चाहिए। अपि च उत्तरी अमेरिका का उत्तरी भाग Quito, Mexiana तथा सुमात्रा बोर्नियो द्वीपों के मध्य में "गिनी" आदि में विषुवद्वृत्त जाता है (इसलिए लङ्का नहीं) ये देश निरक्ष देश कहे जा सकते थे। भूल से प्राचीनों ने लङ्का को विषुवद्वृत्त में माना है ॥ ५४ ॥

अथ वारप्रवृत्तिप्रयोजनपुरःसरां होरामनुष्टुभाह—

वारादेर्घटिका द्विघ्नाः स्वाक्षहृच्छेषवर्जिताः।
सैकास्तष्टा नगैः कालहोरेशा दिनपात्क्रमात् ॥ ५५ ॥

पी० धा०—वारादेरिति। वारप्रवृत्तिप्रकारेण यस्मिन् क्षणे वारप्रवृत्तिर्जाता तत इष्टघटयो द्विगुणाः कार्याः। ता द्विस्थाने स्थाप्याः। तत्र पञ्चभिर्भक्ते यल्लब्धं तत् त्याज्यम्। यच्छेषं तत् द्विगुणघटीमध्ये वर्जितं कार्यम्॥ एवंविधा घट्यः सैका एकयुक्ताः कार्याः। ततो नगैः सप्तभिस्तष्टा भक्ता अवशिष्टाः कालहोराः स्युः। तद्दिनपाद्वारात् क्रमाद्गणनीयाः। यथा रविवारे इष्टघटिकाः षट् ६ द्विगुणाः १२ पृथगक्षाप्तशेष २ वर्जिताः १०। नगैः ७ तष्टाः शेषं ३ सैकम् ४ रविवारक्रमगणनया चतुर्थो बुधस्तस्य होरा। अत्र वासना। तत्र वसिष्ठः—"वारप्रवृत्तेर्गदिता दिनेशात्कालाख्यहोरापतयः क्रमेण। साचैव नाडीद्वितयेन तष्टः षष्ठश्च षष्ठश्च पुनः पुनः स्यात्" इति। तत्र कृतेऽहोरात्रे चतुर्विंशतिः कालहोरा भवन्ति॥ अत्रानुपातः—यदि घटिकानां षष्ठया ६० चतुर्विंशतिः २४ होरा लभ्यन्ते तदैकया किमिति। अत्रैकेन गुणे विशेषाभावाच्चतुर्विंशतेः छेदः षष्ठिर्जातः। उभयोर्द्वादशापवर्ते इष्टघटीका द्विगुणाः पञ्चभक्ताः कालहोराः स्युरिति॥ तथा चोक्तं रत्नमालायां "वारप्रवृत्तेर्घटिका द्विनिघ्नाः कालाख्यहोरापतय शराप्ताः। दिनाधिपाद्या रविशुक्रसौम्यशशाङ्कसौरेज्यकुजाः क्रमेण॥" अथ ग्रन्थकृदुक्ता वासनासार्धघटीद्वयेनैकहोरा द्विगुणिताः सार्धद्विघट्यः पञ्च भवन्ति। अत एवोक्तं—वारादेर्घटिका द्विघ्ना' इति। एकयोगे षट् जाता। एवं रविवारे क्रमेण गणनया द्वितीया शुक्रस्य कालहोरा प्रवृत्ता। अत उक्तं 'सैका' इति। भवन्मतेऽपि सूर्यात्षष्ठः शुक्रस्तस्यैव होरा। इयं च शुक्रहोरा पञ्चघटीपर्यन्तम्। स्वमते इष्टघटिका ४ द्विगुणाः ८ अत्र पञ्चभ्यआधिक्यमनुचितमिति द्वितीयस्थाने स्थापयित्वा पञ्चभक्तावशिष्टत्रेयेणोनाः पञ्चजाताः। अत उक्तं—'स्वाक्षहृच्छेषवर्जिता, इति। एकयोगे षट्। एवं सति पुनः सैव होरा। एवमिष्टघटीभिः कालहोरानयनं सुगमम्। वाराणां सप्तसंख्यात्वात्तदाधिक्यमनुचितमिति—'नगैस्तष्टा, इत्युक्तम्। क्रमगणनायां त्वियं युक्तिः द्वयोर्होरास्वामिनोरन्तरं पञ्चकं सम्भवति। एकयोगस्तु वर्तमानकालहोराज्ञानार्थम्। अतः षष्ठिक्रमगणनया भवद्विवक्षिता सैव होरा भवति॥

अथ वारप्रवृत्तिरुदयात्तत्पूर्वं वेति।

विवाहवृन्दावने तु उदयमारभ्योक्ताः कालहोराः। यथा—"तत्कालार्कन्यूनलग्नांश-

पिण्डा भक्ताः पञ्चक्षोणिभिर्भुक्तहोराः। भास्वच्छुक्रज्ञेन्दुसौरेज्यभौमाः संख्यायेरन्वारतस्ते तदीशाः ॥' इति। अनयोर्विषयविभागो वसिष्ठसंहितायां–"वारप्रवृत्तेर्विज्ञानं क्षणवारार्थमेव हि। अखिलेष्वन्यकार्येषु दिनादिरुदयाद्भवेत् ॥' इति। क्षणवारः कालहोरारूप; । तदर्थं वारप्रवृत्तिः। अन्यकार्येषु दिक्छूलादिषु तिथिवारप्रयुक्तेषु नक्षत्रवार प्रयुक्तेषु चायोगेषु च सूर्योदयादेव वारा ग्राह्याः ॥ ५५ ॥

पीताम्बरा—वार प्रवृत्ति समय का ज्ञान—वार प्रवृत्ति समय से इष्टकाल की घटिकाओं को द्विगुणित कर गुणनफल को दो जगह स्थापित करना चाहिए। एक जगह दिगुणित इष्ट घटिकाओं में ५ का भाग देकर शेष को दूसरी जगह द्विगुणित घटिकाओं में घटा देने से उसमें और १ जोड़ देने से काल होरा होती हैं। ये काल होरा ७ से अधिक हों तो ७ से भाग देकर शेष अंक के तुल्य दिन पति से क्रमशः गणना कर एकादि सात तक शेष में, रवि चन्द्र····शनि की (जिस दिन काल होरा का विचार किया जा रहा है उसीं दिन से) काल होरा होती है।

जैसे बुधवार के दिन इष्ट घटी ८ × २=१६, १६ ÷ ५, शेष=१ अतः १६ – १ = १५ वीं होरा हुई। किन्तु वार सात ही होने से १५ ÷ ७ = शेष = १ गत होरा हुई उसमें एकजोड़ने से दूसरी होरा बुधवार के दिन ८ वीं घटी इष्टकाल में बुध से दूसरी वृहस्पति की होरा हुई।

कालहोरा ज्ञान का सरल दूसरा प्रकार—६० घटियों में ढाई घटी ($\frac{५}{२}$ घटी = १ होरा one hour) की एक होरा के क्रम से २४ होराएँ प्रत्येक वार को होती हैं। जैसे रवि-वार को प्रथम होरा रवि की ही होती है। दूसरी होरा के लिए इष्ट २।३१ × २ = ५।२ ÷ ५।० = शेष = ५।२–० = ५।२ ÷ ७ = शेष ५, शेष + १ = ५ + १ = ६ छठीं होरा रविवार को दूसरी होरा रविवार से छटी शुक्र की सिद्धि होती है। इसी प्रकार यदि रविवार को इष्ट = ६ घटी तो, ६ × २ = १२ ÷ ५, शेष = २, १२ – २ = १०, १० ÷ ७, शेष = ३, शेष + १ = ३ + १ = ४ रविवार को तीसरी होरा बुध की सिद्ध होती है जो कि रविवार की दूसरी होरा शुक्र से छठीं बुध की, एवं रविवार को चौथी होरा ज्ञात करनी हो तो बुध से छठीं सोम की, एवं पाँचवीं सोम से छठीं शनि की, पुनः रविवार को छठीं, होरा शनि से छठीं वृहस्पति इस प्रकार ६० घंटी इष्टकाल में $\frac{६० \times २}{५}$ = २४, २४–० + २४ ÷ ७ = शेष ३, ३ + १ = ४ रविवार को अन्तिम २४ वीं होरा रवि से चौथी बुध की या उक्त छठीं से छठीं के क्रम से रविवार की २३ वीं होरा शुक्र से छठीं बुध की ही स्पष्ट सिद्ध होती है। इसलिए सूर्योदय से इष्टकाल तक जितने घण्टे मिनट हों उतने घण्टे मिनटों में १ से २४ तक घण्टों को समझ कर, वार के आरम्भ से छठें-छठें वार की इष्ट घण्टों तक गणना से होराएँ ज्ञात हो जाती हैं। जैसे किसी बुधवार को सूर्योदय ६ बजे हुआ। रात्रि १२ बजे के इष्ट में ६ बजे सूर्योदय से रात्रि के १२ बजे तक १८ घण्टों में अठारहवीं होरा बीत कर १९ वीं बुधवार को बुध से पहिली बुध की बुधवार को दूसरी बुध से छठें सोम की, पुनः बुध को तीसरी होरा सोम से छठीं शनि की, चौथी शनि से छठीं वृहस्पति की तथा इसी क्रम से बुधवार को १९ वीं होरा मंगल की ही होगी। क्योंकि इष्टकाल १८ घण्टा = ४५ घटी, ४५ × २ = ९० ÷ ५ = १८, शेष = ०, ९०–० = ९० ÷ ७ शेष = ६ शेष + १ = ६ + १ = ७ अतः पूर्व प्रकार से बुधवार के दिन बुध से शेष ७ तुल्य मंगल ही होता है।

इसलिए घण्टों के माप के इष्टकाल से गत और अग्रिम होरा समझ कर वारेश से छठे, छठे गणना से वार होगा प्रधान वार में वही वार होरेश होगा। इस प्रकार एक सारिणी भी सुविधा के लिए बनाकर रखी जानी चाहिए ॥ ५५ ॥

अथ कालहोरा प्रयोजनौचित्यं शालिन्याह—

वारे प्रोक्तं कालहोरासु तस्य धिष्ण्ये प्रोक्तं स्वामितिथ्यंशकेऽस्य !
कुर्याद्दिक्छूलादिचिन्त्यं क्षणेषु नैवोल्लङ्घ्यः परिघश्चापि दण्डः ॥

पीयूषधारा—वारे प्रोक्तमिति। यत्कर्म यस्मिन् वारे प्रोक्तं तद्दिनस्य सदोषत्वादत्यावश्यककृत्ये तस्य कालहोरायां कर्तव्यम्। यदाह नारदः—'यस्य खेटस्य यत्कर्म वारे प्रोक्तं विधीयते। ग्रहस्य क्षणवारेऽपि तस्य तत्कर्म सर्वदा ॥' इति ॥

होराफलानि—

अत्र केचित्। यस्य वारे यत्कर्म प्रोक्तं तस्य बलिनो नवांशे सूर्यश्चन्द्रो वा चेतिष्ठेत् तदा तत्कर्म कार्यमित्याहुः उक्तं च "यस्य ग्रहदिने कर्म यत्किञ्चिदभिधीयते। तस्यांशे संस्थिते सूर्ये चन्द्रे वा तद्विधीयते ॥" इति। कैश्चित्प्रत्येकं होराफलान्युक्तानि—"भानुहोरा मृतिं कुर्याच्चन्द्रहोरा स्थिरासनम्। कारावन्धं भौमहोरा बुधहोरा च पुत्रदा ॥ वस्त्रालङ्कारदा जीवहोरा शौक्री विवाहदा। जडत्वं शनिहोरायां सप्तहोराफलं त्विदम् ॥ प्रश्नकाले तु या होरा तस्याः फलमवाप्नुयात् ॥' इति।

उदयाद्धोरानयनप्रयोजनम्

उदयादारभ्य होरानयनप्रयोजनं तु—"पादः स्ववर्षे च दलं स्वमासे दिने स्वकीये चरणोनरूपम्। रूपं स्वहोरास्विति कालवीर्यमुक्तं हि होरानिपुणैः पुराणैः ॥' इति। युक्तं चैतत्। वर्षेशादीनामुदयादितः प्रवृत्तानां साहचर्याद्वारेशा अप्युदयादेव गणनीयाः। अथ प्रसङ्गान्नक्षत्रप्रयुक्तानां कर्मणामनुष्ठाने प्राप्तेऽपवादमाह—धिष्ण्य इति। यस्मिन् धिष्ण्ये नक्षत्रे यत्कर्म वस्त्रपरिधानादिकमुक्तं तत्सत्यावश्यकत्वे अस्यधिष्ण्यस्य स्वामितिथ्यंशके स्वामिमुहूर्ते कुर्यात्। उक्तं च नारदेन—"यस्मिन्नृक्षे तु यत्कर्म निखिलं कथितं च यत्। तद्दैवत्ये तन्मुहूर्ते कार्यं यात्रादिकं तथा ॥" इति। मुहूर्तस्वामिनो विवाहप्रकरणे वक्ष्यति। अत्रापि स्वामितिथ्यंशे इदमवश्यं चिन्त्यं विचारणीयम्। किम् दिक्शूलाद्यं नक्षत्रशूलं च। आदिशब्देन लालाटिकयोगोऽपि। क्षणेषु मुहूर्तेषु इदमवश्यं चिन्त्यं विचारणीयम्। एवं परिघो दण्डः क्षणेषु नैवोल्लङ्घ्यः। यदाह वसिष्ठः—"यत्कर्म कथितमृक्षे यस्मिंस्तत्कर्म तत्क्षणे कार्यम्। दिक्छूलादिकमखिलं परिघदण्डादिविज्ञेयम् ॥" इति। विज्ञेयमवश्यं विचारणीयम्। दिक्छूलादिकं तु यात्राप्रकरणे वक्ष्यति ॥५६॥

पीताम्बरा—वारके कृत्य कालहोरा में—जिस वार में जिस कर्म को करने की विधि कही गई है, वह वार यदि कथित कर्म के लिए उपयुक्त नहीं है और कार्य आवश्यक है तो उस वार में कथित कर्म के उपयुक्त की कालहोरा नामक वार के समय में आवश्यक कार्य किया जा सकता है। २४ घंटे का एक वार और १, १ घंटे क्रम का एक-एक क्षणिक वार पूर्व श्लोक से स्पष्ट है।

यदि किसी रविवार के दिन पश्चिम दिशा की यात्रा करनी हो तो दिशाशूल होने से पश्चिम की यात्रा का निषेध कहा जावेगा। किन्तु रविवार ही को पश्चिम जाना अत्यन्त आवश्यक है

तो रविवार के दिन सोम, वुध, गुरु, आदि (शुक्र को होरा छोड़ कर) की होराओं में पश्चिम दिशा की यात्रा की जा सकती है। तथा उक्त अभिप्राय से जिस कार्य के लिए सोमवार को शुभ कहा गया है, उस कार्य को सोमवार की सोम की काल होरा में करने से विशेष शुभ फल भी होता है।

इसी प्रकार जिस नक्षत्र में जिस कार्य के करने की विधि दी गई है वह कार्य उस नक्षत्र के अधिपति के पन्द्रहवें विभाग के समय में करने से वह कार्य सफल होता है। (स्वामी तिथ्यंश विवाह प्रकरण में)

मूहूर्त, होरा आदिको में भी दिशाशूल आदिकों का विचार करना चाहिए।

यात्रा प्रकरण में वर्णित परिघ-दण्ड आदि का तो नक्षत्र और नक्षत्र स्वामी मुहूर्त में भी उल्लंघन नहीं करना चाहिए ॥ ५६ ॥

अथ कार्यमात्रनिषिद्धान्मन्वादीन्युगादींश्च शार्दूलविक्रीडितेनाह—

मन्वाद्यास्त्रितिथी मधौ तिथिरवी ऊर्जे शुचौ दिक्तिथी
ज्येष्ठेऽन्त्ये च तिथिस्त्विषे नव तपस्यश्वाः सहस्ये शिवाः।
भाद्रेऽग्निश्च सिते त्वमाष्ट नभसः कृष्णे युगाद्याः सिते
गोऽग्नी बाहुलराघयोर्मदनदर्शौ भाद्रमाघासिते ॥ ५७ ॥

इति दैवज्ञानन्तसुतदैवज्ञरामज्योतिर्विद्विरचिते मुहूर्तचिन्तामणौ
शुभाशुभप्रकरणं प्रथमं समाप्तम् ॥ १ ॥

पीयूषधारा—मन्वाद्या इति। एते चतुर्दश मन्वाद्या ज्ञेयाः। सिते इति वक्ष्यमाणं पदमनुकृष्य चैत्रादिमासेष्वपि सम्बध्यते। मधौ चैत्रमासे सिते शुक्लपक्षे त्रितिथी तृतीयापूर्णिमे। ऊर्जे कार्तिके शुक्लेपक्षे तिथिरवी पूर्णिमाद्वादश्यौ। शुचावाषाढमासे शुक्लपक्षे दिक्तिथी दशमीपूर्णिमे। ज्येष्ठे अन्त्ये फाल्गुने च तिथिः पूर्णिमा। इषे आश्विने शुक्लपक्षे नव नवमी। तपसि मासे माघे मासि शुक्लपक्षे अश्वाः सप्तमी। सहस्ये पौषे शुक्लपक्षे शिवा एकादशी। भाद्रपदमासे शुक्लपक्षेऽग्निस्तृतीया। नभसः श्रावणस्य कृष्णपक्षे अमा अमावास्या अष्ट अष्टमी। अत्राष्टमी जन्माष्टमी तदनन्तरभाविनी अमावास्या च गृह्यते। यदाह नारदः—"द्वादश्यूर्जे शुक्लसंज्ञिता ॥ एकादशी सिता पौषेप्याषाढे दशमी सिता। माघे च सप्तमी शुक्ला नमस्येष्यसिताष्टमी ॥ श्रावणे मास्यमावास्या फाल्गुने मासि पूर्णिमा। आषाढे कार्तिके मासि चैत्री ज्येष्ठस्य पूर्णिमा। मन्वादयः स्नानदानश्राद्धेष्वानन्त्य पुण्यदा ॥' इति। मत्स्यपुराणेऽपि—"आश्वयुक्शुक्लनवमी कार्तिके द्वादशी तथा। तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥ श्रावणस्य त्वमावास्या पौषस्यैकादशी तथा। अषाढस्यापि दशमी माघमासस्य सप्तमी ॥ श्रावणस्याऽष्टमी कृष्णा आषाढस्यापि पूर्णिमा कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी सिता ॥ मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः।" इति अत्र नारदवाक्ये 'नभस्येप्यसिताष्टमी इति। तत् कृष्णादिमासाभिप्रायेण। मत्स्यपुराणवचनं तु 'श्रावणस्याष्टमी कृष्णा' इति। तच्छुक्लादिमासाभिप्रायेण ॥ एवं सति जन्माष्टमी सिद्धा उभयमते। अमावास्या शुक्लादिमासाभिप्रायेण जन्माष्टम्यनन्तरभाविनी गृह्यते ॥

युगादयः—

अथ युगाद्याः युगादयश्चत्वार उच्यन्ते । बाहुलः कार्तिकः, राधो वैशाखः गोग्नी नवमी-तृतीये यथासंख्यं ज्ञेये । सिते शुक्लपक्षे कार्तिके शुक्लपक्षे नवमी । वैशाखे शुक्लपक्षे तृतीया । भाद्रमाघासिते यथासंख्यं मदनदर्शौ भाद्रपदकृष्णपक्षत्रयोदशी माघकृष्णाऽमावस्या । एते युगादयश्चत्वारः । यदाह नारदः—"कार्तिके शुक्लनवमी चादिः कृतयुगस्य सा । त्रेतादिर्माधवे शुक्ला तृतीया पुण्यसंमिता ॥कृष्णा पञ्चदशी माघे द्वापरादिरुदीरिता । कल्पादि; स्यात्कृष्णपक्षे नभस्ये च त्रयोदशी ।" शुक्लादिमासाभिप्रायेण श्राद्धपक्षत्रयोदशी प्रसिद्ध शिवरात्र्यनन्तराभाविन्यमावास्या च गृह्यते ॥

अनध्यायास्तु—

उशनाः—"अयने विषुवे चैव शयने बोधने हरेः । अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु ॥" इति । याज्ञवल्क्यस्त्वष्टत्रिंशत्तात्कालिकाननध्यायानाह—

"सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने । समाप्य वेदं द्युनिशमारण्यकमधीत्य च ॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके। ऋतुसन्धिषु मुक्त्वा च श्राद्धिकं प्रतिगृह्य च ॥
पसुमण्डूकनकुलश्वाहिमार्जारमूषकैः । कृतेन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्ये ॥
खरोष्ट्रगर्दभोलूकसामवाणार्तनिःस्वने । अमेध्यशवशूद्रान्त्यश्मशानपतितान्तके ॥
देशेऽशुचावात्मनि च विद्युत्स्तनितसम्प्लवे । भुक्त्वार्द्रपाणिरम्भोभिरर्द्धरात्रेतिमारुते ॥
पांशुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु । धावतः पूतिगन्धे च शिष्टे च गृहमागते ॥
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणिरोहणे । अष्टविंशदनध्यायानेतास्तात्कालिकाञ्जगुः ॥' इति ।

अन्यच्च—"अहन्येते ह्यनध्यायाः शिष्यर्त्विग्गुरुबन्धुषु । उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये मृते ॥" एवमादयोऽन्येप्यनध्याया धर्मशास्त्रोक्ता अनुसन्धेयाः ते च व्रतबन्धे विद्यारम्भे व्रताविसर्गादौ नित्याध्ययने च यथायोग्यं वर्जनीयाः । सोपपदादीननध्यायान् ग्रन्थकृत् व्रतबन्धप्रकरणे वक्ष्यतीति शिवम् ॥५७॥

शुभाशुभप्रकरणोपसंहारः—

शुभाशुभप्रकरणं गद्येनोपासंहरति-–इति श्रीदैवज्ञेति । "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । श्रीशब्दो वाक्यालङ्कारे । शुभं सिद्धियोगादि । अशुभं सिंहस्थादिः । तयोः प्रकरणानिरूपणम् । अन्यत्स्पष्टम् ।

ज्योतिर्विद्वरनीलकण्ठविदुषः श्रीचन्द्रिकायास्तथा
पुत्रेणाहिगवीप्रसारितधिया मौहूर्तचिन्तामणेः ।
गोविन्देन विनिर्मिते नयनिधौ पीयूषधाराभिधे
व्याख्यानं हि शुभाशुभप्रकरणं पूर्णत्वमभ्यागमत् ॥१॥

इति श्रीविद्वरदैवज्ञमुकुटालङ्कारनीलकण्ठज्योतिर्वित्पुत्रगोविन्दज्योतिर्विद्विरचितायां मुहूर्तचिन्तामणिटीकायां पीयूषधाराभिधायां शुभाशुभप्रकरणं समाप्तम् ॥ १ ॥

■

पीताम्बरा—अनध्याय के लिए मनु आदि और युगादि की आरम्भतिथियों का उल्लेख किया जा रहा है—चैत्रमास शुक्लपक्ष की तृतीया-पूर्णिमा, कार्तिकशुक्ल की पूर्णिमा द्वादशी, आषाढ़शुक्ल में दशमी, पूर्णिमा, ज्येष्ठ और फाल्गुनशुक्ल की पूर्णिमा, आश्विनशुक्लपक्ष की नवमी, माघशुक्ल की सप्तमी, पौषशुक्ल की एकादशी, भाद्रशुक्ल की तृतीया, श्रावणकृष्ण की अमावास्या और अष्टमी (शुक्लपक्षारम्भ से मासारम्भ के अभिप्राय से श्रावणकृष्ण अष्टमी का जन्माष्टमी से अभिप्राय है "नभस्येप्यसिताष्टमी") इन तिथियों में स्वायंभुव स्वारोचिष आदिक चौदह मनुओं का आरम्भ होने से ये तिथियाँ मन्वादि कही गयी हैं ।

तथा कार्तिकशुक्ल की नवमी वैशाखशुक्ल की तृतीया, भाद्र और माघकृष्णपक्ष में क्रमशः त्रयोदशी और अमावास्या ये युग की आदिम दिन की तिथियाँ हैं । अर्थात् कार्तिक-शुक्ल नवमी को सत्ययुग, वैशाखशुक्ल तृतीया को त्रेतायुग, भाद्रकृष्ण त्रयोदशी को द्वापर युग और माघकृष्ण अमावस्या को कलियुग का प्रारम्भ हुआ था ।

अल्मोड़ा मण्डलान्तर्गत जुनायल ग्रामस्थ स्व० १०८ श्री पं० हरिदत्त ज्योतिर्विदात्मज
पर्वतीय श्री केदारदत्त जोशी कृत मुहूर्तचिन्तामणि ग्रन्थ के प्रथम शुभाशुभ
प्रकरण की पीयूषधारा टीका की पीताम्बरा नाम की हिन्दी व्याख्या सम्पन्न ।

●

अथ नक्षत्रप्रकरणं द्वितीयम् ।

शर्वाणीतनयमथाब्धिदावमीशं नत्वा श्रीगुरुपदभक्तिलब्धविद्यः ।
गोविन्दो विबुधवरप्रहर्षिणीं तां नक्षत्रप्रकरणटिप्पणीं तनोति ॥

अथ नक्षत्रप्रकरणं व्याख्यायते । तत्रादौ नक्षत्राणां प्रसिद्धत्वादेवावक्तव्यतायां सिद्धायां तत्स्वामिनः शार्दूलविक्रीडितेनाह—

नासत्यान्तकवह्निधातृशशभृद्रुद्रादितीज्योरगा
ऋक्षेशाः पितरो भगोऽर्यमरवी त्वष्टाशुगाश्च क्रमात् ।
शक्राग्नी खलुमित्रशक्रनिऋतिक्षीराणि विश्वे विधि-
र्गोविन्दो वसुतोयपाजचरणाहिर्बुध्न्यपूषाभिधाः ॥ १ ॥

पीयूषधारा—नासत्यान्तकेति । एते क्रमादृक्षेशा नक्षत्राधीशा ज्ञेयाः । यथा—अश्विन्या नासत्यावश्विनीकुमारौ । भरण्या अन्तको यमः । कृत्तिकाया वह्निरग्निः । रोहिण्या धाता ब्रह्मा । मृगस्य शशभृच्चन्द्रः । आर्द्राया रुद्रो महादेवः । पुनर्वसोरदितिर्देवमाता । पुष्यस्येज्यो बृहस्पतिः । आश्लेषाया उरगः सर्पः । मघायाः पितरः । पूर्वफल्गुन्या भगः सूर्यविशेषः । उत्तर-फल्गुन्या अर्यमा सूर्यविशेषः । हस्तस्य रविः सूर्यः । चित्रायास्त्वष्टा विश्वकर्मा । स्वात्या आशुगो वायुः । विशाखायाः शक्राग्नी इन्द्राग्नी । अत्र समुदितयोर्देवतात्वम् । अनुराधायाः मित्रः सूर्यविशेषः । ज्येष्ठायाः शक्र इन्द्रः । मूलस्य निऋती राक्षसः । पूर्वाषाढायाः क्षीरमुदकम् ।